श्री:

॥ अथ कल्प-विधानस ॥

लिखा श्री [illegible] आचार्य

श्री [illegible] पाठे [illegible]

[illegible]

[illegible] राकुओ [illegible]

श्रीगणेशाय नमः ॥ श्रीशाम्बशिवाभिधाय नमः ॥ सोमलता. सोमो सोमोपमा वल्ली मधु
ष्टौषधी महाबला ॥ भुजङ्गाकारमाप्रोक्ता रक्तपर्वसमन्विता ॥ १ ॥ रक्ताकारकं विमुञ्चेद्विप
त्रैः पंचदशान्विताः ॥ सोमवल्ली द्विधा प्रोक्ता श्वेता रक्ता सकन्दका ॥ २ ॥ दश पंच च पत्राणि पौर्ण
मास्यां भवन्ति हि ॥ अशाखा च भवेद्वल्ली तस्याः कन्दो ... ॥ ३ ॥ कृष्णपक्षे दलं तस्या ए
कैकं चैव हीयते ॥ अमायां च न किञ्चित्स्यात्सर्वं प्रातिततक्षणात् ॥ ४ ॥ पौर्णमास्यां गृहीत स्या र
से चैव रसायने ॥ रसेन तस्याः संयुक्तो हेम्ना च विनियोजितः ॥ ५ ॥ अन्धमूषागतो ध्मातो व
ध्यते तत्क्षणेन तु ॥ विन्धति सर्वलोहानि कोटयंशात्क्षेमकारकः ॥ ६ ॥ तथा वङ्गेन सूतेन पल्लै

केनादिव्यता ॥ त्वग्दन्तनखा केशाः पूर्वेजापिनवाः शुभाः ॥ ७ ॥ दिव्यदेहत्वमाप्नोति महाकल्पा
युषो वल्ली ॥ सोमवल्ली विधानेन सर्वेषां च क्रमोदितः ॥ ८ ॥ स्थलपद्मिनी ॥ स्थलजा पाद्मिनी
चान्या स्थलेत द्रूपधारिणी ॥ पद्मिनी सदृशा पत्रैः पुष्पैरपि च तादृशः ॥ ९ ॥ भङ्गे चैव स्रवेत्क्षीरं
रक्तवर्णं सुशोभनम् ॥ पुष्पमकर्णिकं तस्यास्सद्गन्धा सुक्तकर्मकृत ॥ १० ॥ रसे रसायने चैव सवी
जं रसबन्धने ॥ आक्रम्य वामपादेन पश्येद्गगनमण्डलं ॥ ११ ॥ पश्येत तारकायुक्तं ग्रहनक्ष
त्रमण्डलं ॥ लक्ष्य योजनतो देवि सा ज्ञेया स्थलपद्मिनी ॥ १२ ॥ अजगरी ॥ तथान्याऽजगरी
नाम विख्याता तनुमहौषधी ॥ तत्सादृश्या भवेद्वल्ली पंचास्त्रि प्रमाणिकाः ॥ १३ ॥ मण्डलैः कपि

लोमशैः सर्पाभावश्च पर्णिनी ॥ सक्षीरा स्वल्पपत्रा च भूतकस्य निवान्धिनी ॥ १५ ॥ ईश्वरी ॥
ईश्वरी नागवल्ली च रक्तक्षीरप्रवाहिनी ॥ गोनसी ॥ द्विपर्णिनीं मूलभवां मरुणं कृष्णमण्डलं प ॥
ञ्चरत्तिमात्रां जानीयाद्गोनसीं गोनसाकृतिम् ॥ सक्षीरां वै विजानीयाद्वसन्ते चाम्बुदागमे ॥ १६ ॥
उच्चया ॥ उच्चरासुकाकारा वर्णेन कांश्यनीलिका ॥ एवमेव भवेन्नालं तस्य रोमप्रवेशनं ॥
१७ ॥ तस्याग्रे च भवेत्पुष्पं शुकतुण्डस्य सन्निभं ॥ वर्त्तुलानि च पत्राणि शुकपिच्छनिभानि
च ॥ १८ ॥ तत्कन्दं कूर्मसंस्थानं क्षीरं सिन्दूरसन्निभम् ॥ तस्योपरि समारूढखुन्तारिक्षं निरी
क्षते ॥ १९ ॥ देवाक्रष्यादि दृश्यन्ते चिह्न दृश्यं तदीदृशं ॥ भूतकेशी ॥ भूतकेशी भवेद्वल्ली

निम्बपत्रविचित्रिता ॥२०॥ मूले कृष्णा विषहरा कृष्णावल्लीपयस्विनी ॥ भूकदंब ॥ भूकदंबे
तिविख्याता फूले जीरकसन्निभैः ॥२१॥ कुसुंभसदृशैः पुष्पैश्चक्राकारैश्च संस्थितैः ॥ मूले
वह्निशिखाकारैः सूतकस्य निबन्धिनी ॥२२॥ रुदन्ती ॥ नाम्ना चांशुमती चान्या रुदन्ती
प्रस्थिता तु सा ॥ चणकाभा भवेत्सा तु तत्र सत्त्वा च सुतेजसा ॥२३॥ तदाकारं तु कुसुमं पत्राग्रितो
यबिन्दवः ॥ रसबन्धकरी ख्याता रुदन्तीति महौषधीः ॥२४॥ सर्वरा ॥ औषधी सर्वरा नाम्नी
शिलातलसमुद्भवा ॥ स्नुहिपत्रोपमैः पत्रैर्वर्तुलैः कुभिः सञ्चितैः ॥ रुषदैर्वार्द्धमुत्तिष्ठत्स्निग्ध
पत्राः पयस्विनी ॥ शारवामृगाणां सा भक्ष्या रसबन्धकरी भवेत् ॥ वाराही ॥ कृष्णासर्पस्वरू

पेणवाराहीकन्दसंभवा॥एकपत्रामहावीर्याभिन्नाञ्जनसमप्रभा॥सक्षीराकन्दलोग्रीवस
र्पजस्यनिबन्धिनी॥ पर्यान्तकी॥पार्यान्तकीभवेच्चान्याजायतेपर्वतेतुसा॥पारिभद्रसमैःप
त्रैस्तत्तुस्यात्क्षीरिणीभवेत॥वल्लीसातुसमाख्याताओषधीरसबन्धिनी॥ शतपर्वी॥शत
पर्वीभवेच्चान्यावज्रपर्वासमातृका॥अश्वत्थसदृशैःपत्रैर्वल्लीसातुपयस्विनी॥आम्रात
की॥आम्रातकीभवेच्चान्यादिव्यौषधीर्महाबला॥आम्रपत्रोपमैःपत्रैर्वल्लीनातिवि
सर्पिणी॥ त्रिपत्रा॥त्रिपत्रानामचान्यातुक्षीरिणीचत्रिपत्रिका॥कचोरपत्रसदृशा
कंदतोनालतःसमा॥पुन्नागपत्रिका॥पुन्नागपत्रिकाचान्यावल्लीचातिविसर्पिणी॥

२

पुन्नागसदृशैः पत्रैर्गन्धतः सुरभी भवेत् ॥ तत्सुख्याजायतेसा तु सूतकस्य निबन्धिनी ॥ अशो
का ॥ अशोकानामसक्षीरा विख्याता सा महौषधी ॥ अशोकसदृशैः पत्रैः पुष्पैस्तत्सदृशै
र्लता ॥ नागिनी ॥ तथान्या नागिनीनाम ताराभारोहिणी भवेत् ॥ सर्पाकारा लता सा तु श्ल
क्ष्णपर्णा पयस्विनी ॥ छत्री ॥ छत्री चान्या तु सक्षीरा तत्सुख्या छत्रवद्भवेत् ॥ एकपत्रा सक
न्दा तु दिव्यौषधी महाबला ॥ सम्बरी ॥ सम्बरीनाम चान्या तु तुल्यजातिर्वनोद्भवा ॥ नन्दि
कावर्त्तसदृशा पीतक्षीरा महौषधी ॥ पत्रैः पुष्पैश्च नाम्ना तु त्रैक्षणात्सूतकबन्धिनी ॥ देवी
लता ॥ वलुकीपत्रसदृशा पीतक्षीरा सुकोमला ॥ देवीनाम लता सा तु रसबन्धे महौषधीः ॥

वज्रवल्ली॥ वज्रवल्लीसमाख्यातातनुघ्याक्षीरिणीभवेत्॥स्नुहिपत्रोपमैःपत्रैःक्षणात्सूतक
बन्धिनी॥ चित्रकः॥ तथान्यश्चित्रकःकृष्णःक्षीरंकृष्णीकरोतिच॥कृष्णएवश्रृगोप्राव
शुभोक्षीरसवन्धने॥चित्रकोरक्तकृष्णोचक्षणात्सूतकवन्धकः॥ पलाशवल्ली॥पलाशव
ल्लीनामान्यापीतवर्णामहोत्रधीः॥ पलाशपत्रसाकारैःपत्रैर्मरकतप्रभैः॥कंदेनमुस्तका
काराभिन्नासारजनीप्रभा॥पीतंरसंविमुञ्चेद्धिसूतकस्यनिवन्धिनी॥नाराचा॥ नाराचा
नामविख्यातानिष्पन्नातिस्थतेतुसा॥ ईषद्रूढंप्रसरतिकृष्णपुष्पीमहौषधी॥द्विरत्न
मात्रावृत्ताचरसेवन्धकरीवरा॥ कालकर्णी॥ कालकर्णीतथाचान्यावल्लीसाकुसु

रीतथा॥स्थलजापर्वतोद्भूता सूतकस्य निबन्धिनी॥ नीलोत्पला॥ नीलोत्पलाचविज्ञे
या नीलोत्पलनिभाभवेत॥ जायतेपर्वतेसातुरसबन्धकरीभवेत॥ रजनी॥ रजनीनामतो
ज्ञेया कुमार्यास्तुल्यकन्दका॥ हरिद्रपत्रसक्षीरा सूतकस्यनिबन्धिनी॥ सिंहिका॥ तथा
न्यासिंहिकानाम श्वेतपुष्पा पयस्विनी॥ निदिग्धिकाकृतिःसातुमहौषधीरुदाहृता॥
मेदिनी॥ मेदिनीनाम चान्यातु पीतपर्णासकन्दका॥ कुलत्थपत्रासक्षीरासूतकस्यनि
बन्धिनी॥ तिलका॥ तथान्यातिलकानामलतासातुपयस्विनी॥ तिलपत्रपुष्पसदृशा
सर्वजस्यनिबन्धिनी॥ क्षिप्रा॥ क्षिप्रानामलताज्ञेया क्षिप्रक्षीरप्रवाहिनी॥ वीजपूर

दन्ताकारापुष्पैश्चित्रकसन्निभैः॥ गजदन्ताकृतिःकन्दःसर्वपीतंफलंभवेत्॥भग्नाच्चस्रवतेक्षी
रंपीतवर्णन्तुशोभनम्॥अंगुलीमानमात्रन्तुकीलंतस्याःप्रजायते॥यमुनायास्तटेचैवजायतेसुर
सुन्दरी॥महौषधीसमाख्यातारसबन्धकरीक्षणात्॥नरदेवी॥नरदेवीसमाख्याताक्षतास्त्र
हंविमुंचति॥स्नुहिपत्रोपमैःपत्रैश्चतुर्भिश्चमहौषधी॥पत्राकारंभवेत्पुष्पंज्ञेयासूतकबन्धि
नी॥गोशृंगी॥गोशृंगीनामचान्यातुलतासापितुपुष्पिका॥गोकर्णाकारपत्रन्तुरात्रिसा
त्राविधीयते॥सक्षीरातुशिलोद्भूतापर्वतेजायतेतुसा॥गोशृंगाकारपत्रन्तुसूतकस्यनिबन्धि
नी॥खदिरपत्रिका॥ज्ञेयामहौषधीदिव्यानाम्नाखदिरपत्रिका॥पत्रैर्हरिद्रसंकाशारक्त

पुष्पसुतेजसा॥क्षतारक्तंविमुञ्चेतुसूतकस्यनिबन्धिनी॥ज्वलन्ती॥निशासुप्रज्वलेनित्यंताङ्कि
ज्वलतिपार्वति॥तस्यामूलेचसंक्षिप्तेक्षीरिरक्तंभवेत्क्षणात॥ज्योतिष्मणोज्योतिर्वृक्षोज्योतिकं
न्दश्चतेत्रयः॥ज्वलन्तिपर्वतोद्भूतास्तेसर्वेरसबन्धकाः॥ब्रह्मदण्डीलताख्यातासक्षीरागन्धवत्य
पि॥ईषद्दुन्तिष्ठतेभूमौयष्टिवच्चव्यवस्थिता।एतत्पत्रंकण्टकाकीर्णंरसबन्धकरीभवेत॥त्रिलो
हवेष्टितंमूलंवक्त्रस्थंगोपयेन्नरः॥रक्तवल्ली॥रक्तवल्लीतथाचान्यारक्तपुन्नामहौषधी॥रक्त
स्रवाचरक्ताङ्गीवल्ली चातिविसर्पिणी॥तिंतिणीपत्रसदृशाभवेत्सूतकबन्धिनी॥पद्मदण्डी॥
पद्मदण्डीतिविख्यातापद्मनालाकृतिर्लता॥ईषद्विनिष्ठतेभूमौक्षीरिणीकन्दवत्यपि॥तत्पत्रंकं

टकाकीर्णंशर्वजस्यचवन्धिनी ॥मधुतृण॥ ज्ञेयामधुतृणा चान्याल्पपत्रासितककाकृतिः॥सुषिरै
स्सुसमाकीर्णामधुगन्धामहौषधी॥क्षुद्रामाक्षिकसंकीर्णा सूतकस्यनिवन्धिनी॥हेमदण्डा॥ हेमदण्डा
भवेच्चान्यालतासाक्षीरिणीभवेत्॥पीतक्षीराचपुष्पाचपत्रैर्भिन्नकसन्निभा॥ ताम्बूलवल्ली॥ताम्बू
लवल्लीतत्पत्रारक्तक्षीरार्कपुष्पिका॥रसौषधीमहावीर्यारसवन्धकरीभवेत्॥श्रीजया॥ तथान्या
श्रीजयानामदिव्यौषधीर्महावला॥कलम्बीपत्रसदृशाईश्वदेवलताभवेत्॥रक्तक्षीरामहावीर्या
रसवन्धकरीभवेत्॥विजया॥तथान्याविजयानामईश्वदेवविसर्पिणी॥आढकीपत्रसदृशाशुष्क
क्षीराचसाभवेत्॥महौषधीसमाख्याताखाशुगृह्णातिसूतकं॥जया॥जयानाम्नीतिविख्याताऽ

सोयधिर्महत्वला ॥ त्रिकोणतिक्त कटुकावल्ली चित्रकपत्रवत् ॥ श्रीनाम्नी ॥ देवी श्रीनामतश्चान्या
विख्याता तु महौषधीः ॥ शिखिकण्ठनिभैः पत्रैर्नीलैश्चन्दनगन्धिभिः ॥ रसेन तिक्तं तन्मूलं नवनीतसु
गन्धकम् ॥ सक्षीरारक्तपुष्पा च रसबन्धकरीक्षणात् ॥ तन्मूलं गोपनेख्यातं स्ववर्ल्मनि सुखेगतम् ॥
कीटमारी ॥ कीटमारी तु साख्याता गुल्मादौ समुत्थिता ॥ शिग्रुणासमपत्रा च श्यामक्षीरा तु महौ
षधीः ॥ कीटानिजिघ्रतो हन्याद्रसबंधकरी भवेत् ॥ व्याघ्री ॥ व्याघ्रीनाम महावीर्या नीलपु
ष्पा सकण्टका ॥ वकुपत्रीसमैः पत्रैः सर्वजस्य निबन्धिनी ॥ गारुडी ॥ वल्ली तु गारुडी नाम्ना सक्षी
रा पीतपुष्पिका ॥ बदरीपत्रसदृशैः सूतकस्य निबंधिनी ॥ तुम्बीनी ॥ तथान्या तुम्बिनी नामत

तुष्यातरुगामिनी ॥ तुम्बिनीपत्रसदृशा महावल्लीपयस्विनी ॥ सुरक्तात्वौषधीदिव्याबान्धिनी

सारसस्यतु ॥ द्वितुम्बिनी ॥ द्वितीयतुम्बिनीनामसक्षीराभूमिगर्भगा ॥ तुम्बिनीफलसादृश्या

क्षुद्रासारसबन्धिनी ॥ वरुणलता ॥ तथावरुणलतातुल्याईषदेवलतामृदुः ॥ हलिनीपुष्प

सदृशासक्षीरारसबन्धिनी ॥ हेमलता ॥ अन्याहेमलतानामपीतपुष्पालताभवेत् ॥ मूलका

पत्रसदृशारक्तक्षीरामहौषधीः ॥ आसुरी ॥ आसुरीनामतोज्ञेयातुम्बिनीसमपुष्पिका ॥ पत्रां

गुलीसमापत्रापीतक्षीरामहौषधी ॥ गन्धर्वी ॥ गन्धर्वीनामतोज्ञेयावल्लीसाक्षीरिणीभवेत् ॥

सपुष्कदसमैः पत्रैर्महावीर्यामहौषधी ॥ गोमारी ॥ गोमारीनामविख्यातावल्लीसावेणुपत्रिका ॥

क्षीरिणी रक्तपुष्पा तु महौषधिरुदाहृता ॥ पीतक्षीरा भवेद्दिव्या रसराजस्य बन्धका ॥ व्याघ्रपादलता ॥
व्याघ्रपादलता वल्ली सक्षीरा रक्तपुष्पिका ॥ शिरीषा ॥ शिरीषा नामतः पत्रा लज्जालुक्षीरिणी भवेत् ॥ व
नकुसुम्बरी ॥ वनकुसुम्बरी चान्या क्षीरिणी पीतपुष्पिका ॥ तदाकारा भवेत्सा तु सूतकस्य निबन्धिनी ॥
त्रिशूली ॥ त्रिशूली नामतश्चान्या वल्ली नातिविसर्पिणी ॥ पत्री मूले यमाङ्गा सा व्याधिवातफलोपमा ॥
धत्तूरपत्रसंकाशा जायते सा नगस्थले ॥ सक्षीरा कन्दवती च सूतकस्य निबन्धिनी ॥ त्रिदण्डी ॥
त्रिदण्डी नामतश्चान्या त्रिदण्डा ह्यूर्ध्वगामिनी ॥ त्रिपत्रा रक्तवर्णा च लता सा च महौषधी ॥ शृङ्गा ॥
शृङ्गा शृङ्गसमाकारा पीतपुष्पा पयस्विनी ॥ चमरी ॥ चमरी चमराकारा क्षीरिणी कन्दवत्यपि ॥

रक्तवर्णासिताचैवदिव्यौषधीरुदाहृता ॥ करवीरवल्ला ॥ करवीरवलानामरक्तक्षीरामहौषधी । करवी
रपुष्पातत्पत्रासूतकस्यनिबन्धिनी ॥ वज्रा ॥ वज्रानामसमाख्याताक्षीरिणीकन्दवत्यपि ॥ कोरण्टपत्र
सदृशातत्पुष्पाकटुतिक्तका ॥ महौषधीसमाख्यातारसबन्धकरीभवेत् ॥ पीतमुस्तकिका ॥ पीतमु
स्तकिकानामतत्पत्रापीतदुग्धिका ॥ तदाकारंभवेत्कन्दमौषधीरसबन्धिनी ॥ वीरवल्ली ॥ वीर
वल्लीतथाचान्यारक्तक्षीरामहौषधी ॥ श्रीफलस्थदलाकारारसबन्धकरीभवेत् ॥ गोरोचना ॥
गोरोचनाभवेच्चान्यावल्लीगोरोचनाप्रभा ॥ स्पृष्टारजोविमुञ्चेत्तुपीतंगोरोचनप्रभम् ॥ सक्षीराह्यौष
धीदिव्यारसबन्धकरीभवेत् ॥ रोहिणी ॥ तथान्यारोहिणीनामवल्लीक्षीरविमोचनी ॥ शणपुष्प

पत्रसदृशा महावीर्या महौषधी ॥ विल्वातकी ॥ विल्वातकी भवेच्चान्या ज्योतिष्काकारपत्रिका ॥
सक्षीरा तु महावल्ली रसबन्धकरी भवेत् ॥ शल्या ॥ शल्या नाम समाख्याता पुष्पे श्वेव सकण्टके: ॥
एकपत्रा भवेत्सा तु लता कन्दवती भवेत् ॥ गृह्णाति घृतकं क्षिप्रं मोसधीतु महाबला ॥ विशल्या ॥
विशल्या नामतः ख्याता लता कन्दवती भवेत् ॥ शल्याकारा त्रिपत्रा च जायते पर्वतोपरि ॥ कंद
क्षीरानगोद्भूता शीघ्रं क्षीरा शल्यमोचिनी ॥ सक्षीरा कण्टकैर्हीना स्पर्शनात्फलमोचिनी ॥ दिव्यौष
धी महावीर्या रसबन्धकरी भवेत् ॥ श्वेतकापोति ॥ निष्पत्रा कनकाभा या मूले द्व्यङ्गुलसंमिता ॥
सर्पाकारा लोहितान्ता श्वेतकापोति रुच्यते ॥ कृष्णकापोति ॥ सक्षीरा रोमसा मृद्वी रसेनेक्षुव

सोपमाम् ॥ एवं रूपं रसं चापि कृष्णकापोतिमादिशेत् ॥ छत्र ॥ अतिछत्रा ॥ छत्रातिछत्रके विद्याद्रु
क्षो घ्रे कन्दसंभवे ॥ जरामृत्युनिवारिण्यो श्वेतकापोति संस्थिते ॥ कन्या ॥ कान्ते द्वादशभिः पत्रैर्मयूरा
ङ्ग रूहोपमैः ॥ कन्दजा काञ्चनक्षीरी कन्या नाम महौषधी ॥ करेणुः ॥ करेणुः सुवहुक्षीरा कन्देन गज
रूपिणी ॥ हस्तिकर्णपलाशस्य तुल्यपर्णा न्द्विपर्णिनी ॥ अजा ॥ अजास्तना भकन्दा तु सक्षीरा क्षु
परूपिणी ॥ अजा महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा ॥ चक्रिका ॥ श्वेता विचित्रकुसुमां काका
दन्यां समां क्षुपाम् ॥ चक्रिका मौषधिर्विद्या ज्जरामृत्युनिवारिणीम् ॥ आदित्यपर्णिनी ॥ मूलिनी
पञ्चभिः पत्रैः सुरक्तांशुककोमलैः ॥ आदित्यपर्णिनी ज्ञेया सदादित्यानुगामिनी ॥ आदित्यपर्णिनी

ज्ञेयातथैवचह्रिमक्षये॥ब्रह्मसुवर्च्चला॥कनकाभाजलान्तेषु सर्वतःपरिसर्पति॥ सक्षीरापद्मिनी
प्रख्यादेवीब्रह्मसुवर्च्चला॥ श्रावणी॥महाश्रावणी॥अरत्निमात्रक्षुपकापत्रैर्द्व्यंगुलसं
मितैः॥पुष्पैर्नीलोत्पलाकारैःफलैश्चाञ्जनसन्निभैः॥श्रावणीमहतीज्ञेयाकनकाभापयस्वि
नी॥श्रावणीपाण्डुराभासामहाश्रावणिलक्षणा॥वेगवती॥हंसपादिचविच्छिन्नैःपत्रैर्मूलसमु
द्भवैः॥अथवाशंखपुष्पीचसमानासर्वरूपतः॥वेगेनमहताविष्णुसर्पनिर्मोकसन्निभा॥एषा
वेगवतीनामजायतेहाम्बुदअये॥मलयेनलसेतौचवेगवत्योषधीस्मृता॥गोलोमी॥अज
लोमी॥गोलोमीचाजलोमीचरोमसेकन्दसंभवे॥वालेय॥एरण्डःसदृशैःपत्रैःफलैश्चैव

तुनाद्दशैः ॥ सञ्जीविनी ॥ पीतकान्तितुपत्राणि फलानि हारितानि वै ॥ ओषध्याश्च लता दिव्या रक्त
चन्दनसन्निभा ॥ रक्तानि चैवपुष्पाणि जाम्बूनदमयानि वैः ॥ वटपत्री ॥ लता हरितवर्णाभा अ
तिसूक्ष्मा पयोन्विता ॥ षटपत्र समं पत्रं पुष्पं स्याद्रक्तसन्निभं ॥ वनसूरणा ॥ वनसूरणमानी
य छूरिकातत्र निःक्षिपेत ॥ छुरिका जायते रक्तात क्षणाच्च न संशयः ॥ छिक्कनी ॥ रूपं गृञ्ज
नवज्ज्ञेयं फलयुक्तं सपुष्पकम् ॥ यस्यादर्शनमात्रेण ब्रह्माण्ड स्फोटनं भवेत ॥ छिक्काप्रवाहे
विप्रेन्द्र दर्शनाज्जायते ध्रुवम् ॥ वोगरी ॥ शर्करा कन्दवत्पत्रं पुष्पं कार्पाससन्निभम् ॥ लम्बा
यमानं तत्पुष्पं फलं चालौकिकं मतम् ॥ शारवांप्रतोऽज्य विप्रेन्द्र पुनः शारवांप्रदापयेत ॥ पुन

र्वृक्षोभवेच्चैवचिह्नं दृश्यात तदीदृशम् ॥शिद्धवल्ली ॥करवीरसमाकारापत्रैश्चैवतुतादृशा॥अ
न्तास्तिक्तमहानीरापरिणामेकटुर्मता ॥ह्रस्वपत्राद्विजश्रेष्ठफलपुष्पविवर्जिता ॥एकवीरवृ
तंप्राप्नालोकवीरेतिविश्रुता ॥ज्योतिष्मती ॥ज्योतिष्मतीनामलतायावल्का श्चनसन्निभा॥
वल्लीवितानबहुलाहेमवर्णाफलाशुभा ॥दग्धरुहा॥सद्यश्छिन्नामहादेवीदग्धासापावकेन
तु॥प्ररोहतिक्षणाद्दिव्यादग्धासातुमहौषधी ॥रक्तंपीतंसितंकृष्णंतस्याःपुष्पंप्रजायते॥चण
कस्येवपत्राणिसुप्रभूतानिलक्षयेत ॥साहास्तिगौतमीतीरेगंगायामर्बुदेगिरौ ॥उज्जयिन्यादक्षि
णतोवनान्येषुचदृश्यते॥स्वर्णफलिनी ॥खर्जूरवत्तुपत्राणिफलंखर्जूरवद्भवेत ॥दुःस्पर्शा

साच विजयामहाद्रवगदामता ॥ सदाफलविप्रर्षेचतुर्वर्णापिसामता ॥ दुःस्पर्शा ॥ दुःस्पर्शेति
सुविख्यातास्पर्शास्फोटकरीमता ॥ अरण्येसाचविप्रेन्द्रसदाजागर्तिसिद्धिदा ॥ नस्पृशेज्जी
वमात्रोहितांदुःस्पर्शांद्विजोत्तम ॥ यदिस्पृशावैजीवस्तादास्फोटंसमादिशेत् ॥ अम्लवेतस ॥
अम्लवेतसनामातुविटपस्तुसमुद्भवः ॥ पत्रैःस्निग्धैर्वनैश्चैवश्लक्ष्णैरग्रैश्चतीक्ष्णकैः ॥ फलंत
स्यैवहेमन्तेप्रवृत्तानिफलानितु ॥ करीरसंस्थाविज्ञेयापीलुकाकारसंयुता ॥ पीतास्तुमृद
पोज्ञेयाअत्यम्लास्वादतोभवेत् ॥ तैलकंद ॥ कन्दःकमलवज्ज्ञेयःपत्राणिकन्दवच्छिशोः ॥ तथै
वतुमत्यत्रोतैलंस्रवतिसर्वदा ॥ तैलस्रावीमहाकन्दःपरितोतैलवज्जलम् । दशहस्तमितेदेव

द्दश्यते परितो भुवि ॥ तत्परिक्षां विधायादौ कन्दे सूचीं प्रवेशयेत् ॥ सूचीद्रावः क्षणात्पुत्र तत्कंदं नु स
माहरेत ॥ क्षीरकन्दः ॥ चतुर्वर्णं विधं तत्र रक्तगन्धं प्रसस्यते ॥ भग्नमेतत्स्रवेत्क्षीरं रक्तवर्णं नु शोभनं ॥
मेघानां नु निनादेव जायते रूपशोभितम् ॥ पत्रैः स्नुहिसमस्निग्धासप्तभिर्हेमसुप्रभैः ॥ वन्धनं रसरा
जस्य सर्वसत्व वशं करं ॥ शतसंख्या समाख्याता ह्येवं वध्यः सुरपूजिताः ॥ महावीर्या महापुण्या
सर्वकामप्रदायका ॥ सर्वविघ्नहरा ख्याता तथा शल्यहरा मता ॥ वन्ध्यानां पुत्रदा ख्याताः शस्त्रा
णां चैव रक्षिकाः ॥ मध्वाज्यसहिता पीता वज्रदेहत्वकारका ॥ क्षरेच्च वनिता लेपात्पीता ध्वजस
मुच्छ्रयाम् ॥ मुखस्थावारयेच्छुक्रं लेपात्कुष्टविनाशिनी ॥ अमृता पमा महौषध्यो लवमात्रा तु

सिद्धिदा ॥ एषां वीर्यमचिन्त्यं तु तपसः पुण्यसंचयात ॥ प्राप्तिर्भवति तेषां तु दुष्प्राप्या तपवर्जि
तैः ॥ प्राप्नुवन्ति महापुण्या शिवाराधनतत्परा ॥ गृहीतव्यास्तु सौषध्यः शक्तिबीजैः पृथक्पृथक् ॥
यथाक्रमेण शक्तीनां फलाओ ओषधि रूपतः ॥ संस्थिता क्रमशो ज्ञेया गृहीया हि क्रमान्ततः ॥ अष्ट
म्यां वा चतुर्दश्यां पौर्णिमस्यां तथैव च ॥ सोमार्कोपरागे वा याम्यापुष्ये हस्ते च गृह्यते ॥ व्यतिपाते गृ
हीतव्याः पूजयित्वा च मंत्रिताः ॥ गृहीत्वा कारयेत्कर्म सौषधीनां विशेषतः ॥ महौषधिं पेषयित्वा
मध्वाज्येन लिहेद्बुधः ॥ मासद्वये सिद्धस्तु महाबलपराक्रमः ॥ महाकल्पायुषो वीरः सुरासुरनम
स्कृतः ॥ सर्वलक्षणतः ख्याताः कर्मतश्च महोदयात ॥ तेषां क्षेत्रं तु विज्ञेयं गिरिकन्दरगह्वरे ॥ पर्व

पर्वतानांचशिखरेद्वीपेचैवोदधौस्थितिः॥ स्वयंभूतेषुलिंगेषु पर्वतेषुभवन्तिताः॥तुहिनशि
खरेचैवप्रभूतातृणवच्चताः॥ नदीषुशैलेषुसरस्सुचापिपुण्येचरण्येषुतथाश्रमेषु॥सर्व
त्रसर्वापरिमार्गितव्याः सर्वत्रभूमौहिवसूनिधन्ते॥ १६२॥ ॥इतिश्रीगोरक्षसंहितायां
तदिव्यौषधीलक्षणादिकंशुभम्॥ ॥वत्सनाभः॥ सिन्दुवारसदृक्पत्रोवत्सनाभोकृति
स्तथा॥ यत्पार्श्वेनतरोर्वृद्धिर्वत्सनाभः सभाषितः॥ हारिद्र॥ हारिद्रातुल्यमूलोयोहारिद्रःस
उदाहृतः॥प्रदीपनः॥ प्रदीपलोहितोयस्या दीप्तिमान्दहनप्रभः॥ महादाहकरीपूर्वैः कथितः
सप्रदीपनः॥ सौराष्ट्रिकः॥ सुराष्ट्रविषयेयःस्यात्ससौराष्ट्रिकउच्यते॥ शृंगी॥ यस्मिन्गो

शृंगके वत्सदुग्धं भवति लोहितम्॥ सशृंगक इति प्रोक्तो द्रव्यतत्वविशारदैः॥ कालकूटः॥ दे
वासुरगणैर्देवैर्हतस्य पृथुमालिनः॥ दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः॥ निर्यासः कालकू
टोस्य मुनिभिः परिकीर्तितः॥ सोहिच्छत्रे शृंगवेरे कोंकणे मलये भवेत्॥ हालाहलः॥ गोस्तना
भफलो गुच्छस्तालपत्रच्छदस्तथा॥ तेजसा यस्य दह्यन्ते समीपस्था द्रुमाश्रयः॥ असौ हाला
हलो ज्ञेयः किष्किन्धायां हिमालये॥ दक्षिणाब्धितटे देशे कोंकणेपि च दृश्यते॥ ब्रह्मपुत्रः॥ व
र्णतः कपिलो यः स्यात्तथा भवति सारकः॥ ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले॥ सक्तुकः॥
नीलोत्पलनिभः कन्दो वाह्यतः कपिलो भवेत्॥ विस्फोटैः श्वितसर्वत्र मज्ज्ञे भिन्नाञ्जनः प्र

भम्॥ कुसुंभसदृशंपत्रंसम भूमिस्तुतिष्ठति॥ विद्यमानि चतान्येव पुष्पमासुरीसन्निभम्॥ त
च्चनीलंभवेत्सर्वंपरिक्षांशृण्वतः परम्॥ तस्यकन्दन्तुसंघृह्यत्वधोभागेतुखण्डयेत॥ अंगु
ल्यग्रैर्हुतंतन्तुक्षरतेसत्तुचयदा॥ सत्तुकंतंविजानीयाद्विषंपरमदारुणं॥ गोक्षीरेविन्दु
मात्रन्तुतालवन्तुसुवर्षितम्॥ निःक्षेपेत्सत्तुकंतत्रशिखिकंठनिभंभवेत्॥ तदातत्रविजा
नीयात्सत्तुकंनात्रसंशयः॥ शाकवृक्षः॥ करीरसदृशैःपत्रैर्गात्रैश्चैवतुतादृशैः॥ एकमूल
पयस्वीचरसतिक्ताउदीरिताः॥१॥ जायतेजङ्गलेदेशेअर्वुदेवाविशेषतः॥ भवतिमह्यपृष्टेच
मलयेचविशेषतः॥२॥ महाहेतिस्वतेसातुविन्ध्यपृष्टेतथैवच॥ अथमूलिकाग्रहणविधिः॥

अभिमंत्रणं ॥ॐ वेतालाश्चपिशाचाश्च राक्षसाश्चसरीसृपाः ॥ अपसर्पन्तुतेसर्वेवृक्षाद
स्माच्छिवाज्ञया ॥ सूत्रेणवन्धनम् ॥ॐ येनराजावलिर्वद्धः स्त्रिविष्टपोयोमहावलः ॥ तेनवध्ना
म्यधर्मेवतिष्ठस्वमाचलस्वाहा ॥ तिलाक्षताविकिरणम् ॥ ॐ श्वेतपुष्पमहानीलेशुभेच
न्दनगान्धिनी ॥ त्वामोषधींप्रपद्येहं त्राहिमांमहतोभयात ॥ माउत्पतमणिं धत्तेतेजोवृद्धिव्य
तिक्रमे ॥ अत्रैवतिष्ठकल्याणिममकार्यकरीभव ॥ ममकार्येकृतेपश्चात्स्वर्गलोकंगमिष्य
ति ॥ राक्षसानांपिशाचानां गुह्यकानांमहौजसाम् ॥ तेषांव ध्नातिचक्षूंसियेचान्येपारिपन्
थिनः ॥ॐ काण्डेमुरुचुरुमालिनीसज्ञे चण्डिकेजगदावर्त्तिनीस्तंभिनीमोहिनीनमोस्तु

ते स्वाहा ॥ ॐ वीरजये स्वाहा ॥ ॐ महेन्द्र राम कृष्णानां ब्राह्मणानां गवामपि ॥ तपसा तेजसा
चैव प्रशाम्य ध्वं शिवाय वै ॥ नमस्कारः ॥ ॐ नमस्तेऽमृतं संभू वलवीर्य विवर्द्धिनी ॥ वल
मायुश्च मे देहि पापान्मे त्राहि दूरतः ॥ खननम् ॥ ॐ येन त्वां खनते ब्रह्मा येन त्वां खनते भृगुः ॥
येन हीन्द्रो थ वरुणो येन त्वामपचक्रमे ॥ तेनाहं खनयिष्यामि मंत्रपूतेन पाणिना ॥ मा पाते मा
निपतिते मा ते तेजोन्यथा भवेत् ॥ उत्पाटनम् ॥ ॐ ह्रीं चण्डे हुं फट् स्वाहा ॥ ॐ सर्व सिद्धि साधनी
य स्वाहा ॥ ॐ हूं २ यं २ सर्व सिद्धि साधनीय स्वाहा ॥ ॐ ह्रीं क्षौं फट् स्वाहा ॥ इति मूलिकां छे
दयेत् ॥ इति श्रीमूलिका ग्रहण विधिः समाप्तम् ॥ ॥ अथ कल्पलता प्रारभ्यते ॥ तत्रादौ ज्ञे

तिष्मतीकल्पः॥ कैलासशिखरासीनंदेवदेवंमहेश्वरम्॥ प्रणम्यपरयाभक्त्यादेविवि
चनमब्रवीत॥१॥ भगवन्मानवाःसर्वेघोरैःक्लिश्यन्तिदुष्कृतैः॥ येनोपायेनदेवेशसर्वे
तुष्यन्तिमानवाः॥२॥ येनसिद्धिर्भवेज्जनोयेनयान्तिपरांगतिम्॥ इतिपृष्टस्तदादेवो
विमलार्थमथाब्रवीत॥३॥ शृणुदेविमहाभागेलोकेविस्मयकारणम्॥ ज्योतिष्मती
सुविख्यातंरसायनमनुत्तमम्॥४॥ ज्योतिष्मतीनामलतायावत्काञ्चनसन्निभाः॥
वल्लीवितानबहुलाहेमवर्णाफलाशुभाः॥५॥ तत्पर्यायः॥ पारावताङ्घ्रिः॥ कटभी॥ पिण्या॥
नगणा॥ स्फुरवन्धिनी॥ पूतितैला॥ इङ्गुदी॥ स्वर्णलता॥ अनलप्रभा॥ ज्योतिर्लता॥ सु

पिङ्गला ॥ दीप्ता ॥ मध्या ॥ मतिदा ॥ दुर्जरा ॥ सरस्वती ॥ अमृता ॥ अस्या ॥ सूक्ष्मायागुणाः
अतितिक्तत्वं ॥ किञ्चित्कटुकं ॥ वातकफापहत्वंच ॥ अस्याः स्थूलायागुणाः ॥ दाहप्र
दत्वं ॥ दीपनत्वं ॥ मेधाप्रज्ञा वृद्धिकारित्वं ॥ व्रणविस्फोटनाशित्वञ्च ॥ सुतिथौशुभ
नक्षत्रेशुभयोगेशुभेदिने ॥ वेष्टयेद्रक्तसूत्रेण पूजयेद्विधिपूर्वकम् ॥ ६ ॥ पाद्यमर्घ्यंततोद
द्यादक्षतण्डुलसंयुतम् ॥ रक्तचन्दनकुसुमैः पूजयेदिष्टदेवताम् ॥ ७ ॥ इष्टदेवस्यमंत्रे
ण तत्तन्मंत्रेणवापुनः ॥ कुर्यादर्घ्यादिकां पूजां नैवेद्यंचयथाविधिः ॥ ८ ॥ उत्तराभिमुखो
भूत्वासाधकः सुसमाहितः ॥ सगंधंकुसुमैर्युक्तं कुंकुमेनविलेपयेत् ॥ ९ ॥ ताम्बूलंभक्षये

स्नाग्नः सन्तुष्टेनै क्वेतसा ॥ यथोपस्करसंयुक्तां पूजयित्वा महौषधीम् ॥ १० ॥ बीजानि तस्याः
संग्रह्य शोषयेत्तस्य गातपे ॥ चूर्णयित्वा ततस्तानि तेषां तैलं समुद्धरेत् ॥ ११ ॥ ततस्तैलं समं
क्षीरं मधुपादेन संयुतम् ॥ पचेन्मृद्वग्निना पात्रे तैलशेषन्तु कारयेत् ॥ १२ ॥ जातीफलै श्च संयु
क्तमङ्कोलकुष्टमेव च ॥ एतानि समभागानि चूर्णं कृत्वा विचक्षणः ॥ १३ ॥ कर्षमेकन्तु तच्चू
र्णं तैलमध्ये सुरेश्वरि ॥ प्रक्षिप्यालोड्य तत्तैलं स्निग्धभाण्डे विनिक्षिपेत् ॥ १४ ॥ अच्छिद्र
मुद्रितं कृत्वा तद्भाण्डं सुदृढं नरः ॥ धान्यराशौ विनिःक्षिप्य दिनानामेकविंशतिः ॥ १५ ॥ त्रिंश
तिर्वा शतं वाथः सप्ततिर्नवतिर्हि वा ॥ अधिकं वा यथायोग्यं तत श्चैवोद्धृतं नरः ॥ १६ ॥ सुतिथौ

शुक्लकायस्तु निर्वात निलये स्थितः ॥ सुमुहूर्त्ते शुभे तारे शुभे चन्द्रे सुतारके ॥ १७ ॥ कृताह्निकः शु
चिर्भूत्वा तैलं सूर्योदये पिबेत् ॥ ततो निःसंज्ञतां गच्छेत्तु व्यसज्ञः शनैः शनैः ॥ १८ ॥ परिश्रान्ताय
च क्षीरं दद्यान्मधुरसंयुतम् ॥ पीत्वा क्षीरं ततः स्वस्थः शनैर्भवति साधकः ॥ १९ ॥ जीर्णे तैलं ततः प
श्चाद्भोजयेत्षाष्ठिकोदनम् ॥ एवं क्षीरेण भुञ्जीत प्रत्यहं नियतात्मनः ॥ २० ॥ स भवेत्सूर्यसंकाशो
वपुषादित्यतेजसा ॥ अश्रुतान्यपि शास्त्राणि सङ्केतेन तथोद्धरेत् ॥ २१ ॥ खगेन्द्रसदृशं चक्षु
र्दिवा पश्यति तारकाः ॥ मध्याह्ने सूर्यमार्गस्थं पश्यते स शिवं शिवं ॥ २२ ॥ दूरेपि शृणुते शब्दं वि
षं जीर्यति नित्यशः ॥ हन्त्यष्टादश कुष्ठानि सर्वरोगान्निहन्त्यपि च ॥ २३ ॥ येकमासप्रयोगस्य फ

त्वमुक्तं सुरेश्वरि ॥ द्वितीयादिषु मासेषु फलानि गदितं शृणु ॥ २४ ॥ द्वितीयं सेवते यस्तु मासं शुद्धो
यथाविधिः ॥ दिवा वा यदि वा रात्रौ त्रिसन्ध्यं भ्रमते महीम् ॥ २५ ॥ यक्षरक्षगणैः सर्वैः समानो जायते
नरः ॥ ये केपि व्याधयः सर्वे कीर्त्तिता पापकर्मभिः ॥ २६ ॥ सर्वे च सेवयात्तस्य प्रयान्ति परमां गतिम् ॥
तृतीयस्य च मासस्य शृणु देवि यथाफलम् ॥ २७ ॥ देवा यक्षाः किन्नराश्च नागाश्चैव महोरगाः ॥
यान्ति तस्यैव सद्भावं कुर्वन्ति तत्क्रियां सदा ॥ २८ ॥ पुटं ताम्रमयं कृत्वा पुटस्याभ्यन्तरे तथा ॥ सू
त्रेण पूरयित्वा तु भूमौ खात्वा निधापयेत् ॥ २९ ॥ मासान्ते तत्समुद्धृत्य पुटं काञ्चनतां भवेत् ॥ चतु
र्थस्य च मासस्य शृणु देवि यथाफलम् ॥ ३० ॥ औषधं सेवते यस्तु पथ्यभोजनसंयुतम् ॥ सिद्ध 17

सायुज्यतामेति न च दृश्यश्च मानवैः ॥ ३१ ॥ पुण्यश्लोकस्फुरन्मूर्त्तिः सर्वैश्वर्यसमन्वितः ॥ जीवेद
मरलोकेषु दिनानि ब्रह्मणो दश ॥ ३२ ॥ तस्य मूत्रमलैः स्वेदैस्तथैवोद्वर्त्तनेन च ॥ शुल्वं लेपंत
तः कृत्वा दग्धं भवति काञ्चनं ॥ ३३ ॥ पञ्चमासप्रयोगस्य शृणु वीर्यं महौषधेः ॥ ब्रह्मत्वं प्राप्य
सः श्रीमान्दिवि देवेषु राजते ॥ ३४ ॥ षण्मासं कुर्वतस्तस्य शृणु सिद्धिं सुरेश्वरि ॥ क्रीडते समहासि
द्धैर्लक्ष्मीवानमरद्युतिः ॥ ३५ ॥ शिवतुल्यो महावीर्यो विचरेत्सरितो जगत ॥ सेवेत सप्तमासं तु यो दे
वि नियतः सदा ॥ ३६ ॥ जितेन्द्रियो जितक्रोधो भूतानां च हिते रतः ॥ विष्णोर्दिनानि यावन्ति ताव
ज्जीवेत्स साधकः ॥ ३७ ॥ धर्माऽधर्मैर्न लिप्येत विधिवत्साधकोत्तमः ॥ विचरेच्च महावीर्यो वि

खगतुल्यो न संशयः ॥ ३८ ॥ अष्टमासप्रयोगेण शृणु देवि यथा फलम् ॥ दिव्यकर्मा महाते
जा दिव्यरूपधरो भवेत् ॥ ३९ ॥ निर्माणं परमाप्नोति ज्योतिष्मत्याः प्रभावतः ॥ नवमासप्रयोगे
ण शृणु देवि यथाफलं ॥ ४० ॥ कामरूपी महावीरश्चिन्तामणिरिवोत्तमः ॥ यद्यत्प्रतीक्षते रूपं
तत्तद्रूपं प्रपद्यते ॥ ४१ ॥ इन्द्ररूपं वायुरूपं चन्द्ररूपं करोति सः ॥ ब्रह्मरूपं रुद्ररूपं विष्णुरूपं क
रोति सः ॥ ४२ ॥ यद्यद्रोचयते रूपं तत्तत्कर्तुं प्रभुर्भवेत् ॥ उमापतिसमो भूत्वा जीवेद्ब्रह्मायुषं सु
खी ॥ ४३ ॥ ४३ ॥ दशमासप्रयोगेण शृणु तस्य च लक्षणम् ॥ लभते पूर्वपूर्वोक्तं किंचिद्देवाधिको
भवेत् ॥ ४४ ॥ बलं दशगुणं तस्य त्वसाध्यं देवदानवैः ॥ अनन्तगुणसंपन्नो महाबलपराक्रमः ॥

४५॥अदृश्यसर्वलोकानांमच्चिन्त्योयोगिनांसदा॥स्वेच्छयाकुरुतेसर्वेत्रैलोक्यंसचराचरं॥
४६॥स्थूलसूक्ष्मप्रकर्त्ताचकर्त्ताहर्त्तानसंशयः॥सर्वज्ञत्वंभवेत्तस्यनचवह्निर्दहेच्चतम्॥४७॥
वज्रोदकेनशस्त्रेणगदामुद्गरशक्तिभिः॥नमंत्रेणगुरुःशापैःसाधकस्तुनबाध्यते॥४८॥नकलिः
क्रमतेतस्यचिन्तामणिसमोभवेत्॥सदाशिवस्स्वयंभूत्वास्वेच्छाचारीभवानगः॥४९॥सर्वासा
मौषधीनांरसायनमनुत्तमम्॥दुर्लभंत्रिषुलोकेषुसत्यंसत्यंपुनःपुनः॥५०॥रसायनमिदं
प्रोक्तंतवस्नेहाद्वरानने॥गोपनीयंप्रयत्नेनस्वयोनिरिवपार्वति॥५१॥नैतत्कर्मप्रकुर्वन्तिमोह
नापहतानराः॥विघ्नेनोपहताःकिञ्चिन्नास्तिकाअल्पबुद्धयः॥५२॥क्रियाज्ञानतपाकेचित्केचि

न्मरणशंकया॥अभक्तायनदातव्यंह्यविनीतायसुव्रते॥५३॥ब्रह्मकर्मरतायैववेदकर्मरताय
च॥दातव्यंपरमेशानिज्योतिष्मतिविधानकम्॥५४॥सर्वाण्येतानिसिध्यन्तिसाधकस्यदृढव्र
ते॥सर्वसिद्धिमवाप्नोतिज्योतिष्मत्याप्रभावतः॥५५॥तस्यास्तैलंसमादायकुंभेताम्रमयेक्षिपेत्॥स्था
प्ययेद्भूगतंकुंभंक्रमादूर्ध्वंतुसाग्निना॥५६॥षण्मासेतुव्यतिक्रान्तेसघटःकाञ्चनंभवेत्॥ताम्रंहेम
समंकृत्वातैलंमाक्षिकमिश्रितम्॥५७॥प्रतितापेनसिंच्येतहेमताम्रसमंभवेत्॥तदेवशतवेधी
स्यान्नात्रकार्याविचारणा॥५८॥इतिज्योतिष्मतिकल्पःसमाप्तः॥ ॥अथपुनर्नवाकल्पः॥
पुनर्नवासाकविशेषः॥तत्पर्यायोरक्तायाः॥शोथघ्नी।वर्षाभू।प्रावृषा।षणी।श्वेतायाः १९

वृश्चिरा। चिपिटिका। शिखारव। शशिवाटिका। पृथ्वी। शितवर्षाभूः। घनपत्रः। कठिल्लक।
अस्यागुणाः। उष्णत्वं। तिक्तत्वं। कफकासहृद्रोगशूलपाण्डुशोफानिलनाशित्वं। भेदक
त्वं। रसायनत्वं। आमदुर्नामव्रध्नोदरनाशित्वंच॥ पुनर्नवाश्वेतमूलाशोथघ्नीदीर्घपत्रिका॥
कटुः कसायारुच्यर्शः पाण्डुहृद्दीपिनीपरा॥ १॥ शोफानिलगरश्लेष्महारी व्रध्नोदरप्रणुत्॥
पुनर्नवापरारक्ताक्तपुष्पानिरादिका॥ २॥ शोथघ्नीक्षुद्रवर्षाभूर्वर्षकेतुकठिल्लकः॥ पु
नर्नवारुणातिक्ताकटुशाकाहृदालघु॥ ३॥ वातलाग्राहिणीश्लेष्मपित्तरक्तविनाशिनी॥
दिव्यंपुनर्नवाकल्पंशृणुवक्षामिशांभवी॥ ४॥ पुनर्नवास्याद्विविधालोहिताधवलातथा॥

रसेरसायने श्वेता रोगे रक्ता प्रशस्यते ॥ ५ ॥ पुष्यार्के श्वेतशोथघ्नामूलमादाय मुन्दरी ॥ छायायां
शोषयित्वा तु चूर्णीकृत्य प्रयत्नतः ॥ ६ ॥ पलार्द्धं च गवां क्षीरं पलं चूर्णं पिबेत्सुधीः ॥ युवा भ
वति वृद्धोपि जीवेच्च शरदां शतम् ॥ ७ ॥ पुष्पितं पक्वमादाय पञ्चाङ्गं च पुनर्नवा ॥ खण्डितं ना
गरं क्वाथ स्विन्नं क्षीरपेषितम् ॥ ८ ॥ पिबेद्दिवा च जीर्णान्ते क्षीरान्नाशी घृतेन च ॥ षण्मासा
त्सोयमायाति कामदेवो हि योषिताम् ॥ ९ ॥ जित्वा च सकलान्भोगाञ्जीवेद्बहुदिनं नरः ॥ पुनर्न
वायां शुभ्रायाः मूलं गोघृतमिश्रितम् ॥ १० ॥ अञ्जनात् हरते क्षिप्रं नेत्रान्तरगतं रुजम् ॥ रक्तार्शो
संप्रभुञ्जीत पक्ष्मरोधे निशांभसा ॥ ११ ॥ घृतेन पुष्पं मधुनाश्रुपातं तैलेन कण्डुं तिमिरञ्जनेन ॥

एरण्डं धवो यसरुकाश्विकेन पुनर्नवानेत्रनवंकरोति ॥१२॥ छायाशुरुकं चतच्चूर्णं समूलफल
पल्लवम् ॥ सिन्धुत्थगोघृतेनोक्तं गुल्मपीहविनाशनम् ॥१३॥ तच्चूर्णं सितयासार्द्धं यदाक्षीरे
णसंपिवेत् ॥ प्रभातकाले सततं स जीवेच्छरदां शतम् ॥१४॥ तच्चूर्णं ज्योतिः संयुक्तं कायानिल
विवर्द्धनम् ॥ तज्जयवारिणापिष्टा नेत्रगाजीर्णनाशिनी ॥१५॥ शिफामधुः समायुक्ता सेविताच्छ
रांजयेत् ॥ पुनर्नवा शिफाचूर्णं पलार्द्धं पयसासह ॥१६॥ मासिकं मासयुग्मं वा पीते जीर्णे तु भाज
नम् ॥ क्षीरान्नेन विनश्यन्ति शिरोरोग ज्वरादयः ॥१७॥ पुष्यार्कदिवसे सौम्य प्रातः श्वेतपुनर्नवाम् ॥
समूलपत्रां संगृह्य श्लक्ष्णा चूर्णां कारयेत् ॥१८॥ मर्दयित्वा पुनः पश्चा द्घृतेन मधुनासह ॥ भाण्डच

स्थापयेद्यत्नाद्यथारक्षाकरन्तथा॥१९॥ ततोमासान्तरेदेवि चम्पककुसुमान्वितम्॥ व
सन्तसमये चैव शुचिर्भूत्वासमाहितः॥२०॥ मासमात्रं भक्षयेणेन मलमूत्रंसुगंधिकम्॥ दि
व्यदेहधरः श्रीमान्कामदेवइवापरः॥२१॥ बृहस्पतिसमोवाग्मीजीवेत्पंचशताब्दिकम्॥
स्थिरवायुर्भवेद्देहेसेवनात्कल्पमुत्तमम्॥२२॥ तालंपुनर्नवाक्षीरंशोधितंसुधयान्नरः॥ पाच
येद्द्वियामेसु मन्दमध्यखराग्निना॥२३॥ तत्तालंस्त्रीयतेचित्रंपूर्णेन्दुसदृशंप्रभम्॥ सेवये
द्रक्तिकामात्रंवातातपविवर्जितम्॥२४॥ षण्मासस्यप्रयोगेणखेचरोजायतेनरः॥ कुष्ठानि
तेननश्यन्तिमण्डलानिनसंशयः॥२५॥ रसेपुनर्नवायाश्चपारदंमर्दयेत्सुधीः॥ तच्चसूरणम

ध्येचदद्यात्सप्तपुटानिच ॥ २६ ॥ गुटिकाजायतेनूनंवीर्यस्तंभकरीशुभा ॥ कल्पंपुनर्नवाया
श्चकथितंभुविदुर्लभम् ॥ २७ ॥ इतिपुनर्नवाकल्पः समाप्तः ॥ ॥ अथपलाशकल्पः ॥
पलाशकल्पंवक्ष्यामिमनुष्याणांहितायच ॥ यत्कल्पेचकृतेदेवि कर्तव्यंचनविद्यते ॥ १ ॥
पलाशः किंशुकः पर्णोयाज्ञिकोरक्तपुष्पकः ॥ क्षारश्रेष्ठोवातपोथोब्रह्मवृक्षसमिद्वरः ॥ २ ॥
पलाशोदीपनोवृष्यः सरोक्षोव्रणगुल्मजित ॥ भग्नसंधानकृद्दोषः ग्रहण्यर्शकृमीन् हरेत ॥ ३ ॥
तत्पुष्पंस्वादुपाकेतुः कटुतिक्तं कषायकम् ॥ वातलंकृमिपित्तास्त्रकृच्छ्रजितग्राहिशीतलं
४ ॥ तद्दाहसमनंवातरक्तकुष्टहरंपरं ॥ फलंलघुंचमेहार्शः क्रिमिवातकफापहम् ॥ ५ ॥ विपा

केकटुकेकंहस्तंकुस्थगुल्मोदराःप्रणुत॥रक्तःपीतःसितोनीलकुसुमेस्तुचतुर्विधम्॥६॥ब्रह्मवृ
क्षस्यबीजानिविंशुसीकृत्त्वबुद्धिमान्॥अथधात्रीरसेनैवह्यजाक्षीरेणभावयेत॥७॥सप्ताहं
शोषयित्वातुयोजयित्वाविचक्षणा॥बीजंयंत्रेततःक्षिप्त्वातैलंसंग्रह्ययत्नतः॥८॥तत्तैलंपल
मात्रंतुपाययित्वाविचक्षणा॥तस्यकर्मप्रवक्ष्यामिमनुष्याणांहितायच॥९॥एकमासप्रयोगेण
क्षीराहारःप्रयत्नवान्॥द्विगुणःपरिहारोसौसतैलगुणवर्जितः॥१०॥श्रुतित्वंधारयेद्धीरस्थवर्णपुरा
कृतिः॥सुभगोदर्शनीयस्तुनवनागवलोपमः॥११॥सुवर्णवर्णसदृशःकर्णिकारःसमद्युतिः॥ष
ण्मासस्यप्रयोगेणजीवेद्वर्षसहस्रकम्॥१२॥प्रथमंतेसमाख्यातंद्वितीयंशृणुपुत्रकः॥अहं २२

सम्यक्प्रवक्ष्यामितवस्नेहेनपार्वती॥१३॥तैलस्यपलमात्रन्तुमधुनासहयःपिबेत्॥इतिहास
पुराणानांश्रोतावक्ताचजायते॥१४॥निधानमद्भुतंपश्येद्भूमेराकाशगामिनी॥मेधावीनांसुपु
त्राणांसहस्रंलभतेनरः॥१५॥यांयांकामयतेनारींसाभवेन्नवयौवना॥तस्यमूत्रपुरीषाभ्यां
लोहंभवतिकाञ्चनम्॥१६॥वर्षाणित्रीणिदेवापिषण्मासमथवापिच॥अथवावर्षमेकन्तु
ब्रह्मतैलंभवेन्नरः॥१७॥देहेहेमप्रजायेतस्वयंचैवाक्षयोभवेत्॥द्वितीयंकथितंदेवितृतीयं
शृणुपार्वती॥१८॥तैलाज्यमधुसंगृह्यमध्वाज्यसहितंपिबेत्॥तस्यपीतस्यतुफलंवक्ष्यामी
शृणुतत्त्वतः॥१९॥सम्वत्सरप्रयोगेणत्विदंभवतिलक्षणम्॥अग्निनानोदकेनापितस्य

त्पुर्नजायते ॥ २० ॥ इतिहासपुराणानां श्रोता श्रुतिधरो भवेत् ॥ तस्य मूत्रपुरीषेण शुल्वं भवति
कांचनम् ॥ २१ ॥ यस्त्वनेन विधानेन द्वादशाब्दं करोति हि ॥ अनेनैव शरीरेण ब्रह्मलोकं स गच्छ
ति ॥ २२ ॥ तृतीयं कथितं भद्रे चतुर्थं शृणु शैलजे ॥ तैलं गुणं च संगृह्य स्निग्धभांडे निधापयेत् ॥
२३ ॥ मासार्द्धं तु समुद्धृत्य शुद्धकायो विचक्षणः ॥ शुभे दिने पिबेच्चैव क्षीराशी मुद्गभोजनः ॥ २४ ॥
भुंजीत नियमस्थः सन् ब्रह्मचारी जितेन्द्रियः ॥ सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥ २५ ॥ मेधा
वी सुन्दरश्चैव दशाहेन न संशयः ॥ जीवेद्वर्षसहस्रं तु ह्यक्षीणनवयौवनः ॥ २६ ॥ सुभगो द
र्शनीयश्च स्निग्धाञ्जनसमप्रभः ॥ चतुर्थं तु समाख्यातं पञ्चमं शृणु यत्नतः ॥ २७ ॥ एकैकं २२

भक्ष्ययेद्वीजंतिलशर्करयासह ॥ सम्वत्सरप्रयोगेण शृणुवक्ष्यामियत्फलम् ॥ २८ ॥ पूर्वोक्तानां
फलंयत्तुतत्फलंतस्यजायते ॥ पंचमंकथितंगुह्यंयस्तंच शृणु सांप्रतम् ॥ २९ ॥ पत्राणिब्रह्मवृक्ष
स्यकोमलानिविशेषतः ॥ छायायांशोषयित्वातु लोहभाण्डे विनिक्षिपेत् ॥ ३० ॥ सूक्ष्मचूर्णंविधा
येत्थंब्रह्मचारीविशेषतः ॥ गृहीत्वाचैवपुण्याहेजायतेजयमंगलम् ॥ ३१ ॥ प्रद्योतेनेप्रकर्त्तव्यं
प्रारम्भंहिविशेषतः ॥ फलंचूर्णस्यसंगृह्यतक्रेणसहयःपिबेत् ॥ ३२ ॥ जीर्णान्नेभोजनंकुर्यात्
लवणाम्लंविवर्जयेत् ॥ तृषितस्तुपिबेत्क्षीरमथवा शीतलंजलम् ॥ ३३ ॥ मासमात्रप्रयोगेण
जायतेभ्रमरोपमः ॥ षण्मासस्यप्रयोगेण कर्णिकारसमद्युति ॥ ३४ ॥ सहस्रायुर्भवेद्धीमान्

वलीपालितवर्जितः॥ षष्ठन्तु कथितं देवि सप्तमं शृणु सुन्दरी ॥ ३५॥ पुष्पाणि ब्रह्मवृक्षस्य संगृह्य
च विचक्षणः॥ सूक्ष्मचूर्णं ततः कृत्वा चातपे च विशोषयेत ॥ ३६॥ एकविंशद्दिनं यावद्भक्षयेत
षष्टिकोदनम्॥ खदिरस्य कषायेण तषितस्तु जलं पिबेत॥ ३७॥ एकविंशतिरात्रेण शृणु वत्से
यथाफलम्॥ मत्तमातङ्गगामी च वायुवेगो महाबलः॥ ३८॥ जीवेद्वर्षसहस्रन्तु वह्निज्वालास
मद्युतिः॥ सप्तमं कथितं देवि चाष्टमं शृणु सांप्रतम्॥ ३९॥ वल्कलं ब्रह्मवृक्षस्य सूक्ष्मचूर्णन्तु का
रयेत॥ तच्चूर्णन्तु समं याह्यं गवाक्षीरेण यः पिबेत॥ ४०॥ पयसा सह भुंजीयाल्लब्धाहारो जिते
न्द्रियः॥ सम्वत्सरप्रयोगेण चैवं भवति लक्षणम्॥ ४१॥ तस्य मूत्रेण षण्मासाल्लोहं भवति कांच

नं॥शतवर्षसहस्राणिसजीवेन्नात्रसंशयः॥४४॥अष्टमेकथितंदेवि नवमंशृणुसांप्रतम्॥ब्रह्म
तैलंपलंग्राह्यंघृतेनसहितंपिबेत्॥४३॥महायोगीमहाप्राज्ञोमूर्च्छाचैवप्रजायते॥क्षीरा हारी
प्रयत्नेनमासमेकंपिबेन्नरः॥४४॥अदृश्योजायतेसोपिक्षिप्रंपश्यतिमेदिनीम्॥अग्निनादह्य
मानोपितस्यमृत्युर्नजायते॥४५॥दशवर्षसहस्राणिवलीपलितवर्जितः॥नवमंकथितंदेविद
शमंशृणुसांप्रतम्॥४६॥ब्रह्मतैलंमधुघृतंब्राह्मीरससमन्वितम्॥समभागानिसर्वाणि चोपभु
ञ्जीतसाधकः॥४७॥मासत्रयप्रयोगेणदिवापश्यतितारकाः॥षण्मासस्यप्रयोगेण सिद्धिर्भव
तिनान्यथा॥४८॥ब्रह्मकोटिसहस्राणिविष्णुकोटिशतानिच॥तेष्वतीतेषुपरिवर्त्स्यतस्यमृत्यु

र्नजायते ॥४८॥ सत्यमेतन्मयाख्यातं तवस्नेहेन पार्वति ॥ गुह्याद्गुह्यतरं सारं साधकार्थमनुत्तमम्
॥५०॥ पलाशबीजचूर्णंतु प्रथमे चैव गृह्यते ॥ श्रावणे वा भाद्रपदे द्विगुणं च पचेत्पयः ॥५१॥
विश्राम्य दिनमेकं तु सजातश्च भवेदपि ॥ दधिमथ्य प्रयत्नेन नवनीतश्च गृह्यते ॥५२॥ समुद्धृत्यं
प्रयत्नेन यथान्नसहितासनः ॥ भोजनं शालिभुक्तेन गवां क्षीरेण संयुतम् ॥५३॥ सप्तैकं ब्रह्मचू
र्णेन वलीपलितवर्जितः ॥ श्रुतिज्ञः सर्वतत्त्वज्ञो जीवेद्वर्षशतत्रयम् ॥५४॥ गोक्षीरशालीभुञ्जी
यात्क्षाराम्लमपि वर्जयेत् ॥ सर्पवृश्चिकदष्टस्य वानरादिकचोणसाः ॥५५॥ सर्वेषां विषकीटा
नां वानरीनस्यमेव च ॥ स्थावरं जंगमं वापि कृत्रिमं चापि यद्विषम् ॥५६॥ अजीर्णं विविधं मू

तं गुग्गुलं च सर्पिषा सह ॥ वायुवेगेन नश्यन्ति सर्वत्र विघ्ननाशनम् ॥ ५७ ॥ पाताले यंत्रमाहृत्य
पलाशतरुवीजकम् ॥ निम्बकद्वयमिदं तैलं मध्वाज्येन समं पिबेत् ॥ ५८ ॥ मासमात्रेण योगि
न्द्रो नक्षत्राण्यपि पश्यति ॥ अनेककालजीवि स्यात् त्रीयमाणः सुरासुरैः ॥ ५९ ॥ धात्रीरसेन तत्
बीजं चूर्णं सम्यक् विभावयेत् ॥ सप्ताहं पयसा तद्वत् क्वाथं पित्वा पुनः पुनः ॥ ६० ॥ सप्ताहं सेवना
त्तस्य दूरदृष्टिर्भवेन्नरः ॥ तेजसा सूर्यसंकाश आह्लादे चन्द्रमा इव ॥ ६१ ॥ अतिदारुणवेगेन
वायुं वुध्याबृहस्पतिम् ॥ वाचा सरस्वतीं जित्वा जीवेदा चन्द्रतारकम् ॥ ६२ ॥ आतपे शोषितं
तस्य प्रसूनजनितं रजः ॥ क्षीरेणार्द्रीकृतं स्निग्धभाण्डे निःक्षिप्य संस्थितम् ॥ ६३ ॥ एकविंश

द्दिनान्तस्यकल्पेनचनरोभवेत्॥बलेनगजवद्भीमसेनतुल्यपराक्रमः॥६४॥एकविंशद्दिनादू
र्ध्वंशुभमुहूर्त्तेशुभेदिने॥तद्भजेत्पयसाहारंकाञ्जिकाम्लादिवर्जितम्॥६५॥जरामरणनिर्मुक्तोनकदा
चित्क्षयंव्रजेत्॥तद्धिचूर्णंसमादायपलमात्रंपिवेद्यदि॥६६॥चतुष्पलेनदुग्धेनमासमात्रंजिते
न्द्रियः॥तन्मूत्रेणप्रशान्तोष्ठांताम्रंस्वर्णत्वमाप्नुयात्॥६७॥अनेककालजीविस्यात्कन्दर्पइ
वबुद्धिमान्॥ब्रह्मवृक्षस्यपञ्चाङ्गंछायाशुष्कंविचूर्णितम्॥६८॥मध्वाज्याभ्यांलिहेत्कर्षंष
ण्मासेनजरांजयेत्॥जीवेद्वर्षसहस्रैकंदिव्यकायोमहाबलः॥६८॥ब्रह्मवृक्षमतिस्थूलंछेदयेदू
र्ध्वभागतः॥अधोऽरत्निप्रमाणंचतस्यमूर्द्ध्निविलंकृतम्॥७०॥धात्रीफलैःप्रपक्वैस्तुगर्त्तं

पूरयेत्प्रिये ॥ पंचजातिफलैः पूर्णेनु काष्ठेन निरुध्य च ॥ ७१ ॥ कुशैः सूत्रैर्वेष्टयेत्सर्वं लेपयेन्मृ
न्मयैः पुनः ॥ आवेष्ट्य वस्त्रखण्डेन ततो मृन्मयेलिपेत् ॥ ७२ ॥ शुष्के गजपुटे देयं पारितो
रण्यकोपलैः ॥ स्वांग शीतलमुद्धृत्य मद्रवानि फलानि च ॥ ७३ ॥ क्षीरमध्वाज्य संयुक्ते भा
ण्डे तानि विनिःक्षिपेत् ॥ मध्वाज्ययुक्तं भुञ्जीत सुदिने विधिपूर्वकम् ॥ ७४ ॥ यथेष्टं भूगृहान्त
स्थः धीरा हारे जरां जयेत् ॥ छिद्रं पश्यति मासेन निधानानि च भूतले ॥ ७५ ॥ जीवेद्ब्रह्मदिनं या
वत्सर्वरोगविवर्जितः ॥ पत्रं पुष्पं फलं ग्राह्यं सूक्ष्म चूर्णं तु कारयेत् ॥ ७६ ॥ कृष्णा गोक्षीर संयुक्तं
भक्षयेद्दासमाहितः ॥ क्षीराहारी भवेन्नित्यं वलीपलितवर्जितम् ॥ ७७ ॥ द्विरष्टवर्षाकारो से जा

वेहर्षशतत्रयम् ॥ तस्यपुष्पस्यनिर्यासंतालकेनसुभावितम् ॥ ७८ ॥ तेनतालककल्केनद्वात्रिंशां
शेनविन्धति ॥ वङ्गंभवतितत्तारंकुन्दपुष्पस्यसन्निभम् ॥ ७९ ॥ तस्यपुष्परसेनैवगंधकंचैवभा
वयेत ॥ लिप्तानिशुल्वपत्राणिपुटपाकेनकाञ्चनम् ॥ ८० ॥ पारदंतेनकल्केनद्वात्रिंशत्कांचनं
भवेत ॥ ब्रह्मायुर्जायतेसिद्धिःस्पर्शमात्रेनसंशयः ॥ ८१ ॥ श्वेतपलाशपञ्चाङ्गंचूर्णितंमधुना
सह ॥ बिडालपदमात्रन्तुभक्ष्येमासाज्जरापहम् ॥ ८२ ॥ तेनतद्वीजचूर्णन्तुमासैकंभक्षयेन्नरः ॥
शरीरभस्मनासर्वंमासैकंगलितापुनः ॥ ८३ ॥ जीवेद्ब्रह्मदिनंतद्वद्यावत्तिष्ठतिमेदिनी ॥ सर्वस
ङ्गंपरित्यज्यक्षीरक्षौद्रान्नमेवच ॥ ८४ ॥ सेवयेत्सर्वसिद्ध्यर्थंब्रह्मकल्पंसदानरः ॥ अनेनभक्ष्य

मंत्रेण सर्वयोगाभिमंत्रितम् ॥८५॥ ॐ ह्रीं अमृतं कुरु अमृतामालिन्यै नमः ॥ पूर्वमस्य मंत्रस्य ग्रह
णे विंशतिसहस्रजपेन पुरश्चरणं कृत्वा सर्वप्रयोगाः सप्ताभिमंत्रिताः करणीयाः देवता ध्यानम् ॥
सुधाकुंभं चरत्नकच ज्ञानमुद्राकराम्बुजे ॥ विप्राणां मौक्तिकाभासां ध्यायेदमृतमालिनीम् ॥८६॥
तस्य पुष्पाणि संगृह्य छायां शुष्कानि कारयेत् ॥ त्रिंशत्पलं च तच्चूर्णं चतुर्विंशत्पलं घृतम् ॥८७॥
एकीकृत्य क्षिपेद्भाण्डे धान्यराशौ निधाय च ॥ मासत्रयं समुद्धृत्य भागान्कृत्वा चतुर्दश ॥८८॥ भोगे
कं भक्षयेन्नित्यं ताम्रपात्रे च भोजनम् ॥ सप्ताहेन नरः सिद्धो वज्रदेहोद्भिसप्रभे ॥८९॥ तस्य मूत्रपुरी
षाभ्यां ताम्रमायाति काञ्चनम् ॥ ब्रह्मवृक्षस्य बीजानि चूर्णयेदाज्यमिश्रितम् ॥९०॥ धान्यरा

सोस्थितामासादुद्धृत्य भक्षयेत्समाम्॥ पक्षत्रयेजरांहन्तिजीवेद्वर्षसहस्रकम्॥ ९१॥ ब्रह्मकुष्माफ
लंधात्र्याचूर्णक्षौद्राज्यशर्करम्॥ पलैकंभक्षयेन्नित्यं मासैकेनजरांजयेत्॥ ९२॥ पलाशबीज
तैलंच पलैकंक्षीरतुल्यकम्॥ पीत्वाम्लछोमवाप्नोति वक्त्रेनतस्यगवांपयः॥ ९३॥ स्तोकंस्तोकंक्षि
पेन्नीरं प्रबोधोजायतेक्षणात्॥ एवंसप्तदिनंकुर्याच्छिद्रंपश्यतिमेदिनी॥ ९४॥ मासत्रयप्रयोगेण
जीवेदाचन्द्रतारकम्॥ तस्यमूत्रपुरीषाभ्यां ताम्रंभवतिकांचनम्॥ ९५॥ निष्कत्रयंत्र्यहेचाथतत्तै
लंचगवांपयः॥ पीत्वाषण्मासयोगेन नवनागसमोबली॥ ९६॥ जीवेद्वर्षलक्ष्यवर्षंतु दिव्यकायो
भवेन्नरः॥ ब्राह्मीद्रवेश्वतैलं मध्वाज्यसंयुतंपिबेत्॥ ९७॥ पलमात्रंजरामृत्युंनिहन्तिचनसं

श्यः॥ छिद्रं पश्यति मेदिन्या मासषंत्र क्षणोदिनम्॥ ९८॥ तत्तैलं त्रिपलं पीत्वा गवांक्षीरं पल द्वयं॥
तत्क्षणान्मृत्युमाप्नोति सिध्धे द्रक्रेगवांपयः॥ ९९॥ बोधेक्षीरोदनं देयात्समधोयाति निबन्धनम्॥
द्वितीये शक्रतुल्यत्वं वज्रदेहस्तृतीयके॥ १००॥ चतुर्थे रवे वरोभूयात्पञ्चमे वलवान्भवेत्॥ स्वेच्छा
चारीतदन्ते च सप्ताहे दिव्यरूपधृक्॥ १॥ इन्द्रगोपसमं वर्णं चन्द्रार्कसदृशोपमम्॥ द्विसप्ताहे स्वयं
कर्त्ता त्रिसप्ताहे शिवोपमः॥ २॥ तदुद्भवपुरीषाभ्यां स्पर्शाल्लोहोपि काञ्चनम्॥ क्षयकल्पान्तपर्य
न्तं जीवेन्मासैकसेवनात्॥ ३॥ ब्रह्मकण्टककुष्माण्ड हिरण्पुवक्ष्यामि सांप्रतम्॥ कंटकब्रह्मवृक्ष
स्य पुष्पमानीय यत्नतः॥ ४॥ खलनं तद्रसेनैव पारदस्य समाचरेत्॥ जलयंत्रे पारदन्तु निःक्षिपे

यत्नितः।शिवे॥१०५॥सपारदोभवेत्सिद्धोदशभेदीभवेत्सुतु॥शुद्धताम्रद्रवंकृत्वातत्कास्वाग्निप्रयो
गतः॥६॥तन्नियोसंतत्रदद्यात्ताम्रस्वर्णत्वमाप्नुयात्॥तत्पश्चाद्भ्रसेनैवहरितालन्तुसंलिखेत्
॥७॥ससर्वसंपुटेकृत्वातदेवरसभावितं॥दद्याद्गजपुटंचैवमृतोभवतितत्क्षणात्॥८॥निर्धू
मोजायतेचैवभक्षयेत्तंयथाविधि॥तस्यप्रभक्षणाद्देविवलीपलितवर्जितः॥९॥एवंसिद्ध
स्तालकोहिसर्वसिद्धिंप्रयच्छति॥तत्पश्चाद्भ्रसंचैववङ्गद्रावेविनिक्षिपेत्॥११०॥तत्क्षणाद्रौ
प्यतांयातिस्वर्णेशस्यप्रसादतः॥वल्लीपलाशकल्प–शृणुयत्नेनसांप्रतम्॥१११॥वल्लीपलाश
मानीयताम्रद्रावेविनिःक्षिपेत्॥तत्क्षणाद्रौप्यतांयातिस्वर्णेशस्यप्रसादतः॥११२॥वल्लीप

त्वाश्मादाय पारदं शोधयेत्पुनः॥ तद्रसेन दृढं कुर्याद्वारं वारं पुनः पुनः॥११३॥ अङ्गारवाह्निवाद
ग्धो म्रियते पारदं ततः॥ शोधयेत् द्रसेनैव खादयेद्द्रुतिभावितः॥११४॥ क्षुन्निद्रा हारको भूयात्स
हस्तवर्षभोगवान्॥ ताम्रद्रुतेस्पर्शयेच्च भावो ह्यविंशवर्णकः॥११५॥ इति पलाशकल्पः॥ ॥
अथ हस्तिकर्णपलाशकल्पः प्रारंभः॥ ॥ स्वगात्रीयं प्रवक्ष्यामि प्रयोगं शृणु सुन्दरी॥ औ
षधं दिव्यरूपश्च मया पूर्वं समुद्धृतम्॥१॥ हस्तिकर्ण इति ख्यातो नाम्ना सो सुरपूजितः॥ तस्य
भक्षणमात्रेण सर्वरोगात्प्रमुच्यते॥२॥ मृगेन्द्रं च यथा दृष्ट्वा मृगा यान्ति पराङ्मुखाः॥ एवमौ
षधकं प्राप्य व्याधिमात्रं प्रणश्यति॥३॥ सुतिथौ च सुनक्षत्रे सुदिने च शुभक्षणे॥ सुपुष्येर

क्षतैरर्चैर्धृत्वा चैवोत्तरमुखः ॥४॥ स्वने तु मनसा प्राज्ञः समुद्धृत्य तु धारयेत् ॥ ततः पिष्ट्वा तु सं
स्कृत्य श्लक्ष्ण चूर्णानि कारयेत् ॥५॥ सर्पिर्मधुसमायुक्तं मृद्भाण्डे च निधापयेत् ॥ एकविंशति
रात्रेण समुद्धृत्य पलांशकम् ॥६॥ ब्राह्मणं भोजयित्वा तु स्वस्त्यादि वाचयेत्ततः ॥ मुञ्जरसेन सं
लोड्य अहन्यहनि भक्षयेत् ॥७॥ पलं भक्षणमात्रेण वलीपलितवर्जितः ॥ सुवाक्श्रुतिधरो
भूत्वा सौन्दर्ये च स्मरोपमः ॥८॥ दिनेन योजनशतं गत्वा च पुनरागच्छेत् ॥ जीवेद्वर्षशतं वर्षं
नात्र कार्या विचारणा ॥९॥ प्रयोगान्यं प्रवक्ष्यामि शृणुष्व कमलानने ॥ कृष्णधेनोश्च पय
सा सं लोड्य भक्षयेद्यदि ॥१०॥ पूर्वोक्तफलमाप्नोति सत्यं सत्यं न संशयः ॥ एवं माहिषदुग्धेन

सं लोऽश्य मधुनासह ॥११॥ तस्य प्रभक्षणाद्देवि मासत्रयविधानतः ॥ पूर्वं फलमवाप्नोति न
केशः सिततां व्रजेत ॥१२॥ सर्वत्र जयमाप्नोति वशीकरणमुत्तमम् ॥ जीवेद्वर्षशतं देव नरो ना
रायणो भवेत ॥१३॥ तथा शयनकाले च सलुदकेन घृतेन च ॥ विडालपदमापीय देहसिद्धिर्भवे
ध्रुवम ॥१४॥ दिव्यदेहधरो भूत्वा स्व जरामरणो भवेत ॥ सर्वे रोगा प्रणश्यन्ति शरीरे प्राणघातकाः ॥
१५॥ हस्तिकर्णस्य वै मूलं गृहीत्वा चूर्णयेत्तथा ॥ सर्वरोगविनिर्मुक्तो जीवेद्वर्षशतं शिवे ॥१६॥
सक्षीर भक्षितं कुर्यात्सप्ताहेन सुरेश्वरी ॥ नवं श्रुतिधरं शरं मृगेन्द्रगतिविक्रमं ॥१७॥ पद्मगौर
प्रतीकाशं युक्तं दश शतायुषा ॥ षोडशाब्दाकृतिं चैव सततं दुग्धभोजितं ॥१८॥ मधुसर्पिस

मायुक्तंजग्धमाशुष्करंभवेत ॥ तज्जग्धंमधुनासार्द्धंदशवर्षसहस्त्रिणम् ॥ १९ ॥ कुर्यात्नवंश्रु
तिधरंप्रमदाजनवल्लभम् ॥ दग्धानित्यंमक्षितंचवज्रदेहकरंभवेत ॥ २० ॥ कृष्णाकेशसमायु
क्तेनववर्षसहस्त्रिणम् ॥ तच्चकांजिकसंयुक्तेनपंकुर्याच्चभक्षितं ॥ २१ ॥ शतवर्षंदिव्यदेहंवली
पलितवर्जितम् ॥ जग्धंत्रिफलयायुक्तंचक्षुष्मान्तंकरोतिवै ॥ २२ ॥ अन्धःपश्येत्तुचूर्णस्यसा
ज्यस्यैवतुभक्षणात ॥ माहिषीक्षीरसंयुक्तंतल्लेपः कृष्णकेशकृत ॥ २३ ॥ अल्पाटस्यचवैके
शेभवन्तिसुरपूजिते ॥ तैलयुक्तेनचूर्णेनवलीपलितवर्जितम् ॥ २४ ॥ तदुद्वर्त्तनमात्रेणसर्व
रोगैःप्रमुच्यते ॥ सच्छागक्षीरचूर्णेनदृष्टिः षण्मासतोजनात ॥ २५ ॥ कल्पेदंपरमंगुह्यंतव

स्नेहाम्लकाशितम् ॥ अस्य सेवनमात्रेण नरो मोक्षमवाप्नुयात् ॥ २६ ॥ इति हस्तिकर्णपलाशकल्पः चतुर्थः ॥ ४ ॥ ॥ अथ शाल्मलीकल्पः ॥ ॥ शाल्मलीकल्पं वक्ष्यामि येन सिध्यन्ति मानवाः ॥ श्वेता रक्ता तथा पीता कृष्णा चैव चतुर्विधाः ॥ १ ॥ श्वेतपुष्पा ब्राह्मणी च रक्ता चैव तु क्षत्रिया ॥ पीता वैश्या समाख्याता कृष्णा शूद्रा प्रकीर्तिता ॥ २ ॥ चतुर्वर्णा भवेद्देवि सर्वसत्वानुरूपिणी ॥ श्वेता पीता च कृष्णा च रक्ता सर्वत्र दृश्यते ॥ ३ ॥ शाल्मलीवृक्षविशेषः ॥ तत्पर्यायः पिच्छिला । पूरणी । मोचा । स्थिरायुः । दुरारोहा । तूलिनी । कुक्कुटी । कण्टकारी । मोचिनी । चिरजीवी । तूलवृक्षः । कन्तकद्रुमः । रम्यपुष्पः । पयोद्रुमः । दीर्घद्रुम । स्थूलफल । दीर्घायुः ॥ अस्या गुणाः पिच्छिलत्वं । वृष्यत्वं । बल्य

त्वं। मधुरत्वं। शीतलत्वं। कषायत्वं। लघुत्वं। स्निग्धत्वं। शुक्रश्लेष्मवर्धत्वश्च। सद्रसगुणाः॥ ग्राहि
त्वं। कषायत्वं। कफनाशित्वञ्च॥ शाल्मली शीतला स्वाद्वी रसे शाके षायनी॥ श्लेष्मला श्रीसध
बीजा च बृंहणी रक्तपित्तजित्॥४॥ शाल्मलीपुष्पशाकस्तु घृतसैन्धवसाधितः॥ प्रदरं नाशयत्येव
दुःसाध्यं च न संशयः॥५॥ रसे पाके च मधुरं कषायं शीतलं गुरु च॥ कफपित्तप्रजित् ग्राहि वातलश्च प्रकी
र्त्तितः॥६॥ श्रीशैले पर्वते चैव माहेन्द्रपर्वते पि च॥ पारियात्रकस्य देशे च हारण्ये च विशेषतः॥७॥ तत्र
स्था च भवेद्देवि कृष्णा दिव्यस्वरूपिणी॥ तस्या भक्षणमात्रेण गाह्वरहस्यो जायते नरः॥८॥ नाशयेत्सर्व
रोगांश्च सर्वदा नवयौवनं॥ कल्पमायुर्भवेत्तस्य छिद्रं पश्यति मेदिनीम्॥९॥ मूलं श्यामलशाल्म

त्यास्थि लोहपरिवेष्टितम्॥ वक्त्रान्तरगतं कुर्यादहृश्यंकरणं परम्॥१०॥ तन्मूलवल्कलं तैलशि
तयासह सेवितम्॥ सप्ताहं तेन संसिद्धः षोडशाब्दायुषो भवेत्॥११॥ अनेकनारीरमणो दीर्घजीवी
स्मरोपमः॥ तद्धृक्षदण्डेनिः क्षिप्य स्तनन्धं लोहनाशनः॥१२॥ विन्यस्य भाण्डं तस्याधो दहेद्गजपुट
म्निना॥ तन्निः स्रस्तं ताद्वरसं मण्डलं मधुना भजेत्॥१३॥ अनेककामरूपी स्यान्नानारूपं करो
तिहि॥ अदृश्यत्वं स्वयं गच्छेद्देवानां पुरतोपि च॥१४॥ नीलीरसेन नेत्रस्थमदृश्यं कुरुते नरम्॥
ततुस्यभृंगराजाभ्यां तैलमुत्पलकन्दकम्॥१५॥ पाति च स्वशरीरे च केशपाशविलेपितम्॥
सप्ताहात्पलितं हन्ति कपालतलरञ्जनात्॥१६॥ श्वेता च कथ्यते देवि येन सिध्यन्ति मान

वा:॥ श्वेतपुष्पारसं गृह्य सूतकं मर्दयेत्प्रिये॥१७॥ क्षीरं माहिषसंयुक्तं तत्रं वङ्गं नियोजयेत्॥ जा
यते सप्तरात्रेण तारं दिव्यं महोत्करम्॥१८॥ गंधकं तालकं चैव श्वेतार्कश्चैव टङ्कणम्॥ तद्रसेम
र्दयित्वा तु ताम्रं ~ विलेपयेत्॥१९॥ आतपे शोषितं तत्तु स्वधोमूषान्तु कारयेत्॥ आवर्त्तं जायते
क्षिप्रं तारं शुद्धं मनोहरम्॥२०॥ मूलेन श्वेतशाल्मल्याः कर्पूरं हेममाक्षिकम्॥ मधुना नेत्रयोर्न
स्य कदलीपत्रवेष्टनात्॥२१॥ नष्टद्रव्यनिधानं वा भूगतं तेन पश्यति॥ शाल्मली मूलचूर्णं तु
पारदे च विनिःक्षिपेत्॥२२॥ अंधमूषागतं ध्यातं बद्धमायात्यसंशयः॥ पारदस्य पलं चैव मस्तक
स्य पलं तथा॥२३॥ श्वेतारसं च संग्राह्य मजामूत्रं तथैव च॥ अन्धमूषां तु कर्त्तव्या यावत्तु घटि ३३

कात्रयम्॥ २४॥ विवेश्य चौषधीशुस्कं वङ्गं भवतितारकम्॥ शाल्मली मूलचैन तारं भव
तिकाञ्चनम्॥ २५॥ ससितंतद्रवं मूलं पयसा सहसेवितम्॥ अनेकनारीरमणं कुरुते स्मरस
न्निभम्॥ २६॥ तन्मूलवाजिगंधाभ्यां युताभ्यांमासधर्करा॥ घृतेनकारितापूपा ह्येकविंशाद्दि
नंभजेत्॥ २७॥ प्रगल्भकामिनीवृन्दमदनिर्मथनक्षमः॥ नवनागवल्लीश्रीमान मूत्क्षारमसे
वयेत्॥ २८॥ हरिद्रावर्णशाल्मल्या पूर्ववत्तैलमाहरेत्॥ विद्रुतंरजतंतेन स्नापितंस्वर्णतां
व्रजे॥ २९॥ आज्येनपीतंतत्तैलं दिव्यदेहोभवेन्नरः॥ तत्तैलंक्षौद्रसंयुक्तं सर्वरोगहरंनृणाम्॥
३०॥ नरस्तत्पलगन्धः स्यात्कनकद्युतिभास्करः॥ तत्पुष्पस्यरसेपीतेबालार्कद्युतिमान्भवेत्॥

३१॥ कल्काभिर्निस्त्रिलामिश्र पूर्णः श्रीसुभगोभवेत्॥ अनेककालजीवीस्याद्रमतेत्र वयथासु

रः॥३२॥ तत्सुख्यरससंगरहगंधकं मर्दयेद्बुधः॥ तेनकल्केनदेवेशितारपत्राणिलेपयेत्॥३३॥

अर्कपत्रेषु निर्मीतं पुटमेकन्तुदापयेत्॥ पाकात्सज्जायतेसत्यंकाञ्चनं सुमनोहरम्॥३४॥

सूतकंगंधकं चैव दरदं च मनःशिला॥ समभागंसमंयुक्तं पीतायारससुत्तमम्॥३५॥ तेन

कल्केनदेवेशितारपत्राणिलेपयेत्॥ तत्क्षणाद्धेमतांयाति पुटमेकेनपार्वती॥३६॥ पीता

यारसमादाय भक्षयेन्मधुनासह॥ मासैकेनप्रयोगेणजायतेकनकःप्रभः॥३७॥ वलीप

लितनिर्मुक्तोजीवेद्वर्षसहस्रकम्॥ कामदेवसमोभूत्वा विचरेत्वनिताव्रजम॥३८॥ रक्तश

ल्मलिवृक्षस्य गुणत्वं हि शृणु प्रिये॥ शाल्मली पुष्पमादाय सूक्ष्मचूर्णानि कारयेत्॥ ३९॥
शालीतण्डुल संयुक्तं द्वितीये तेन पेषयेत्॥ घृतेन सह पक्वं च सप्तवारं च भक्षयेत्॥ ४०॥ मास
मेकप्रयोगेण शुक्रवृद्धियुतो नरः॥ स्त्रीसहस्राणि रमते कामदेवो द्वितीयकः॥ ४१॥ वेगेन तुरगो
देवि बलेन कुञ्जरोपमः॥ महासत्त्वं भवेत्तस्य जीर्णान्ते क्षीरभोजनम्॥ ४२ वलीपलितहीनः स्यात्
सर्वव्याधिं विमुञ्चति॥ सततं सेवितं येन तस्य मृत्युर्न जायते॥ ४३॥ एतत्तु सुलभं कल्पे सत्यं सत्यं
वदाम्यहम्॥ शाल्मली विद्यमाने च मोहं गच्छन्ति मानवाः॥ ४४॥ शाल्मलीमूलमादाय क्षीर
मध्ये निधापयेत्॥ सक्वाथं च पलं देवि मर्दयित्वा पिबेन्नरः॥ ४५॥ मूर्च्छा भवति सामान्यं पश्चा

त्क्षीरं पिबेन्नरः॥ सप्ताहे जीर्यते तस्य दन्ताः केशा नखानि च॥४६॥ दिव्यदेहधरो भूत्वा खेचरो जायते नरः॥ दशनागबलीश्रीमान स्ववशीकृति भवेत॥४७॥ जीवेद्वर्षसहस्राणि सत्यमेव न संशयः॥ तस्य मूत्रपुरीषेण शुल्वं भवति कांचनम्॥४८॥ अभेद्यः सर्वलोकानां कल्पमायुर्भवेन्नरः॥ शाल्मलीमूलमादाय सूक्ष्मचूर्णानि कारयेत॥४९॥ घृतेन मधुना युक्तं पेयं नं मुहुर्मुहुः॥ एकमासं सेवनेन वलीपलितवर्जितः॥५०॥ दिव्यदेहो नरो भूत्वा छिद्रं पश्यति मेदिनीम॥ अथातः पुष्पमादाय क्षीरमध्ये विनिःक्षिपेत॥५१॥ भक्षयेन्मासमेकन्तु घृतेन मधुना सह॥ रमणीयतमो भूत्वा किन्नरो जायते नरः॥५२॥ योजनं च शतं गच्छेत्पुनरागमनं

व्रजेत् ॥ जीवनं ब्रह्मणा सार्द्धं नात्र कार्या विचारणा ॥ ५३ ॥ आदाय मूलं शाल्मल्यास्तच्चूर्णं त्रिभवं रसं ॥
सिताक्षौद्रेण संपीतं कुर्याद्वज्रनिभं वपुः ॥ ५४ ॥ पूर्ववत्तैलमाहृत्य सक्षौद्रं सेवते नु यः ॥ युवा भवति
वृद्धोपि वलीपलितवर्जितः ॥ ५५ ॥ पुष्यार्के मधुना तस्य प्रसूनजनितं रजः ॥ आज्येन सेवितं कुर्यात्
द्बलं तद्वत्पराक्रमम् ॥ ५६ ॥ यः कोपि सेवते नित्यं शाल्मलीकल्पमुत्तमम् ॥ तस्य न क्षतिदारि
द्र्यं जरामरणवर्जितम् ॥ ५७ ॥ इति शाल्मलीकल्पः पंचमः ॥ ५ ॥ ॥ अथ हरिद्राकल्पः ॥ ॥
शृणु देवि हरिद्रायाः कल्पं दिव्यं मयेरितम् ॥ हरिद्रा कांचनी पीता निशाख्या वरवर्णिनी ॥ १ ॥ क्रि
मिघ्ना हलदी योषित्प्रिया हरिविलासिनी ॥ हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ॥ वर्ण्या

त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा॥ दार्वीमेदाग्रगंधा च सुरभिश्चारुदारु च॥३॥ कर्पूरा पद्मपत्रा
स्यात्सुरभिः सुरनायिका॥ आम्रगंधिहरिद्रा या सा शीता वातलामता॥४॥ पित्तहृन्मधुरा तिक्ता स
र्वकण्डुविनाशिनी॥ अरण्यहलदीकन्दः कुष्ठवातप्रणाशनः॥५॥ इति सामान्यतः प्रोक्तं कल्पं श
णु सुरेश्वरी॥ आर्द्रं शुष्कं निशाचूर्णं शुष्कमाण्डोदरस्थितम्॥६॥ तं निष्कमात्रं मूत्रेण गवां पीतं वि
शोधनम्॥ सप्ताहं सेवमानं तु हन्यात्कुक्षिगतां गदाम्॥७॥ उष्णोदकेन तत्स्नानात्सप्ताहाद्वीर्य
वान्भवेत्॥ शाल्यन्नं पयसा ऽश्नीयाद्वामाज्येन नित्यशः॥८॥ निष्कमात्रं निशाचूर्णं मधुना स
ह लोडितम्॥ मासाच्छिवकान्तिः स्याद्द्विमासात्कमलप्रभे॥९॥ त्रिमासात्पीतवर्णं च चतुर्मासा

न्जरादिभिः॥ विमुक्तः पंचमासास्यात्स्थिर यौवनगर्वितः॥१०॥षण्मासात्सूर्यसंकाशः सप्तमासा
न्मनोभवः॥ अष्टमासात्प्रसन्नात्मादूरश्रवणवान्भवेत्॥११॥ नवमासादनायासात्त्रीशतं चाधि
रोहति॥ अनेकशास्त्रवेदिस्याद्दशमासनिषेवणात्॥१२॥ मासादेकादशोन्मर्त्यः सर्वज्ञत्वमवा
प्नुयात्॥ सेवतेवत्सरं यस्तु जरामरणवर्जितः॥१३॥ क्षीराहारीभवेन्नित्यंहरिद्राचूर्णलोलुपः॥ ॥
अथश्वेतनिशायान्तु कल्पंते व्याहराम्यहम्॥ ॥ यस्यविज्ञानमात्रेणरसायनपतिर्भवेत्॥१४॥
वङ्गं संसोध्य यत्नेन तत्रश्वेतनिशारसं॥ दत्वाग्निं दापयेद्द्विवज्रमूषागतं पुनः॥१५॥ याममात्रे
णतद्वङ्गं रौप्यतां याति निश्चितम्॥ निशारसं तु संगृह्य पारदं माषपञ्चकम्॥१६॥ खल्लेयत्नेनदे

देशिनिशामूसांविधायच॥ तत्रैवपारदंदत्त्वासप्तकञ्चुकवर्जितम्॥ १७॥ संपुटेताम्रजंकृ
त्वातत्रमासंरसंददेत्॥ दत्वानिशामुखस्तत्रदद्यादूजपुटंततः॥ १८॥ एवंक्रमेणदेवेशिपा
रदोमृतिमेतिवै॥ रतिकार्द्धंभक्षयेत्तंवलीपलितवर्जितः॥ १९॥ कामदेवोसमोभूत्वास्त्रीशतं
चाधिगच्छति॥ इतिसंक्षेपतःप्रोक्तंहरिद्राकल्पमुत्तमम्॥ २०॥ इतिहरिद्राकल्पःषष्ठः॥ ६॥
अथअश्वगन्धाकल्पः॥ अश्वगन्धाक्षुद्रवृक्षविशेषः तन्नामगुणा॥ कम्बूकाहयगन्धाच
तथाहयवरोधिका॥ वाराहकर्णीतुरगीवनजावाजिनीहया॥ १॥ पुष्टिदावलदापुष्टिपीव
राश्यामलातथा॥ पलाशपर्णीवातघ्नीकालाचश्रीकरीतथा॥ २॥ गन्धवाराहपत्रीचतथा

स्या। त्कामरूपिणी ॥ त्रैलोक्यरक्षिणीह्येषा सर्वसिद्धिकरी सदा ॥ ३ ॥ देवदानवगन्धर्वसिद्ध
यक्षोरगादयः ॥ दिव्यौषधीप्रभावेण ह्यन्तर्धानं गतास्तु ते ॥ ४ ॥ तद्गुणा ॥ कटुतिक्तोष्णत्वं
मन्दगन्धित्वं । वलशुक्रकारित्वं ॥ वायुकासश्वासक्षयव्रणजराव्याधिनाशित्वंच ॥ अश्व
गन्धापलंचैवसूक्ष्मचूर्णंतुकारयेत ॥ शतावरीपलंचैकंपलमेकन्तुभक्षयेत ॥ ५ ॥ तेन भक्ष
णमात्रेणवलीपलितवर्जितः ॥ अश्वगन्धातुसंगृह्यवीजतोयेनपेषयेत ॥ ६ ॥ अक्षिणीह्यञ्ज
येत्तेन हन्तिसद्यस्तुतैमिरं ॥ चिपिटंपटलंचैव पुष्पंचैवविनाशयेत ॥ ७ ॥ अश्वगन्धातुसंगृह्य
मातुलुङ्ग रसेपचेत ॥ गोमूत्रेणसमायुक्तं मासमेकन्तु भक्षयेत ॥ ८ ॥ दृढकायोभवेद्दिववली

पलितवर्जितः॥ अश्वगन्धा तिलामासा मधुना सह संयुता ॥९॥ सार्द्धमासप्रयोगेण कुञ्जरैः

सह युध्यते॥ अश्वगंधाभवं मूलं त्रिफलायाजलैः सह॥१०॥ चर्वित्वा सकलान्दन्तरोगान्ना

शयति ध्रुवम्॥ नाक्षमायाति चोन्मादं भव नीतेन सेवनात्॥११॥ अश्वगंधाभवं चूर्णं तिलेन

सह मेलितम्॥ मधुना घृतयुक्तेन प्रातरुत्थाय यः पिबेत्॥१२॥ पलीपलितनिर्मुक्तो वृद्धोपि

तरुणायते॥ न चात्र परिहारोस्ति स्नानभोजनमैथुनैः॥१३॥ अश्वगन्धारजः श्लक्ष्णपयसा सह

सेवितम्॥ दिव्यदृष्टिकरश्चैव जरामरणवर्जितः॥१४॥ तिलार्द्धयुक्तं तच्चूर्णं गुडेन सह सेवितम्

कर्षमात्रं भवेन्नित्यं सर्वामयविशोधनम्॥१५॥ धात्रीरसेन तच्चूर्णं कर्षं नित्यं निसेवनात्॥ ३८

दिव्यदृष्टिर्भवेज्जन्तुर्जरामरणवर्जितः ॥ १६ ॥ निष्कमात्रं हितं बीजं गुडूच्यास्त्व भवं रजः ॥
द्विनिष्कमात्रं युक्तं च सायमुष्णेन वारिणा ॥ १७ ॥ पीत्वा जयति दुर्वारान्नानाविधगदा
नपि ॥ तच्चूर्णं नवनीतेन सेवि राजयक्ष्मजित ॥ १८ ॥ तैलं युक्तेन लेपेन प्रणश्यन्ति त्वगाम
याः ॥ पलार्द्धमश्वगन्धाया चूर्णं तद्द्विगुणं तिले ॥ १९ ॥ कुडवं मासजं चूर्णमेतदाज्ये पाचितम् ॥
अपूपं भक्षयेन्मासं निदाघे च जरां जयेत ॥ २० ॥ श्वेताश्वगन्धमूलेन रक्षा वंधे कृते सति ॥ दुर्वे
लोपि महाभारं वहेदक्लिष्टचेतनः ॥ २१ ॥ इति अश्वगंधाकल्पः सप्तमः ॥ ॥ अथ ब्राह्मी
कल्पः ॥ ब्राह्मी सोमविनिर्दिष्टा दिव्यतेजा महौषधीः ॥ कपोतवल्ली त्वाष्ट्री च सेवप्रख्यास्त

वर्चला॥ १॥ नेत्रस्करी दिव्यदेहकारिणी चापराजिता॥ माहेश्वरी महाशोभा महादेवीप
होत्तमा॥ २॥ अद्भुता च स्मृतिः प्रज्ञा सारस्वतविधायिनी॥ उग्रगंधा जगत्पूज्या विप्रोत्साह
प्रदायिनी॥ ३॥ महास्मृतिकरी प्रज्ञा मेधा सुभगवर्द्धिनी॥ अवधानकरी विद्या कल्पराज
पवित्रभूः॥ ४॥ सारस्वती विचित्राङ्गी दिप्ततेजा महौषधीः॥ ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या
च शीतला॥ ५॥ कषा मधुरा स्वादु पाका पुष्पा रसायनी॥ स्वर्या स्मृतिप्रदा कुष्ट पाण्डुमेह
स्वकासजित॥ ६॥ विषशोथज्वरहरीत ब्रह्ममण्डूकपर्णिनी॥ कल्पमस्याप्रवक्ष्यामि दिव्यं
वक्तुं न शक्यते॥ ७॥ यदि जिह्वा सहस्रास्यात् यदि ब्रह्मा चतुर्मुखः॥ प्रभावमस्य कल्पस्य

तदावक्तुंनशक्यते॥ ८॥आदायपुष्यनक्षत्रेब्राह्मींतांसुपरिक्षिताम्॥अनेनमूलमंत्रेण
चाहरेत्तांसदाशुचिः॥ ९॥ॐनारायण्यैस्वाहा॥पुष्पंफलंचनैवेद्यंधूपंताम्बूलमुत्तमम्॥
ब्राह्मैतुदक्षिणांदत्वामन्त्रंवाराष्टकंजपेत्॥ १०॥हस्तनक्षत्रमादायतत्रउत्पाटयेद्दृशम्॥मंत्रे
णानेनमतिमान्संमन्त्र्यचसमानयेत्॥ ११॥वारकीयास्वकीयाश्चछायायानयतुवैगृहे॥निवे
श्यचशुचौस्कंधेमस्तकेवासमाहितः॥ १२॥अनिर्दिष्टमनाकामंनिर्विघ्नःसमहोत्सवः॥आ
त्मदारपरःश्रीमान्विप्रेभ्योदत्तदक्षिणां॥ १३॥पठेन्मंत्रममुंदिव्यंसुभगंपारमेश्वरम्॥अने
नवक्ष्यमाणेनशुभमंत्रेणमंत्रितम्॥ १४॥ॐसर्वसाधिन्यैस्वाहा॥पेषयेतच्छिलापृष्टेमंत्रे

णानेन सुव्रतः॥ मरीचपिप्पलीशुण्ठी त्रिफला तत्र दीयते॥ १५॥ किञ्चित्मात्रा दशांशा वा वटीमा
साष्टसंमिता॥ कुर्यात्तत्र सदा प्रातर्भक्षयेन्मंत्रमुच्चरन्॥ १६॥ हस्ते धृत्वा वटीं ध्यात्वा शारदां प
रमेश्वरीम्॥ शतावृत्तिं मनुं जप्त्वा भक्षयेच्छुद्धचेतसा॥ १७॥ ॐ महादेवि नैरमितं विश्रामितेजो मे
देहि स्वाहा॥ गुरोरग्रे च पुष्पेण च भक्षयेत्प्रथमे हनि॥ १८॥ चतुर्दशदिवस्यान्ते चापल्यं वचसो
भवेत॥ १९॥ प्रभावो दिव्यमायोति दिव्यचक्षुः प्रजायते॥ अत्यल्पश्च भवेद्वाग्मी लोकरक्षावधा
रणे॥ १२॥ अतिशक्तिर्भवेत्तस्य चिरञ्जीवी महामतिः॥ राजपूज्यो गुणैः सम्यग्वाक्यं विद्वत्स
भास्वपि॥ २०॥ अद्भुतं वीर्यसंप्राप्तिर्देवपूज्यो भवेन्नरः॥ अधृष्यः सर्वलोकस्य तस्य लक्ष्मी

सदैव हि ॥२१॥ ब्रह्मापि क्षोभमाप्नोति यन्मुखोल्लज्जितो भवेत् ॥ अन्ये वागीश्वराश्चैव क्षो
भमायान्ति सत्वरम् ॥२२॥ यदुक्तं नैव शक्नोति दृश्यते तन्मुखे स्मरम् ॥ यदुक्तं कुर्वन्तु कृतिनो देवा
स्तत्स्फूर्जत्यधिकं मुखे ॥२३॥ अलौकिकं वपुस्तस्य तेजोरूपं दुरासदम् ॥ अन्या वागीश्वरो भू
मौ जायते नात्र संशयः ॥२४॥ अनेन सदृशो रूपे ह्यनेन सदृशः कुले ॥ अनेन सदृशो वाग्मी नास्ति
नास्ति च नास्ति च ॥२५॥ हृतदोषये वागारं प्रविश्य प्रतिसंसृष्ट्या क्तोब्राह्मीरसमादाय सहस्र
संपानाभिजप्तं कृत्वा यथाबलमुपयुञ्जीत जीर्णौषधश्चापराह्णे यवागूमलवणां पिबेत् ॥ क्षीर
साल्म्ये वा पयसा भुञ्जीत एवं सप्तरात्रमुपयुज्य ब्रह्मवर्चसी मेधावी भवति ॥१॥ द्वितीय

सप्तरात्रमुपयुज्यग्रन्थमीप्सितमुत्पादयतिनष्टंचास्यप्रादुर्भवतितृतीयसप्तरात्रमुपयुज्यसकृ
दुच्चारितंशतमप्यवधारयति॥एवमेकविंशतिदिनमुपयुज्यात्वलक्ष्मीरपक्रामतिमूर्त्तिम
तिचैनंवाग्देव्यनुप्रविशति॥सर्वाश्चैनंश्रुतयउपतिष्ठन्तिश्रुतधरःपंचवर्षशतायुर्भवति॥ब्रा
ह्मीस्वरसप्रस्थेद्वेघृतप्रस्थंविडंगतण्डुलानांकुडुवंद्वेद्वेपलेवचात्रिवृतोर्द्वादश
हरितक्यामलविभीतकानिश्लक्ष्णपिष्टान्यावाप्यैकध्यंसाधयित्वास्वनुगुप्तंनिदध्यात॥
पूर्वविधानेनमात्रांयथाबलमुपयुंजीतजीर्णेपयःसर्पिरोदनइत्याहारः॥एतेनाऽङ्गमध
स्तीर्यकृमयोनिष्क्रामन्ति॥अलक्ष्मीरपक्रामति·पुष्करवर्णःस्थिरवया॥श्रुतिनिगादि ८१

त्रिवर्षं शतायुर्भवत्येतदेव कुष्टविषमज्वरापस्मारोन्माद विषभूतग्रहेष्वनेषुच महाव्या
धिषु संशोधनमादिशति ॥ इतिब्राह्मीकल्पः ॥ ८ ॥ ॥ अथमण्डूकब्राह्मीकल्पः ॥ शुकु
पक्षेतु संगृह्य पुष्यनक्षत्रसंयुते ॥ समूलपत्र मुत्पाट्य सूक्ष्म सूर्चूर्णंतु कारयेत ॥ १ ॥ विडालप
दमात्रन्तु तच्चूर्णं भक्षयेन्नरः ॥ सप्तरात्र प्रयोगेण कुक्षिरोगं विनाशयेत् ॥ २ ॥ सप्तसप्त प्रयोगे
ण वज्रकायो भवेन्नरः ॥ सर्व रोग विनिर्मुक्तो कामदेवइवापरः ॥ ३ ॥ क्षीरेणदीयते मासं स
र्व रोगनिवारणम् ॥ मासद्वयप्रयोगेण निधानानि च पश्यति ॥ ४ ॥ अदृश्यस्त्वात्रिभिर्मासे
भवत्येवनसंशयः ॥ चतुर्मासेन पश्यन्ति विमानानमराधिपान् ॥ ५ ॥ षण्मासस्य प्रयोगेण

खेचरत्वं प्रजायते ॥ सम्वत्सर प्रयोगेण द्वितीय द्रव शंकरः ॥ ६ ॥ तस्य सर्व प्रयोगेण वन्ध्या
पुत्रवति भवेत् ॥ समूलपत्रं संगृह्य मध्वाज्यैः सह भक्षयेत् ॥ ७ ॥ जलोदरं तथा वात गुल्म
शूलं विनश्यति ॥ कुष्टं भगंदरं चैव श्वासकासज्वरापहम् ॥ ८ ॥ ॐ अमृतोद्भवाय अमृतं
कुरु स्वाहा ॥ इत्यनेन च मंत्रेण मंत्रयित्वा प्रभक्षयेत ॥ मण्डूकब्राह्मीं संगृह्य शुक्लपक्षे
शुभे दिने ॥ ९ ॥ पत्रमूलान्वितां शोष्य छायायां कृत चूर्णिकाम् ॥ भक्षयेत्तु गवां क्षीरैः स
र्वरोगप्रणाशनम् ॥ १० ॥ मण्डूकपर्णीपुष्पार्के चोत्पाट्य च समूलिकाम् ॥ प्रक्षाल्य च ततः
सम्यक् सूक्ष्म चूर्णानि कारयेत् ॥ ११ ॥ घृतभाण्डे ततः स्थाप्य यावत् पुष्पार्के वासरम् ॥ वि

१ मण्डूकपर्णी
मण्डूकपर्णी

ड्वालपदमात्रन्तु काञ्जिकैः सह यः पिबेत् ॥ १२ ॥ योगसिद्धिर्भवेत्तस्य जायते स्थिरयौवनः ॥
आल्याव्य सह दुग्धेन मासैकं सर्वरोगहा ॥ १३ ॥ द्विमासभक्षणाद्देषि बलितं वर्जयेत्सदा ॥ मण्डू
कपर्णिकालघ्वी स्वादु शाकासरा हिमा ॥ १४ ॥ गुणं ब्राह्मीवदेवस्या न्नात्र कार्या विचारणा ॥
एतत्ते सर्वमाख्यातं कल्पराजमनुत्तमम् ॥ १५ ॥ हृतदोषस्य वप्रति संसृष्टभक्तो यथाक्रममागा
रं प्रविश्य मण्डूकपर्णी स्वरसमादाय सहस्रसंपाताभिहुतं कृत्वा यथाबलम् ॥ पयासाऽल्पे
ऽप्यपिबेत्पयोनुपानं वातस्याजीर्णायां यवान्नं पयसा यम्ज्जीताते लैर्वा सह भक्षयित्वा त्री
न्मासान्पयोनुपानं जीर्णे पयसः सर्पिरोदन इत्याहारः ॥ एवमुपयुञ्जानो ब्रह्मवर्चसी श्रुति

निगादी भवति शतमायुरवाप्नोति ॥१॥ त्रिरात्रोपोषितश्चत्रिरात्रमेनां भक्षयेत्त्रिरात्रादूर्ध्वं पयः

सर्पिरिति चोपयुञ्जीत ॥ बिल्वमात्रं पिण्डं वा पयसालोड्य पिबेदेनं दशरात्रमुपयुज्य मेधावी

वर्षशतायुर्भवति ॥२॥ इति मण्डूकब्राह्मीकल्पो नवमः ॥९॥ ॥अथ मुशलीकल्पः॥ अ

थ ब्रवीमि देवेशि मुशलीकल्पमुत्तमम् ॥ स्वर्णपुष्पी च खर्जूरीपत्रवत्यतिशोभना ॥१॥ अति

श्वेता च नाराचा सुवहा तालपत्रिका ॥ गोधापदी च भूताली मुशली दीर्घपत्रिका ॥२॥ मुशली

च द्विधा प्रोक्ता श्वेता वा परसंज्ञका ॥ श्वेता स्वल्पगुणोपेता ह्यपरा च रसायनी ॥३॥ तद्गुणा·

मधुररसं· शीतत्वं· वृष्यत्वं· पुष्टिबलप्रदत्वं· पिच्छिलत्वं· कफदं· पित्तदाहश्रमहरत्वं च·

तन्मूलंतुसमुद्धृत्य छायांशुष्कंसुचूर्णितम् ॥ कर्षंमध्वाज्यसंयुक्तं प्रातः शुद्धः समुल्लिहेत॥
४॥ जीर्णेदुग्धान्नभोजीस्याद्राक्षसान्नंतुवर्जयेत॥ षष्टेमासिभवेद्बालो वृद्धोपिलभतेधि
यम्॥५॥ पयसामुशलीचूर्णंदग्धकायः पिबेत्सुधीः॥ शतवर्षमवाप्नोति शतस्त्रीगमनेप
टुः॥६॥ क्षौद्रेणमुशलीकन्दं सेवितंज्वरनाशनम्॥ गोमूत्रेणचतच्चूर्णंसततंज्वरवेगनुत॥७॥
उष्णोदकेनतच्चूर्णं सेवितंशूलनुद्भवेत॥ जम्बीरनीरसंपीतामुशलीकामलापहम्॥८॥
तद्रजः काञ्जिकैः पीतंसद्यः कुक्षिरुजापहम्॥ तृतीयकंज्वरंहन्याद्वारिणामुशलीरजः॥
९॥ वक्षोरुक्कृकृष्णाकायश्चहन्यात्क्षीरेसेविता॥ अपामार्गयुजापीता वातशान्तिंप्रयच्छति॥

॥९०॥ घृतेन सहितं तस्या चूर्णं वीर्यविवर्द्धनम्॥ नारिकेलाम्बुनापीतं शिरोविस्फूर्तिनाशनम्॥ ११॥
तिलतैलेन तच्चूर्णं हन्यात श्लेष्मगतान्गदां॥ दमनस्य रसैः पीता मुशली पाण्डुनाशिनी॥ १२॥
सूरणेनाशितं चैव राजयक्ष्मगदापहम्॥ आर्द्रकस्य रसैः पीतं तच्चूर्णं शूलवेगजित्॥ १३॥ अ
काण्डफलसारेण जलोदरगदं नयेत्॥ तच्चूर्णं सैन्धवोपेतं दुष्टव्रणविशोधनम्॥ १४॥ जीर्ण
ज्वरगतां रोगां पिप्पलीसहिता हरेत्॥ सवचा मुशली कुर्यान्मूकं वाचस्पतिर्यथा॥ १५॥ भृं
गराजरसोपेता दुष्टमारुतनाशिनी॥ सेविता भूशिरीषेण जरामरणनाशिनी॥ १६॥ लक्ष्म
णामूलसंयुक्ता ऋतुस्नाता पिवेद्यदि॥ कामिनी कदलीकन्दं वन्ध्यापि लभते सुतम्॥ १७॥

नक्रेणालोड्यसंपीतापाण्डुव्याधिविनाशिनी॥निर्गुण्डीरससहितावज्रकायत्वदायिनी
॥१८॥अजामूत्रेणसंपीतावलीपलितनाशिनी॥कालदष्टमथोहन्यात्पटोलेनयुतायदि
॥१९॥मातुलुङ्गरसोपेतंतद्रजःकुक्षिरोगनुत॥नारिकेलाम्बुनापीतामुशलीविषनाशिनी॥
२०॥घृतेनमधुनापीतासर्वकुष्टप्रणाशिनी॥मूलंतस्यासमुद्धृत्यछायांशुष्कंविचूर्णितम्॥
२१॥मधुसर्पिर्युतंभुक्तंदेहशुद्धोशुभेदिने॥जीर्णेपेयंक्षीरमन्नंवातुलानिचवर्जयेत्॥२२॥
वलीपलितनिर्मुक्तोमासमात्रेणमानवः॥स्वर्णपुष्पीतथागोरीनाराचीकुष्टशोधिनी॥२३॥
एतैःखर्जूरपत्राख्यैमण्डलीनामकीर्त्तिता॥एतत्तेसर्वमाख्यातंमुशलीकल्पमुत्तमम्॥२४॥

इतिमुशलीकल्पः दशमः॥१०॥ ॥अथइन्द्रवारुणीकल्पः॥ इन्द्रवारुणीलताविशेषः॥
तन्नामगुणाः॥ विशाला· ऐन्द्री· चित्रा· गवाक्षी· गजचिर्भटी· मृगादनी· अरुणा· गवादनी·
क्षुद्रसहा· सूर्या· विषघ्नी· गजकर्णिका· अमरा· माता· सुकर्णी· सुफला· तारका· वृषमाशी·
पीतपुष्पा· इन्द्रवल्लरी· क्षुद्रफला· वारुणी· बालकप्रिया· विषलता· अमृता· तद्गुणा॥ ति
क्तत्वं· कटुत्वं· शीतत्वं· रेचनत्वं· गुल्मपित्तोदरश्लेष्मकृमिकुष्ठज्वरापहत्वंच॥ इन्द्रवारु
णिकामूलंपुष्येणग्रसमुद्धरेत॥ कटुत्रयैर्गवाक्षीरैः पिष्ट्वातत्तिलकीकृतम्॥ १॥ चन्दनेनस
मायुक्तं छायाशुष्कन्तुकारयेत॥ ललाटे तिलकंकार्यंनृणांवश्यकरंपरम्॥ २॥ इन्द्रवारु

णिकामूलं पुष्यलग्नः समुद्धरेत॥ ऋषणं चगवांक्षीरैः पिष्ट्वा कुर्याद्दृढां दृढाम्॥३॥ छायांशु
ष्कं च तां वक्त्रे धृत्वा मैथुनमाचरेत॥ वीर्यस्तंभनमाप्नोति परमानन्ददायकम्॥४॥ अहोरा
त्रोषितो भूत्वा मूलमुत्पाट्य चूर्णकम्॥ ललाटे तिलकं कृत्वा वश्यसिद्धिर्भविष्यसि॥५॥ तां
वटिकां रक्तचन्दनेन सह संपिष्य यं स्याङ्गुल्याग्रं स्पृशति स वश्यः॥ गोरोचनया सह तिलकं
कृत्वा यथेष्टं रमते द्यूते पराजितो भवति तां श्वेतदारुचन्दनेन सह यस्मै दीयते स वश्यः॥ तां
कांचनफलेन सह यस्मै दीयते सज्वरेण गृह्यते स्नानेन ज्वरमुक्तिः त्रिफलोदकेन त्रिकटुके
न स्नापयेत॥ ॐ नमः सर्वसाधनीय स्वाहा॥ ॐ नमः सर्वसत्वानामर्थसाधनी हुं फट् स्वाहा॥

अनेनमंत्रेण सर्वप्रयोगा अभिमंत्रयीया॥ इति इन्द्रवारुणीकल्प एकादशः॥ ११॥ ॥
अथभृंगराजकल्पः॥ भृंगराजो भृंगरजो मार्कवो भृंगएवच॥ भृंगारकः केशराजो भृंगारः केशरंजनः॥ १॥ अंगारकः पित्तप्रियः केश्यः कुन्तलवर्द्धनः॥ भृंगराज कटुस्तिक्तोरूक्षोस्यकफवातनुत॥ २॥ केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहृत॥ दन्तयोरसायनोबल्यः कुष्टनेत्रशिरार्तिजित॥ ३॥ पुष्पयोगेच संगृह्य भृंगराजं समूलकम॥ आतपे शोषयित्वातु सूक्ष्मचूर्णानिकारयेत॥ ४॥ आरनाले समाऽऽलोड्य पुष्यार्के नतु मेलयेत॥ बिडालपदमात्रंतु परिहारोनविद्यते॥ ५॥ एकमासप्रयोगेण सर्वरोगान्विनाशयेत॥ ततोमासद्वयेनैव सद्यः श्रुतिधरोभवेत॥ ६॥ चतुर्मास

प्रयोगेण किन्नरैः सह गीयते ॥ पंचमे काव्यकर्त्ताच षष्ठे कामाकृतिर्भवेत ।७। सप्तमे परिवर्त्ते
न्नेनखकेशा पुनर्नवाः ॥ दशमासप्रयोगेण जीवेद्वर्षशताष्टकम् ॥ ८ ॥ सम्वत्सरप्रयोगेण सह
स्त्रायुर्भवेन्नरः ॥ कुष्माण्डं कारवेल्लं च वृन्ताकं सर्षपस्तथा ॥ ९ ॥ वर्जयेद्बुद्धिमान्सर्वं सेव्य
मानं रसायने ॥ यथेच्छाभोजिनां पुंसां नैव सिद्धिः प्रजायते ॥ १० ॥ तद्रसं त्रिफलाचूर्णं भावि
तं पलितापहम् ॥ त्रिपक्षमात्राज्जन्तूनामजरामरकारकम् ॥ ११ ॥ काकमाचीरसं भृंगरसेन स
ह भावनात् ॥ द्वादशाहाद्भवेज्जन्तोः पलितस्तंभनं वरम् ॥ १२ ॥ इति भृंगराजकल्प द्वादशः ॥ १२
अथ मुण्डीकल्पः ॥ तत्पर्यायः ॥ मुण्डा वृक्षविशेषः ॥ अलम्बुषा · श्रावणी · फलंकषा · कंद

वृपुष्पा·श्रवणा·भूतघ्री·कुन्तलाह्वणा॥१॥सुरासुरैः स्तूयमानामुण्डियास्त्रिविधास्मृताः॥
सितारक्तातथाकृष्णासत्वराजस्तनामसैः॥२॥गुणैरेतैःक्रमाद्याम्नाकथयामासतांशिवः॥
शुक्लपक्षेचपश्चम्यांपौर्णमास्यांसमाहितः॥३॥रेवतीरोहिणीपुष्येश्रवणार्द्रेद्विजेस्तथा॥अ
भ्यर्च्यगन्धपुष्पाद्यैःसमूलांतांसमुद्धरेत॥४॥छायायांशोष्यसंचूर्ण्यततःकर्मणियोजयेत॥
कर्षमात्रंगवांक्षीरैःपीत्वामासंजरांजयेत॥५॥षण्मासेवज्रदेहस्यात्त्रयातिवह्नियोजनम्॥
द्विरूर्द्ध्वंपश्यतिमेदिन्यांवर्षंभुक्त्वानसंशयः॥६॥ॐ नमोभगवतेरुद्रायस्वाहा॥अनेनमंत्रे
णाष्टोत्तरसहस्त्रमभिमंत्रयेत॥७॥घृतेनमधुनासार्द्धंभुक्त्वानिष्कद्वयंसदा॥तच्चूर्णसेवना

त्सप्तरात्रौ दिव्यशरीरवान् ॥ ८ ॥ द्विसप्तदिवसेनैव ह्यमरत्वमवाप्नुयात् ॥ मासाद्देहस्य का
मं च द्वितीये सुन्दरस्तथा ॥ ९ ॥ तृतीये दिव्यदृष्टिश्च चतुर्थेन जरां जयेत् ॥ पञ्चमे तु सहस्रा
युः षाण्मासे सूर्यतुल्यकम् ॥ १० ॥ दशमे सर्वशास्त्राढ्यः स्वेच्छारूपी तदन्तके ॥ भक्षणाद्द्वा
दशं मासं रुद्रतुल्यो भवेन्नरः ॥ ११ ॥ भिक्षुत्तमाङ्ग परिकल्पित नामधेयं तत्पुष्पपत्रफलद
ण्ड समूलचूर्णं ॥ तत्कारनाल पयसा मधुवारिणाज्यैः षण्मासंसेवितनरं ह्यजरामरत्वम् ॥
१२ ॥ तद्ग्रहणमंत्रः ॐ नमो भगवते ऽअमृतोद्भवायामृतं कुरु कुरु स्वाहा ॥ तच्चूर्णं कर्षमेकै
कं पिबेन्नित्यं शिवाम्बुना ॥ १३ ॥ षण्मासेन रदन्ताश्च केशास्तस्य पतन्ति च ॥ द्वितीयस्य

त्तिमेदिन्यां जायतेनवयौवनम्॥१५॥ इतिमुण्डीकाकल्पः त्रयोदशः॥१३॥ ॥

अथचित्रककल्पः॥ ॥अथातःसंप्रवक्ष्यामि कल्पंचित्रकजंशुभम्॥ एतद्भक्षणमात्रेण जरामरणवर्जितः॥१॥ त्रिविधःश्चित्रकोज्ञेयकृष्णोरक्तोरसायने॥ शुक्लोव्याधिप्रशमनः श्रेष्ठोमध्यःकनीयकः॥२॥ त्रिविधंचित्रकंवर्ज्यंकृमिभिःपरिपीडितम्॥ ग्रामान्तस्थं श्मशानस्थंवल्मीकस्थंचवर्जयेत्॥३॥ गुरुद्वारसमीपस्थंचतुष्पथगतंतथा॥ शूचीपत्रसुरं श्रेष्ठं तथामण्डलपत्रकम्॥४॥ उभेतेचित्रकेग्राह्ये शूचीमण्डलपत्रके॥ कार्तिक्यांमार्गशीर्ष्यां वाउद्धरेत्तुविचक्षणः॥५॥ चित्रकः क्षुपविशेषः तत्पर्यायः काल· कालमूलः· अतिदीप्त·(

रसनियामकत्वं.

मार्जारः अग्निः दाहक महाङ्ग॰ तस्य गुणाः कुष्टघ्नत्व॰ लोहवेधकत्वं॰ रसनियामकत्वं॰ रसायन
त्वंच॰ कृष्णाश्चित्रकमुत्पाट्य गोभिर्नाघ्रातमीश्वरि॥ क्षीरमध्येक्षिपेत्क्षीरं कृष्णवर्णंभवेत्क्षणा
त॥६॥ तस्यपश्चाद्ध्र चूर्णेन पारदंसहमर्दयेत॥ धमेच्च मूकमूषायां बोठंभवतितत्क्षणात॥७॥अहो
रात्रंस्थिरोभूत्वापूजांकृत्वाविधानतः॥ रक्ताम्बरधरो मौनीरक्तगन्धानुलेपनः॥ रक्तमाल्याम्बर
धरोवलिंदत्वाविचक्षणः॥ कृष्णपक्षेतुपञ्चम्यारक्तमाल्योदनेनतु॥८॥ वलिंदत्वामहादेविरक्त
चित्रकमुद्धरेत॥ॐ छिन्धिचित्रायस्वाहा॥ ॐ सत्यवतित्रिशुमहौषधेमाचलशमयहुंफट्स्वाहा॥
समूलपत्रामुत्पाट्यछायाशुष्कंतुकारयेत॥१०॥ सूक्ष्मचूर्णंततः कृत्वा घृतेनमधुनासह॥ कटुत्र

यसमायुक्तं पिंडाल्पदमात्रकम्॥११॥ सप्ताहं भक्षयेत्प्रातः क्षीरसेवी जितेन्द्रियः॥ वर्षपंचशतं जी
विघली पलितवर्जितः॥१२॥ सम्वत्सरप्रयोगेण सहस्रायुर्भवेन्नरः॥ प्रमदाशतगामी स्याद्वली
णावलयौवनः॥१३॥ द्विरष्टवर्षसंकाशो सौ कन्दर्प इव रूपवान्॥ शतसिंहवलोपेतो धने वैश्रवणो
पमः॥१४॥ सततं भक्ष्ययेद्यस्तु सरुद्रोरवितेजवान्॥ जरामृत्युविनिर्मुक्तो चित्रकस्य प्रभाव
तः॥१५॥ रक्तचित्रकचूर्णेन नष्टं दद्याद्विचक्षणः॥ सर्वदोषविनिर्मुक्तः स्तंभमायाति तत्क्षणा
त्॥१६॥ रक्तचित्रकभल्लाततैललिप्तं पुटेनतु॥ चन्द्रार्कपत्रं देवेशि जायते दिव्यकांचनम्॥
१७॥ तन्मूलं सूतकं ताम्रं भृंकुणीतैलसेचनात्॥ एकविंशतिवारेण शुल्वं भवति कांचनम्॥१८॥

चित्रकं मासमेकन्तु तक्रेण सह यः पिवेत् ॥ नश्यन्ति व्याधयः सर्वे कामदेवोपमो भवेत् ॥१९॥
क्षीरेण मासमेकन्तु चित्रकं भक्षयेन्नरः ॥ वज्रदेहो महाकायो महावलपराक्रमः ॥२०॥ मासद्व
यप्रयोगेण दृढकायो जितेन्द्रियः ॥ गजापुनसमो वेगे साक्षाच्छ्रुतिधरो भवेत् ॥२१॥ चित्रकं मा
समेकन्तु गोमूत्रेण तु यः पिवेत् ॥ समस्तव्याधिसमनं रूपवांश्च न संशयः ॥२२॥ चित्रकं मासमे
कन्तु मधुना सह यः पिवेत् ॥ मेधावी प्रेमसम्पन्नः सत्यवाक् प्रियदर्शनः ॥२३॥ जीवेद्वर्षशतं सा
ग्रं वलीपलितवर्जितः ॥ एतत्ते कथितं देवि चित्रकाख्यं रसायनं ॥२४॥ इति चित्रककल्पश्च
तुर्दशः ॥१४॥ ॥अथ श्रीफलकल्पः ॥ विल्वनामगुणाः शाण्डिल्यः शैलूषः मालूर·

श्रीफल· गोहरीतकी· पूतिवात· अतिमङ्गल्य· महाफल· शल्य· हृयगन्ध· शाण्डिल्य· कर्क
टाह· शैलपत्र· शिवेष्ट· पत्रश्रेष्ठ· त्रिपत्र· गन्धपत्र· गन्धफल· दुरारुह· त्रिशिख· त्रिशाख
पत्र· सदाफलं· शिवद्रुम· सत्यफल· सुभूतिक· समीसार॥ फलगुणाः॥ मधुरत्वं· हृद्यत्वं· क
षायत्वं· गुरुत्वं· पित्तकफज्वरातिसारनाशित्वं· रुचिकारीत्वं· दीपनत्वंच· मूलगुणाः।
त्रिदोषघ्नत्वं· मधुरत्वं· लघुत्वं· वान्तिनाशित्वंच· कोमलफलगुणाः स्निग्धत्वं· गुरुत्वं·
संग्राहित्वं· त्रिदोषनाशित्वंच॥ श्रीफलस्तुवरो तिक्तो ग्राही रूक्षोग्निपित्तकृत॥ वातश्लेष्म
हरोबल्योलघुरूक्षश्चपाचनः॥१॥ बिल्वंबालंकषायोष्णं पाचनंवह्निदीपनम्॥ संग्राही

तिक्तकटुकंतीक्ष्णंवातकफापहम् ॥ २ ॥ पक्वंसुगन्धिमधुरंदुर्जरंग्राहिदोषलम् ॥ फल्लेसुपरि
पक्वेऽस्तुयोगुणःसमुदाहृतः ॥ ३ ॥ विल्वादन्यत्रविज्ञेयोविल्वनामगुणान्तरम् ॥ कफवाताम
पित्तघ्नीग्राहिणीविल्वपेशिका ॥ ४ ॥ काञ्जिकेसंस्थितंविल्वंअग्निसन्दीपनंपरम् ॥ अथातःसं
प्रवक्ष्यामिश्रीफलस्यचकल्पकम् ॥ ५ ॥ विल्ववीजानिसंगृह्यसूक्ष्मचूर्णानिकारयेत् ॥ त्रिफ
लाक्वाथतोयेनसप्तवारंविभावयेत् ॥ ६ ॥ ततोनिष्पीड्ययंत्रेणतैलंगृह्यसुसंयतः ॥ स्निग्ध
भाण्डेविनिक्षिप्यभूमौतत्तुनिधापयेत् ॥ ७ ॥ मासमेकंततोद्धृत्यरक्षांकृत्वाविधानतः ॥ वमनंरे
चकंकृत्वाशुद्धकोष्ठःशुभेदिने ॥ ८ ॥ कृष्णाष्टम्यांचतुर्दश्यांपुष्ययोगेनबुद्धिमान् ॥

निर्वातमन्दिरे तैलं कर्षमात्रं पिवेन्नरः॥९॥ उदरे जायते वह्निः पिवेत्क्षीरं पुनः पुनः॥ जीर्णान्ने
भोजनं कुर्याच्छाल्योदनयुतं पयः॥१०॥ दिवसैकेन मेधावी वाधीर्यश्च विनाशयेत्॥ द्विदि
नेन विनश्यन्ति सर्वे रोगा न संशयः॥ ११॥ एवं तद्विदिनं पीत्वा भवेज्जातिस्मरो नरः॥ त्र्यहे
श्रुतिधरः साक्षात्तथा च विस्मितं स्मरेत्॥१२॥ चतुर्थ दिवसे ग्रन्थसहस्राणि च धारयेत ॥
पञ्चमे दिवसे चैवं तथा सारस्वतो भवेत्॥१३॥ षष्ठे व्योम्नि चरेत्साक्षाद्वज्रतुल्यो भवेन्नरः॥
सप्तमे दिवसे चैव सर्वज्ञः प्रियदर्शनः॥१४॥ श्रुतिज्ञः शुभगः श्रीमान्कर्णिकारसमद्युतिः॥
वलीपलितनिर्मुक्तो जीवेद्वर्षसहस्रकम्॥१५॥ शिवतुल्यो भवेच्चैव सदा सेव्योऽमरोपमः॥

सप्ताभिमंत्रितं कृत्वा पश्चात्तैलं पिवेन्नरः ॥१६॥ ॐ नमो वीरजननी स्वाहा ॥ विल्वपत्रं
गृहीत्वा तु छाया शुष्कान्तु कारयेत् ॥ कपिला पयसा ज्येन वटीं कृत्वा तु गोलकम् ॥१७॥
एभिस्तु तिलकं कृत्वा मोहयेत्सर्वतो जगत् ॥ क्षणान्मोहनतां याति प्राणैरपि धनैरपि ॥१८॥
पूर्वाभाद्रपदा ऋक्षे विल्वमूलं पिवेद्बुधः ॥ कर्षमात्रं जलैः पिष्ट्वा भवत्येव महावलः ॥१९॥
विल्वगर्भे पचेत्तैलं गोमूत्राज्यपयोन्वितम् ॥ वाधीर्यं पूरयेत्तेन कर्णौ तत्कफवातजित् ॥२०॥
विल्वपत्ररसं चैव शुण्ठी पिष्ट्वा च चण्डिके ॥ चक्षुषोर्दीयते यस्तु तस्य रोगं विनश्यति ॥२१॥ वि
ल्वस्य चूर्णं पुष्ये तु हुतं वारान्सहस्रसः ॥ श्रीसूक्तेन नरः काल्ये समसुवर्णं दिने दिने ॥२२॥

सर्पिर्मधुयुतं लिह्याद्दलक्ष्मी मलनाशनम्॥ त्वचं विल्वस्य मूलस्य मूलं क्काथं दिने दिने॥२३

प्राश्नीयात्पयसा सार्द्धं स्नात्वा हुत्वा समाहितः॥ दशसाहस्रमायुष्यं स्मृतं युक्तरथं भवेत्॥२४॥

इति श्रीफलकल्पः पञ्चदशः॥१५॥ ॥अथ लाङ्गलीकल्पः॥ लाङ्गलीवृक्षविशेषः॥

तस्य पर्यायः॥ हलिनी· गर्भपातिनी· दीप्ता· विशल्या· अग्निमुखी· हली· नक्ता· इन्द्रपुष्पि

का· विद्युज्ज्वाला· अग्निजिह्वा· व्रणहृत्· पुष्पसौरभा· स्वर्णपुष्पा· वह्निशिखा· तद्गुणाः॥ क

टूष्णत्वं· कफवातनाशित्वं· गर्भान्त· शल्यनाशकारित्वं· परमसारित्वं· कुष्ठदुष्टव्रणना

शित्वं॥अथातः संप्रवक्ष्यामि लाङ्गलीकल्पमुत्तमम्॥ लाङ्गलीनाम विख्याता ओष

धीचोत्तमोत्तमा॥ १॥ तस्यामूलंतुसंगृह्यगन्धकंचैवतथैवच॥ रसेनसहितंतद्वत्ताम्रपत्राणि
लेपयेत्॥ अग्नौसंतापयेद्द्वित्रिपुटंकाञ्चनंभवेत्॥ सुखप्रसवनंकुर्यात्प्रसत्तामिदमौषधं॥
३॥ जलेनलाङ्गलीकन्दंपिष्ट्वाहस्तेप्रलेपयेत्॥ तेनैवश्रीकरेपृष्ठेद्रवत्यग्नौघृतंयथा॥ ४॥ स
र्वेषांद्रावयोगानांमंत्रराजंशिवोदितम्॥ अष्टोत्तरशतंजप्त्वातत्तद्योगंप्रसाधयेत्॥ ५॥ ॐ
नमोभगवतेउड्डामरेश्वरायस्त्रीणांमदंपातय२स्वाहाहुं: ठ: ठ: करतलोत्पाटितलाङ्गली
कन्दलिप्तसकलगात्रोयुद्धेभीमसेनस्यापिदर्पंहरति॥ ६॥ लाङ्गलीकन्दमादायकर्कोटी
कन्दमेवच॥ रसंतन्मध्यगंकृत्वास्वेदयेन्मर्दयेत्पुन:॥ ७॥ म्रियतेनात्रसन्देहोध्मातस्तीव्रा

तपेन च॥ शुकचञ्चुगतं सर्वं पुटयेद्ध्मापयेत्ततः॥ ८॥ धतांशवेधकं तच्च देहसिद्धिकरो भवेत्॥ इति ते कथितं सम्यक् लाङ्गलीकल्पमुत्तमम्॥ ९॥ इति लाङ्गलीकल्पः षोडशः॥ १६॥
अथ देवदालिकल्पः॥ देवदाली लताविशेषः॥ तत्पर्यायः जीमूतक· कण्टफला· गरा· वेणी· महाकोशफला· कटुफला· घोरा· कदम्बि विषहा· कर्कटी· सारमूषिका· वृत्तकोशा· आखुविषहा· दाली· रोमसपत्रिका· तुरङ्गी· सुतकोरी· तद्गुणाः॥ तिक्तोष्णत्वं· पाण्डु कफ दुर्नाम श्वास कास कामला भूतनाशित्वं च·॥ फलगुणाः तिक्तत्वं कृमि श्लेष्म गुल्म शूलार्शो वातनाशित्वं पीता गरा स्वरस्पर्शा विसर्पि गरनाशिनी॥ देवदाल्या महौषध्याः क

त्वंच वध्याम्यतः परम् ॥ सा श्वेताव्याधिसमने कृष्णा पीता रसायने ॥ १ ॥ पूर्णिमायां त्रयोदश्यां
९।८ ग्रस्ते दिवाकरे ॥ अथ कृष्णपञ्चम्यामिमां विधिवदुद्धरेत् ॥ २ ॥ देवदालीफलं देवि विष्णु
क्रान्ता च सप्तकम् ॥ मूर्च्छये द्रुन्धयेच्छिप्रं धुत्वं हेमकरोति च ॥ ३ ॥ देवदालीफलं मूलमीश्व
रीमूलमेव च ॥ तोयेन मर्द्दितं कृत्वा वङ्गं च रजतं भवेत् ॥ ४ ॥ देवदालीफलं क्षीरं मासपत्रं घृतं म
धु ॥ अङ्कोल्लैर्योनिकुसुमैर्लेपना द्रावणं भवेत् ॥ ५ ॥ समूलफलपर्णन्तु सूक्ष्मचूर्णं विधाय च ॥ पिबे
दुष्णेन तोयेन मार्जारपदमात्रया ॥ ६ ॥ प्लीहं भगंदरं वातं गुल्मं कामलमद्भुतम् ॥ हन्ति गोमूत्र
संपीतं सर्वकुष्टानि नाशयेत् ॥ ७ ॥ देवदालीरसो गन्धपाषाणेन समन्वितम् ॥ द्रावयेत्सर्वलो

हानि पारदस्यापि यन्धकृत॥ ८ ॥ देवदालीरसंगृह्य द्विगुणं चरसं तथा॥ धात्रीरसेन संयुक्तं

पाचयेल्लोहभाजने ॥ ९ ॥ धात्रीशुष्के न्धनेनैव पाचयेन्मृदुवह्निना॥ ततोनश्यं प्रकुर्वीत भु

क्तोतक्षीर भोजनम्॥ १० ॥ अपस्मारं क्षयं कुष्टं वातं नाशयति क्षणात॥ प्रेतरक्षांसि भूतानिस

प्ताहाद्वशमानयेत॥ ११ ॥ देवदालीरसंक्षौद्रं सर्पिश्चामलकीरसम्॥ सहभुक्त्वा तु मे धा धी श्रु

ति ह्वय धरो भवेत॥ १२ ॥ देवदालीरसं चैव क्षीरेण सह सर्पिषा॥ पिबेदेक महोरात्रं तस्य लिङ्गं स

मुद्भवेत॥ १३ ॥ सपत्रां देवदालीं च विधिना च समाहरेत॥ पिष्ट्वा च गुटिकां कृत्वा छायायां परिशो

षयेत॥ १४ ॥ प्रत्यूषे भक्षयेत्प्राज्ञः प्रणम्य वृषभ ध्वजम्॥ नश्यन्ति व्याधयः सर्वे वातगुल्मादि ५८

३० देवदालीरसं क्षौद्रं पारदं प्रणवं तथा॥ तस्य कर्म प्रयोगेण वन्ध्या प्रसमनं भवेत॥ १२ ॥ २

काश्चये॥१६॥देवदाल्यास्तु पञ्चाङ्गं सूक्ष्मं चूर्णन्तु कारयेत्॥ तच्चूर्णं सर्पिषा ऽलोड्य यः पिवेत्स
प्तरात्रकम्॥१७॥ सर्वभूतवशीकर्ता स्त्रीणां प्रियतमो भवेत्॥ देवदालीरसं गृह्य श्वेतसिद्धार्थ
संयुतम्॥१८॥लक्ष्मणाया श्चूर्णयुक्तं गुटिका कारयेद्बुधः॥ सुवर्णवेष्टितं कृत्वा शिखायां वन्ध
येन्नरः॥१९॥ राजानो वश्यतां यान्ति स्त्रियश्च पुरुषस्तथा॥ नश्यन्ति सर्वरोगाणि न च रक्षज भ
यं तथा॥२०॥शुक्लपक्षे पौर्णमास्यां शुभे पुष्ययुते हनि॥ विधानेन वलिं दत्वा पश्चाङ्गन्तु समुद्ध
रेत्॥२१॥ देवदालीरसं तुल्यं मधुसर्पिस्समन्वितम्॥ सप्तरात्रं पिवेन्नित्यं मेधावी जायते नरः॥
२२॥ एकमासप्रयोगेण जीवेद्वर्षशतद्वयम्॥ अम्लं च लवणं चैव वर्जयेच्च सुबुद्धिमान्॥२३॥

नमस्कृत्यसिताष्टम्यांचतुर्दश्यांततोनरः॥ जपेदष्टसहस्रंचहोमान्तेसंख्ययापुनः॥ २४॥ अ
नेनैवप्रयोगेणनमस्कृत्यजितेन्द्रियः॥ प्रदक्षिणात्रयंकृत्वापूजयित्वाविधानतः॥ २५॥ ॐ
नमोभगवतेउड्डामरेश्वरायसोमसंभवायदेवदालींनमामिस्वाहा॥ अथन्यासः॥ ॐमहे
शायनमः हृदयायनमः॥ ॐ भूताधिपतयेनमः शिरसेस्वाहा॥ ॐ अमृतगणायनमः शि
खायैवषट्॥ ॐ मांरक्षरक्षस्वाहा कवचायहुम्॥ ॐ देवदालीमहाभूताधिपतयेनमः
नेत्रत्रयायवौषट्॥ ॐमहाबलायस्वाहा अस्त्रायफट्॥ सप्तजाप्येनमंत्रेणउद्धरेत्प्रयतो
नरः॥ प्राङ्मुखोदङ्मुखोवापिउत्पाटयसुसमाहितः॥ २६॥ प्रक्ष्याल्योलूखलेचैवरसंसंगृ ५५

यलतः॥

वमनं रेचनं कृत्वा खादेदग्निप्रमाणतः॥२७॥ भक्षणमंत्रः॥ ॐ देवप्रयत्नेन निर्विघ्नंजायते ॐ
नमः स्वाहा॥ एकमासप्रयोगेण छिद्रं पश्यति मेदिनीम्॥ जीवेद्वर्षसहस्त्रं तु महातेजो बला
न्वितः॥२८॥ आदित्यश्च त्रिभिर्मासैर्जायते नात्र संशयः॥ अत्रैव पंचमे मासि महादेवं प्रप
श्यति॥२९॥ विष्णुं पितामहं चैव ये चान्ये दिविगामिनः॥ निमिषेण नरो याति योजनानां सहस्त्र
कम्॥३०॥ अन्यं तु संप्रवक्ष्यामि प्रयोगं शृणु सुन्दरि॥ औषध्या च्चुरसं चैव लक्ष्मणा रसस्तथा
॥३१॥ उदक्याये च तं दत्वा सत्पुत्रं जनयिष्यति॥ वन्ध्या पि लभते नारी सत्पुत्रं चीरजीविनम्॥
३२॥ अस्या रसं घृतं क्षौद्रं क्षीरयुक्तं तु यः पिबेत्॥ रमते मुदितः स्त्रीभिस्तस्य लिङ्गं दृढं भवेत्॥३३॥

अस्यारसं घृतं क्षौद्रं सर्पिरामलकीरसम्॥ पीतमात्रेणमेधावीसर्वश्रुतिधरोभवेत्॥ ३४॥ अस्याम्
त्वंतु संगृह्य सूक्ष्मचूर्णानिकारयेत्॥ विडालपदमात्रन्तु पिबेदुष्णेनवारिणा॥ ३५॥ वातगुल्मो
दरप्लीहाकुष्टानिच भगंदरम्॥ कामलादिमहारोगाः प्रणश्यन्तिनसंशयः॥ ३६॥ अस्याचूर्णन्तु
संगृह्य वाजिगन्धासमन्वितम्॥ सर्पिषाभक्षयेन्नित्यंवशीकरणमुत्तमम्॥ ३७॥ यांयांकामय
तेनारीं तासांभवतिवल्लभः॥ अपरोमदनोभूत्वारमतेह्यंगनाशनम्॥ ३८॥ सिद्धार्थदेवदालिश्च
लक्ष्मणाश्वविधानतः॥ पीत्वानारीसहस्रंचरमतेनात्रसंशयः॥ ३९॥ अस्यारसंस्वहस्तेनपाचयि
त्वात्र्यहंपिबेत्॥ तत्क्षणाद्वशमायान्तिनार्योमदनविह्वला॥ ४०॥ अस्यारसन्तुकेतक्यायोनेत्रे

स्वाञ्जयेत्सदा॥ सतु सर्वाणि भूतानि पश्यन्त्यत्र न संशयः॥४१॥ अस्या रसस्तु देवेशि विष्णुक्रान्ता
समन्विता॥ पारदं बद्धयेदाशु तारं हेम करोति च॥४२॥ अस्या रसं तु संगृह्य कृष्णगोक्षीरसंयुतं॥
पीत्वा नष्टया लभेत्पुत्रं नात्र कार्या विचारणा॥४३॥ इतिते कथितं देवि देवदालीविधानकम्॥
गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित्॥४४॥ इति देवदालीकल्पः सप्तदशः॥१७॥ ॥
अथ गुञ्जाकल्पः॥ गुञ्जा लताविशेषः॥ तत्पर्यायः कृष्णला· सागुञ्जा· रक्तिका· काकादनी·
काकतिक्ता· काकजङ्घा· शिखण्डिनी· चूडामणि· सौम्या· अरुणा· शीतपाकी· उच्चटा· कृष्ण
चूडिका· काम्बोजी· भिल्लभूषणा· वल्या· अस्याबीजगुणाः॥ तीक्ष्णोष्णत्वं· कुष्ठव्रणनाशि

त्वं·सिफगुणाः वान्तकारित्वं· धूलविषनाशित्वंच· वश्यकर्मणि श्वेताप्रशस्ता·॥अथेदेविप्र
वक्ष्यामिगुञ्जाकल्पकमुत्तमम्॥श्वेताम्वरधरोभूत्वाशुचिदेशसमाहितः॥श्वेतगुञ्जायाहस्ते
कृष्णचतुर्दश्यांश्वेतगुञ्जीयमूलकम्॥ताम्बूलेनप्रदातव्यंसर्वलोकवशंकरम्॥शिलारेच
नतन्मूलंवारिणातिलकेकृते॥संभाषणेनसर्वेषांवशीकरणमुत्तमम्॥स्वर्णवेष्टिततन्मूलंमु
द्रिकांधारयेद्बुधः॥तद्वाक्याद्वशमायान्तिप्राणैरपिधनैरपि॥चर्वयित्वातुतन्मूलंतेनैवतिल
केकृते॥दृष्टमात्रेवशंयातिनारीवापुरुषोपिवा॥ॐमहामायेआद्यवज्रकिरणेशिवरक्षाक्ष
मवेममादि·अमृतंकुरुकुरुस्वाहा॥श्वेतगुञ्जात्रिपुष्यान्तिष्येसंगृह्यगोरोचनकुंकुमेनसहादि

त्यवारेतिलकंकारयेत॥तस्यकामवाणविमोहिताविह्वलाभवति॥ॐ ह्रीं क्लीं हुं फट्स्वाहा॥
इदंकामवाणतिलकं॥गृहित्वाशुभनक्षत्रे श्वेतायाश्चैवमूलकम्॥ धारयेद्दक्षिणेबाहौद्यूत
कार्येजयोभवेत॥उत्तराभिमुखंग्राह्यंश्वेतगुञ्जीयमूलकम्॥कट्यांबध्वाविमुच्येतगर्भेपु
त्रन्नुतत्क्षणात॥उदरेचसमालोड्यश्वेतगुञ्जाफलंक्रियत॥सुखःप्रसवमाप्नोतितत्क्षणा
न्नात्रसंशयः॥मूलंतुश्वेतगुञ्जायावक्त्रस्थंविषनाशनम्॥श्वेतगुञ्जाफलंचूर्णंक्षीरेण
पिवतेतुयः॥रात्रौकामसमोभूत्वाविचरेत्स्मरमंदिरे॥गुञ्जामूलञ्चकर्णाभ्यांवद्धंदन्तकृ
मिप्रणुत॥श्वेतगुञ्जोत्थितंमूलंमुखस्थंदुष्टतुण्डजित॥श्वेतगुञ्जोत्थितंमूलंकक्षेउत्तर

माद्रके ॥ उत्तराभिमुखं ग्राह्यं दिव्यस्तंभकरं परम् ॥ पुष्यर्क्षे श्वेतगुंजाया मूलमुद्धृत्य धारयेत् ॥ हस्ते क।
ड्गभयं नास्ति संग्रामेन कदाचन ॥ गन्धधूपबलीं दत्वा श्वेतपुष्पैश्च पूजयेत् ॥ दीपप्रज्वालनं तत्र अ
क्षदिक्षुबलिं हरेत् ॥ २ ॥ खदिरस्य तु कीलेन मुनक्षत्रे शुभे दिने ॥ उत्पाटयेन्मूलमस्या मंत्रेणानेन
मंत्रवित् ॥ ३ ॥ ॐ नमो भगवति श्वेतवल्ली श्वेतपर्वतवासिनी सर्वकार्याणि कुरु कुरु अप्रतिहतं नमो
नमः स्वाहा ॥ पुष्यार्केन समुद्धृत्य तन्मूलं तु विचक्षण ॥ सर्पदष्टस्तु लेपेन निर्विषो भवति क्षणात् ॥
४ ॥ वचाया सहितं तस्या मूलं नस्यं च दीयते ॥ निर्विषं भवति क्षिप्रं कालदष्टोपि जीवति ॥ ५ ॥ तस्य मू
लं मुखे क्षिप्य दुष्टानां स्तंभनं भवेत् ॥ कण्ठे बध्वा च बालानां सर्वग्रहनिवारणम् ॥ ६ ॥ तस्य मूलं

।शिखायां बध्वा ह्यात्मरक्षां करोति हि ॥ कट्यां बध्वा च तन्मूलं मूढगर्भं प्रसूयते ॥ ७ ॥ गोरोचनसमा
युक्तं तन्मूलं मधुना सह ॥ खाने पाने प्रदातव्यं वशीकरणकं स्त्रियाः ॥ ८ ॥ तन्मूलं तु मुखे क्षिप्य
सभामध्ये विशेन्नरः ॥ सर्वदुष्टमुखस्तंभो मतिस्तंभं च विन्दति ॥ ९ ॥ तस्य मूलं तु संगृह्य आत्मपं
चमलैः सह ॥ यस्य पाने प्रदीयन्ते स वश्यो भवति ध्रुवम् ॥ १० ॥ तमेव मूलं बृहतीफलस्य च मधुना
सह ॥ लिङ्गप्रलेपनाच्चैव द्रावणं मोहनं वशम् ॥ ११ ॥ गले बद्धं तु तन्मूलं कृमिनाशकरं भवेत् ॥
तन्मूलं लेपमात्रेण नाडीव्रणविशोधनम् ॥ १२ ॥ तस्य मूलं समुत्पाट्य आत्मशुक्रेण भावये
त् ॥ यस्मै प्रदीयते भोक्तुं सा वश्या भवति ध्रुवम् ॥ १३ ॥ गुञ्जाफलं श्लक्ष्णपिष्टं लेपयेत्काष्टपा

दुकाम्॥ विनाव ध्मानरोगच्छेदको शमेकं न संशयः॥ १४॥ लघुदारुमयं पीठं गुंजापिष्टेन लेप
येत्॥ शुष्कमेतज्जले सार्द्धमुपविष्टं न मुञ्चति॥ १५॥ गुंजावीजं त्वचोन्मुक्तं चूर्णं भाव्यं नृमूत्रकैः॥
सप्ताहं यत्नतः कांस्यपात्रे घर्मे समुद्धरेत्॥ १६॥ तैलमादाय तल्लिप्तं पूर्ववत्पादुकागतिः॥ श्वेत
गुञ्जारसेश्चैव सितसूत्रं विभावयेत्॥ १७॥ तत्सूत्रं वर्तिका दीपं प्रज्वाल्य ग्राह्य कज्जलम्॥ तेना
ञ्जितो नरश्चित्रं दिवा पश्यति तारकम्॥ १८॥ अक्षपत्ररसैः पिष्टं गुञ्जामूलं दिनान्तके॥ अञ्जि
ताक्षो नरः पश्येत्पिशाचमतिकौतुकम्॥ १९॥ श्वेतगुञ्जीयमूलं तु ऋक्षेहवुध्यसंज्ञके॥
उत्तराभिमुखं ग्राह्यं वाणस्तंभकरं परम्॥ २०॥ श्वेतगुञ्जारसेनैव सर्वाङ्गं लेपमाचरेत्॥ अ

म्रिताशिसुमध्यस्थो भ्रममाणो न दह्यते ॥२१॥ ॐ वज्रकिरणे अमृतं कुरु कुरु स्वाहा ॥ मू
लन्तु श्वेतगुञ्जाया समंत्रयत्र निःक्षिपेत् ॥२२॥ काष्ठभारशतेनापि अन्नपाको न जायते ॥
॥२३॥ ॐ नमो महामायेवा ह्रूं रक्ष स्वाहा ॥ मूलंतु श्वेतगुञ्जाया कुसुंभरसपेष्टितम् ॥ तेनैव र
ञ्जयेद्वस्त्रं तद्वस्त्रं स्वांग वेष्टितम् ॥२३॥ गंभीरजलमध्येतु यावदिच्छति तिष्ठति ॥ जल
स्तंभमिदं ख्यातं गुञ्जामंत्रेण मंत्रितम् ॥२४॥ ॐ नमो भगवते रुद्राय जलं स्तंभय ठः ठः ठः ॥
पुष्यार्के श्वेतगुञ्जाया विधिना मूलमुद्धरेत् ॥२५॥ मुखाक्षि नीरैः संपिष्ट्वा मधुना सह चा
ञ्जयेत् ॥ अञ्जिताक्षो नरस्तेन निधि पश्यति भूगतम् ॥ इत्येतत्कथितं देवि गुञ्जकल्पं मनो

हस्तम् ॥ २६ ॥ ॐ नमो देवदैत्यसञ्जीविनि सर्वशत्रुवशंकरे ॥ अरिमोहिनी त्रासोन्मादिनी
अमृते स्वाहा ॥ सर्वप्रयोगेषु अयमेव मंत्रः ॥ इति गुञ्जाकल्पः अष्टादशः ॥१८॥ ॥
अथ निम्बकल्पः ॥ निम्बपर्यायः ॥ अरिष्ट · सर्वतोभद्र · हिंगुनिर्यास · मालक · पिचुमर्द · अ
र्कपादप · कैटर्य · वरत्वच · छर्दिघ्न · प्रभद्र · पारिभद्र · काकफल · कीरेष्ट · नेता · सुमना · वि
शीर्णपत्र · पित्तमारक · शीत · तिक्तक · अस्यगुणाः ॥ शीततिक्तत्वं · कफव्रणकृमिवमिशो
थशान्तिकारित्वं · बलासबहुविधपित्तनाशित्वं · लघुत्वं · ग्राहित्वं · कटुपाकित्वं · अ
ग्निवातकारित्वं · श्रमतृट्काशज्वरारुचिछर्दिकुष्ठहृल्लासमेहनाशित्वंच ॥ तत्पत्रगुणाः

नेत्रहितकारित्वं॰ कृमिपित्तविसर्पवातरोचककुष्टनाशित्वंच॰ वातलत्वं॰ कटुपाकित्वंच॰ तत्फ
लगुणाः॥ रसेतिक्तत्वं॰ पाकेकटुत्वं॰ भेदनत्वं॰ स्निग्धत्वं॰ लघुत्वं॰ उष्णत्वं॰ कुष्टगुल्मार्शकृमि
मेहनाशित्वंच॥ तत्तैलगुणाः॥ नात्युष्णत्वं॰ कृमिकुष्टकफत्वग्दोषव्रणकण्डूतिशोथहारि
त्वं॰॥ पित्तलत्वंच॥ पुष्पकालेच पुष्पाणि फलकालेफलानिच॥ संगृह्य च प्रयत्नेन मूलंपत्रं
त्वचंतथा॥ १॥ छायाशुष्कंचतच्चूर्णं भावयेत्खदिरांबुना॥ चित्रकोथविडङ्गानि धात्रीभ
ल्लातकंतथा॥ २॥ हरीतकीवचाचैवगवांक्षीरेण संयुतः॥ कासमर्दकबीजानी पिप्पलीमरिचा
निच॥ ३॥ द्वेहरिद्रे लोहचूर्णं संयुक्तंतत्प्रमाणतः॥ भावितंभृंगराजेन पंचनिम्बेनतत्समम्॥

४॥विडाल्लपदमात्रन्तु पयसालोडितंपिबेत्॥ वारिणायःपिबेत्प्राज्ञःशुद्धकोष्ठेशुभेदिने॥पापीन
मात्रेणदेवेशितक्षणाद्भवबीर्यवान्॥नकिञ्चित्परिहास्तिभोजनञ्चयथेष्टकम्॥६॥मासद्वित्रिप्र
योगेण जायतेवीर्यवान्नरः॥अष्टाविधञ्चकुष्ठञ्चनाशमायान्तिमूलतः॥७॥वातगुल्मञ्चप
लितंव्याधिन्सर्वानशेषतः॥ हन्तिसर्वाणिमेहानिभवेच्चन्चन्द्रदर्शनः॥८॥पञ्चवर्षशतंजीवि
जरामृत्युविवर्जितः॥सद्यःप्रत्ययकारञ्चपञ्चनिम्बरसायनम्॥९॥निम्बकाष्ठस्यधूपेनधूप
यित्वाभगंपुनः॥सुभगास्याच्चसानारीपतिंदासंकरोतिच॥१०॥महानिम्बस्यपुष्पाणिरविदिने
यगतेरवौ॥अव्यमेकंनभीतिस्याद्विपान्तस्यनसंशयः॥१२॥प्रक्षाल्यनिम्बस्यजलेनभूयस्तस्ये
२घृतेनसहहोमयेत॥सप्तरात्रेवशंयान्तियदिसामामनोरमा॥११॥मसूरनिम्बपत्राणि२

वकल्केन विलेपयेच ॥ त्यजेश्रुवया चिरकालमूतं गन्धं वराङ्गस्य न संशयोत्र ॥ १३ ॥ निम्बं
विल्वदलानाञ्च चूर्णयामलकस्य च ॥ प्रत्यहं भक्षयेद्यस्तु तस्य कुष्टं विनश्यति ॥ १४ ॥ निम्ब
पत्ररसं चैव दक्षकर्णप्रपूरणात् ॥ सर्वाक्षिरोगान्नश्यन्तीत्यनुभूतमिदं स्मृतम् ॥ १५ ॥ इति निम्ब
कल्प एकोनविंशः ॥ १९ ॥ ॥ अथ श्वेतार्ककल्पः ॥ शृणु पार्वति श्वेतार्कं सुगुप्तं परमौषधं ॥
वदाम्यहं तव स्नेहाल्लोकानां हितकाम्यया ॥ १ ॥ विधानं तस्य वक्ष्यामि कथ्यमानं निबोध मे ॥ अ
स्य महात्म्यं विस्तारं शृणुष्व कमलानने ॥ २ ॥ सर्वेषामौषधीनान्तु श्वेतार्कश्चोत्तमोत्तमाः ॥ पुष्या
र्केण गृहीतस्तु श्वेतार्कः सर्वसिद्धिदः ॥ ३ ॥ अंगुष्ठपर्वमात्रन्तु कारयेद्गणनायकम् ॥ रक्तपुष्पस

हस्त्रेणपुष्पधूपाक्षतैस्तथा ॥ ४ ॥ आराध्यगणनाथन्तुनैवेद्येनापियत्नतः ॥ दिनमेकन्तुसंपूज्यमंत्रे
णानेनसुव्रते ॥ ५ ॥ ॐगणपतयेनमः ॥ द्यूतेचव्यवहारेचराजद्वारेतथैवच ॥ जयोभवेन्नसन्देहो
युद्धेचैवतुसर्वदा ॥ ६ ॥ श्वेतार्केणैववदेवेशिवाग्वादिनींचकारयेत् ॥ सारस्वतंभवेत्तस्यनात्रका
र्याविचारणा ॥ ७ ॥ मुखस्तंभकरीशत्रोःसर्वसिद्धिवरप्रदा ॥ ॐह्रींवदवदवाग्वादिनीस्वाहा ॥
मंत्रेणानेनसंपूज्यध्यात्वादेवींसरस्वतीम् ॥ ८ ॥ अनेनैवप्रकारेणभानुपूजांसमाचरेत् ॥ ॐसः
सूर्यायस्वाहा ॥ प्रसन्नोभवतेसूर्योददातीप्सितमेवच ॥ ९ ॥ यस्यहस्तेरविस्तस्यसौभाग्यजननं
परम् ॥ विजयोभवतेतस्यसदासर्वत्रशैलजे ॥ १० ॥ तस्यंकारंकरिवध्वातत्सूत्रेणवेष्टयेत् ॥

६१

मैथुने कृयमाणेतु शुक्रस्तंभं करोति हि ॥ ११ ॥ तस्य क्षीररसं गृह्य सूतकश्चविमर्दयेत ॥ एकविं
शद्दिनं चैवसेवयेच्चविचक्षणा ॥ १२ ॥ वली पलितनिर्मुक्तो जरामरणवर्जितः ॥ नवनागवलं
स्यसर्वज्ञो विजयी भवेत ॥ १३ ॥ तस्य सूत्रन्तु संगृह्य पद्मसूत्रेण वेष्टयेत ॥ नरतैलेन प्रज्वाल्य
श्मशानाग्नौ विचक्षणः ॥ १४ ॥ सपश्येत निधानानि तथा च बिमलानि च ॥ निर्विघ्नं भवते तस्स
दीपस्यास्य प्रभावतः ॥ १५ ॥ पञ्चाङ्गं तस्य संगृह्य छायाशुष्कन्तु कारयेत ॥ सूक्ष्मचूर्णं ततः
कृत्वा विडालपदमात्रकम् ॥ १६ ॥ सर्वव्याधिविनिर्मुक्तः सुन्दरप्रियदर्शनः ॥ नवनागवलं
तस्य कान्त्या सूर्य इवाऽपरः ॥ १७ ॥ श्वेतार्कस्तु समुद्धृत्य चूर्णं कृत्वा प्रयत्नतः ॥ आदौ सूर्यनम

त्वा

स्कृविधिवत्सृजयेत्ततः॥१८॥प्रातरुत्थायजीर्णान्नंगव्यक्षीरेणसंपिबेत्॥भवेच्छ्रुतिधरोधीरोव
लीपलितवर्जितः॥१९॥कामदेवेनसदृशःसर्वशास्त्रविशारदः॥मासमात्रप्रयोगेणजीवेद्वर्षशत
त्रयम्॥२०॥सर्वविनिर्मुक्तोनरानागवलोपमः॥श्वेतार्कमूलकंहस्तेवध्वादेशान्तरंव्रजेत्॥
२१॥भूताःप्रेताःपिशाचाद्याडाकिन्योगुह्यकास्तथा॥दृष्टिमात्रात्पलायन्तेश्वेतार्कस्यप्रभा
वतः॥२२॥श्वेतार्करोचनांचैवगोघृतेनचपेशयेत्॥ललाटेतिलकंकृत्वात्रैलोक्यंवशमानये
त्॥२३॥श्वेतार्कस्यदलंचैवचन्दनेनैवपेषयेत्॥एतद्वाङ्नामुक्ताकिन्नरीभवतिध्रुवम्॥२४॥
कट्यांवध्वाचतन्मूलंरमणीवैरमेद्बुधः॥धारयेच्चनरःशुक्रंस्त्रियंचवशमानयेत्॥२५॥श्वेतार्कं

पद्मपत्रंचकद्व्यांवध्वारमेत्स्त्रियम्॥ धारयेत्पतितंशुक्रंयतनारीरमेदपि॥२६॥श्वेतार्कमूल
मादायरेतसासहपेषयेत्॥तिलकंकारयेद्यस्तुतस्यविश्वंवशंभवेत॥२७॥स्वरसंमधुसंयुक्तं
श्वेतार्कतुलयासह॥यावत्प्रज्वलतेदीपस्तावच्छुक्रंनक्षरेत्॥२८॥नाभिपद्मतलेवध्वात
न्मूलंदक्षिणेकरे॥धारयेच्चसदादेविसौभाग्यंपरमंभवेत॥२९॥पुष्यार्केणगृहीत्वातुश्वेता
र्कस्यचमूलकम्॥धारयेद्दक्षिणेहस्तेसिंहवाधभयंनहि॥३०॥अर्कमूलंसमुत्पाट्यउत्तरेका
दिवासरे॥तन्मूलंरक्तसूत्रेणधारणंश्रीपदापहम्॥३१॥पश्चाङ्गंचूर्णयेद्धीमान्मध्वाज्येनतुभ
क्षयेत॥जीर्णान्तेभोजनंकुर्यात्षष्टिकाक्षीरसंयुता॥३२॥वर्जयेत्तैलमम्लंचमासमेकन्तुभक्ष

शोफानिलशूलवन्ध्योदराध्मानश्वासश्लीपदनाशित्वं ॥ शुण्ठी रूक्ष्यामवातघ्नी पाचनी क
टुकालघुः ॥ स्निग्धोक्षा मधुरा पाके कफवातविबन्धनुत् ॥ १ ॥ वृष्या श्वयथोचनिश्वासशूलका
सहृदामयान् ॥ हन्ति श्लीपदशोफार्शआनाहोदरमारुतान् ॥ २ ॥ आग्नेयगणभूयिष्ठं तोयांशं
परिशोषयेत् ॥ संगृह्णाति मलं तत्तु ग्राही शुण्ठ्यादयो यथा ॥ ३ ॥ विबन्धभेदिनी यातु साकथंग्रा
हिणी भवेत् ॥ शक्तिर्विबन्धभेदस्या यतोन्यमलपातने ॥ ४ ॥ शुण्ठी तु कफवातघ्नी सस्नेहल
घुदीपनी ॥ विपाके मधुरा वृष्या हृद्योष्णा कटु रोचनी ॥ ५ ॥ शुण्ठीकल्पं प्रवक्ष्यामि शृणु
ष्व प्राणवल्लभे ॥ उत्तमं नागरं ग्राह्यं चूर्णितं वस्त्रगालितम् ॥ ६ ॥ गुडेन मधुना गव्यसर्पिषाम

र्दितंभृशम्॥सुस्निग्धभाण्डेनिःक्षिप्यधान्यराशौनिधापयेत्॥७॥मासमात्रंसमुद्धृत्यकृत्वा
कायविशोधनम्॥सुदिनेभक्षयेत्प्रातर्विडालपदमात्रकम्॥८॥दिनसप्तप्रयोगेणसर्वान्रो
गान्विनाशयेत्॥षण्मासयोगतोजीवोजीवेद्वर्षशतत्रयम्॥९॥बृहस्पतिसमोबुध्यासर्व
शास्त्रविशारदः॥नागार्जुनसमाख्याताकल्पोयममृताभिधः॥१०॥इतिशुण्ठीकल्पएक
विंशतिः॥२१॥ ॥अथहरीतकीकल्पः॥अभयात्वव्यथापथ्यावयस्थापूतनाऽमृ
ताः॥हैमवतीचेतकीचश्रेयसीचशिवातथा॥१॥कायस्थाचसुधाकन्यारसायनफलाच
सा॥जीवप्रियाजीवतिकारोहिणीचभिषग्वरा॥२॥जीवन्तीप्राणदाजीव्यादेवीदिव्याज

यास्मृताः॥ हरीतक्यमृतोत्पन्नासप्तभेदैरुदाहृता॥ ३॥ विजयारोहिणीचैवपूतनाचामृता
ऽभया॥ जीवन्तिचेतकींनाम्नासप्तभिदाचसा॥ ४॥ अलाबुवृत्ताविजयावृत्तारोहिणीमता॥
स्वल्पत्वक्पूतनाज्ञेयास्थूलमांसाऽमृतास्मृताः॥ ५॥ पंचास्त्राचाभयाज्ञेयाजीवन्तिस्वर्णव
र्णभाक्॥ त्र्यस्राचेतकीविद्यादित्यासांरूपलक्षणं॥ ६॥ विंध्याद्रौविजयाहिमाचलभवा
स्याच्चेतकीपूतनासिंधौस्यादथरोहिणीतुविजयाजाताप्रतिस्थानके॥ चम्पायाममृताऽभ
याचजनितादेशेसुराष्ट्राह्वयेजीवन्तीतिहरीतकीनिगदितासाप्तभेदाबुधैः॥ ७॥ सर्वप्रयो
गेविजयारोहिणीक्षतेषुलेपेषुचपूतनास्थिताः॥ विरेचनेस्यादमृतागुणाधिकाजीवन्ति ६५

कास्यादिहज्जीर्णरोगजित् ॥ ८ ॥ स्याच्चेतकी सर्वरुजापहारिका नेत्रामयघ्नी अमृतावद्
न्निताम् ॥ इत्थं यथारोगमियं प्रयोजिता ज्ञेया गुणाढ्या न कदाचिदन्यथा ॥ ९ ॥ चेतकी
तु धृता हस्ते यावत्तिष्ठति देहिनः ॥ तावद्विरिच्यते वेगात्तत्प्रभावान्न संशयः ॥ १० ॥ चेतकी द्वि
विधा प्रोक्ता श्वेता कृष्णा च वर्णतः ॥ षडङ्गुलाऽयता शुक्ला कृष्णा चैकाङ्गुलायता ॥ ११ ॥
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत् ॥ काचित्स्पर्शेन दृष्ट्वाऽन्या चतुर्धा भेदयेच्छि
वा ॥ १२ ॥ चेतकीपादपच्छायामुपसर्पन्ति ये नराः ॥ भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः
१३ ॥ नृपादिसुकुमाराणां कृशानां भेषजद्विषाम् ॥ चेतकी मासस्ता हिता सुखविरेचनी ॥

त्रिहि

१४॥सप्तानामपिजातीनांप्रधानाविजयास्मृता॥सुखप्रयोगासुलभासर्वरोगेषुशस्यते
॥१५॥हरीतकीपंचरसालवणातूपरापरम्॥रूक्षोष्णामधुराचैवबृंहणीचानुलोमनी॥१६॥
चक्षुष्यादीपिनीमेध्यास्वादुपाकारसायनी॥श्वासकाशप्रमेहार्शःकुष्ठशोथोदरकृमीन्॥
१७॥वैस्वर्यग्रहणीरोगविबन्धविषमज्वरान्॥गुल्माध्मानव्रणच्छर्दिहिक्काकण्डूहृदामया
न्॥१८॥कामलांशूलमानाहंप्लीहानंचयकृत्तथा॥अश्मरीमूत्रकृच्छ्रश्चमूत्राघातश्चनाश
येत्॥१९॥स्वादुतिक्तकषायत्वादम्लत्वाद्वातहृच्छिवा॥२०॥चर्वितावर्द्धयत्यग्निःपेषितामल
शोधिनी॥स्विन्नासंग्राहिणीपथ्याहृष्टाप्रोक्तात्रिदोषनुत्॥२१॥उन्मीलिनीबुद्धिबलेन्द्रि

याणां निर्मृक्तिनी पित्तकफानिलानाम्॥ विस्रंसिनी मूत्रसकृन्मलानां हरीतकी स्यात्स
ह योजनेन॥ २२॥ लवणेन कफं हन्ति पित्तं हन्ति सशर्करा॥ घृतेन वातजान्रोगान्सर्वरोगान्गु
णान्विता॥ २३॥ सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात्॥ वर्षादिष्वभया प्राश्या रसा
यनगुणैषिणा॥ २४॥ अन्नपानकृतान्दोषान्वातपित्तकफोद्भवान्॥ हरीतकी हरन्त्याशु
भुक्तस्योपरि योजिता॥ २५॥ अध्वातिखिन्नो बलवर्जितश्च रूक्षः कृशो लंघनकर्षितश्च॥
पित्ताधिको गर्भवती च नारी विमुक्तगर्भास्त्वभयां न खादयेत्॥ २६॥ हरीतकी वचा कुष्टं पि
प्पली विश्वभेषजम्॥ वरवृक्षं तथा ब्राह्मी शंखपुष्पी तथैव च॥ २७॥ एतानि समचूर्णानि

कारयेत्सर्पिषा सह ॥ विडालपदमात्रेण वलीपलितवर्जितः ॥ २८ ॥ सप्तरात्रं तु मेधावी द्वाभ्यां श्रु
तिधरो भवेत् ॥ एकविंशतिरात्रेण स्वयमेव कविर्भवेत् ॥ २९ ॥ पीयूषं पिबतस्त्रिविष्टपपते
र्ये बिन्दवो निर्गतास्तेभ्यो भूदभया दिवाकरकरश्रेणीव दोषापहा ॥ ३० ॥ कालिन्दीव वलप्रमो
दजननी गौरीव शूलीप्रिया वह्निद्योतकरी हुताहुतिरिव क्षोणीवना नारसा ॥ २० ॥ यस्य माता
गृहे नास्ति तस्य माता हरीतकी ॥ कदाचित्कुप्यते माता न कदाचिद्धरीतकी ॥ ३१ ॥ इति हरी
तकीकल्पः द्वाविंशः ॥ २२ ॥ ॥ अथ त्रिफलाकल्पः ॥ त्रिनिष्कमात्रामभयां षण्मितं च
विभीतकम् ॥ धात्री द्वादशनिष्का स्यात्त्रिफला शुष्कचूर्णिता ॥ १ ॥ चूर्णं विडंगखदिरभृङ्ग

राजमवाम्बुभिः॥ पलेन सप्त धामाळंमासमात्र निषेवणम्॥ २॥ वलीपलितनिर्मुक्तः स
ण्मासाद्दिव्यदेहतां॥ संवत्सरप्रयोगेण सहस्रायुर्भवेन्नरः॥ ३॥ हरीतक्यास्त्रयोभागा धात्र्या
द्वादशभागकाः॥ विभीतकस्यसङ्गागात्रिफला परिकीर्त्तिताः॥ ४॥ इतित्रिफलाकल्पः त्रयो
विंशः॥ २३॥ ॥ अथधात्रीकल्पः॥ तत्पर्यायः। धात्री। आमलकी· अमृता· तिष्यफला·
वयस्था· कायस्था· श्रीफला· शिवा· शान्ता· अमृतफला· वृष्या· वृत्तफला· रोचनी· तद्गुणाः
शुक्रकारित्वं· शीतवीर्यत्वं· वायुपित्तकफदोषनाशित्वं॥ मज्जागुणाः॥ तृष्णाछर्दिकफवा
युनाशित्वं· लघुत्वं· बलकारित्वं· कषायत्वं· दाहवमिमेहशोषनाशित्वं· रसायनत्वं· रुचि

कारित्वं॰ रक्तदोषनाशित्वं॰ श्रमविबन्धाध्मानविष्टंभदोषप्रशमनकारित्वंच॥ धात्रीकल्पं प्रवक्ष्यामि शृणु देवि यथातथम्॥ धात्रीफलानि चूर्णानि तिलचूर्णैः समांशकः॥१॥ घृतमाक्षिकमालोड्य त्रिंश द्रात्रं भुनक्ति यः॥ भवेच्चारस्वतः सिद्धिर्वृद्धोपि तरुणायते॥२॥ भूयो विभाव्यामलकस्य चूर्णं रसेन तस्यैव सिताज्यमिश्रम्॥ सक्षौद्रमालोढि निशामुखे यो नूनं स वृद्धस्तरुणत्वमेति॥३॥ इति धात्रीकल्पश्चतुर्विंशतिः॥२४॥ ॥अथ पाठाकल्पः॥ पाठालताविशेषः॥ अंबष्ठा वालिका वाला शठाम्बावालिकाम्बिका॥ अम्बा च मालिका चैव वृद्धवल्का मयूरिका॥१॥ गन्धपर्णी चित्रपुष्पि श्रेयसि मुखवाचिका॥ छिन्नपत्री भूरिमल्ली विज्ञेया षोडशाह्वया॥

॥२॥ तिक्तपुष्पा वृहत्तिक्ता शिशिरा दीपनी कुकी॥ अम्बष्ठा च कषाया म्ला कफकण्ठरुजापहा॥
३॥ एकाष्ठीला रसा देवी पाचिका वरतिक्तिका॥ यूथिका मालती चैव कुचेली पापचेलिका॥४॥ वा
तामयवलासघ्नी रुचिकृद्दीपनी परा॥ पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः॥५॥ हन्तिशू
लज्वरछर्दिकुष्ठातिसारहृद्रुजः॥ दाहकण्डूविषश्वासकृमिगुल्मगलव्रणान्॥६॥ भग्नसंधानकृ
श्च दाहातिसारनाशिनी॥ स्तनक्षुण्णा युता चैव पाठा देवी महौषधा॥७॥ माठामूलं मुखे क्षिप्तं खड्गसैन्यं
निवारयेत्॥ तदेव सर्पिसा पीतं विषं सर्पस्य नाशनम्॥८॥ विद्युत्पातं तथा कांडे कटौ बद्धा शिखास्थि
तम्॥ दिव्यसंघप्रियत्वं च सर्वेषां कुरुते सदा॥९॥ पाठामूलं गले बध्वा क्षीरभाण्डस्य तद्दधिः॥ जायते

तत्क्षणाद्दुग्धं सत्यमेव न संशयः ॥ १० ॥ पुष्ये संगृह्य पाठाया मूलमास्ये विनिःक्षिपेत् ॥ गुह्य समरसं
रम्भे शस्त्रास्त्रैर्विनिहन्यते ॥ ११ ॥ पाठामूलमभिमंत्र्य दक्षिणकरे बध्वा स्वगृहे ॥ परगृहे राजगृहे
वेश्यागृहे प्रियो भवति ॥ १२ ॥ तन्मूलं छागमूत्रेण लेपनान्मण्डलानि विविधानि नाशयति ॥ १३ ॥
तन्मूलं छागी घृतेन पीत्वा कर्णाक्षिशिरोरोगं नाशयति ॥ १४ ॥ तन्मूलं पादाङ्गुष्ठे बध्वा सुखप्रस
वः ॥ १५ ॥ ॐ नमो माहेश्वरी सिद्धीं श्वरी वन्ध २ हुँ फट् स्वाहा ॥ अनेन सर्वप्रयोगाभिमंत्रणीया ॥ ॥
इति पाठाकल्पः पंचविंशः ॥ २५ ॥ ॥ अथ सहदेविकल्पः ॥ महाबला पीतपुष्पी सहदेवी च सा
स्मृता ॥ निम्बपत्रसदृक्पत्रा स्याधः श्वेता स्मृता बुधैः ॥ १ ॥ महाबला तु मधुरा धातुवृद्धिकरी मता ॥

वल्या वृष्या त्रिदोषघ्नी ज्वरहृद्रोगदा स्नुवत्॥ २॥ वातार्शशोफविषमज्वरामेहगणानथा॥ वृ
मूत्रं नाशयति सर्वसंमोहिनीपरा॥ ३॥ कृष्णपक्षे चतुर्दश्याम् अष्टम्यां वा ह्युपोषितः॥ वलिं दत्वा
समुद्धृत्य सहदेवीं तु चूर्णयेत्॥ ४॥ ताम्बूलेन तु तच्चूर्णं दत्तं वश्यकरं भवेत् स्नाने लेपे च तच्चूर्णं
योज्यं वश्यकरं परं॥ ५॥ मुखे क्षिप्त्वा च तन्मूलं कृत्यां वध्वा च कामयेत्॥ या नारी सा भवेद्व
श्या मंत्रयोगेन निश्चयम्॥ ६॥ रोचनासहदेवीभ्यां तिलकं कारयेद्बुधः॥ लोकोऽयं यं निरीक्षे
त स वश्यो भवति ध्रुवम्॥ ७॥ सहदेवा सहदेवी स्त्रीपुरुषमादाय चिताभस्मेन सह यस्याः॥ शिर
सि प्रक्षिप्यते सा रूपयौवनगर्विता पि वश्या भवति॥ ॐ नमो भगवति मातङ्गेश्वरी सर्वमनो

हारिणी सर्वशत्रुवशंकरी सर्वमुखराञ्जिनी त्राशिनी सर्वेषां महामाये महामातंगिकुमारिकेल
हलहजिह्वे सकलजनवशंकरी स्वाहा ॥ सहस्रजप्त्वा गुरुयोगानां सिद्धि ॥ अनेन मंत्रेण स
प्तवाराभिमंत्रितेन खदिरकाष्ठेन रात्रौ पश्चिमे यामे मुक्तकेशो दिगम्बर ईशानाभिमुखो भूत्वा
गक्षिप्यात्ततः सिद्धिर्भवति ॥ यंत एडुलेन सह दीयते स वश्यो भवति, मधुना भगलेपेन पतिर्दासो
भवति· चन्दनेन सह पेश्य युक्त हस्तेन यां यां स्पृशति सा सा वश्या भवति ॥ शिरसि बध्वा लोक
मध्ये ह्यति आदरो भवति कचेव बध्वा भूतज्वरं नाशयति ॥ स्त्रीणां कचेव बध्वा सुखप्रसवं करोति ॥
बालानां कचेव बध्वा गंडमालां नाशयति· वस्त्रांचले बध्वा सर्वकार्ये सिद्धिर्भवति ॥ इति सहदे

७०

वीकल्पः षड्विंशः ॥२६॥ ॥ अथमयूरशिखाकल्पः ॥ मयूरशिखाक्षुपविशेषः ॥ शि
खीनिचार्हचूडाचमहादेविकुमारिका ॥ मधुपर्णीकेतकीस्थामालतीविषहातथा ॥ १ ॥
शिखावलाचगोरंभासुशिखासुभगास्मृताः ॥ मयूराह्वाशिखाप्रोक्तासहस्राङ्घ्रि मेहृच्छ
दा ॥ २ ॥ नीलकण्ठशिखालघ्वीपीतश्लेष्मातिसारनुत ॥ वालग्रहादिदोषाणांनाशिनीव
श्यकारिणी ॥ ३ ॥ ॐ नमः शक्तिहस्तायषण्मुखायमयूरवाहनायंओंषधीकेनदामेभवस्वा
हा ॥ अनेनमंत्रेणचतुर्दश्यांशुचिर्भूत्वाश्रीमयूरशिखामुत्पाटयेत् तदाप्रभावयुक्तोभवति ॥
संगृह्यपुष्यनक्षत्रेवालानांवन्धयेत्पुनः ॥ भूतप्रेतपिशाचानांडाकिनीनांभयंनहि ॥ ४ ॥ धूमंद

द्याज्वरे भूते नाशयेत्तत्क्षणाच्चतम् ॥ ताम्बूलेन प्रदातव्यं वश्यो भवति तत्क्षणात् ॥ ५ ॥ तन्मू
लं च शिखां वध्वा वेश्या राजकुले विसेत् ॥ व्यवहारे विजयं भवेन्नास्त्यत्र संशयः ॥ ६ ॥ शत्रु
द्वारे च निःक्षिपेत् उच्चाटनं भवति हस्ते वध्वाऽत्मनोऽपमृत्युन्नाशयति ॥ घृतेन सह नस्येन सर्पद
ष्टो निर्विषो भवति ॥ मधुना सह भक्षणाच्छ्रुतिधरो भवति ॥ गव्यघृतेन सह भक्षणादिन्द्रियवलो
भवति ॥ वर्षपर्यन्त भक्षणेन देवतुल्यो भवति ॥ पंचमेन सुवर्णकायो भवति ॥ सप्तमेन कंदर्पतु
ल्यो भवति ॥ अस्य महिमाऽपारः ॥ इति मयूरशिखाकल्पः सप्तविंशः ॥ २७ ॥ ॥
अथ शिवलिङ्गीकल्पः ॥ शिवलिङ्गीलताविशेषः ॥ तत्पर्यायः वल्लपत्री· ईश्वरी· शिववल्लिका·

लिङ्ग संभूता·लैङ्गी·चित्रफला·चाण्डाली·लिङ्गजा·देविखण्डा·आपस्तंभिनी·जिवजा·अ
स्यागुणाः कटूष्णाः दुर्गन्धत्वं·रसायनत्वं·रसनियामकत्वञ्च॥ॐ श्रीईश्वरी सर्वदानववशं
करी साधिन्यै स्वाहा॥ अनेनैव च मंत्रेण गंधादिभिरभिष्टुताम्॥ विधासूत्रेण संवेस्य लिङ्गजां
संप्रपूजयेत्॥१॥ पुष्ये वा रेवती ऋक्षे गृहीत्वा तज्जटां पिबेत्॥ क्षीरशुद्धेन रत्यर्थं रमते च
सहस्रमः॥२॥ भावितं पंचशत धातन्मूलं कन काम्भुना॥ तत्तैलस्य विलेपेन तत्करोति नरो
वधः॥३॥ आत्माम्भु पिष्टं तत्कल्कलेपेनाङ्गे न मोहनम्॥ सद्योजयति दुर्वारं वैरिणां विजयो
भवेत्॥४॥ धृत्वा शिरसि पुष्यार्के मंत्रमुच्चारपूर्वकम्॥ ईश्वरी सकलां भीतिं निहंति तितिनस्तंश

यः॥५॥सहदेवीश्वरीमूलंमयूरशिखयासह॥ततः प्रदक्षिणीकृत्यभक्त्यास्तुत्वाप्रणम्यच॥६॥
तत्रसूर्योदयात्पूर्वंमंत्रमष्टोत्तरंशतं॥जप्त्वाचपादलेपेनदिनेनैकेनमानवः॥७॥विंशद्योजन
गोभूत्वापुनरेतिनसंशयः॥रोचनाईश्वरीमूलंस्वकल्किकृत्यममुना॥८॥जप्त्वाचाष्टोत्तरश
तंपूर्वमंत्रंविचक्षणः॥श्रीखण्डईश्वरीमूलंकुंकुमागुरुटंकणम्॥९॥रोचनाद्यसमंसर्वमेतदङ्गा
नुलेपनात्॥दर्शनस्पर्शनाद्देवनरनारीविमोहितं॥१०॥ईश्वरीमूलमादायग्रहणेसोमसूर्य
योः॥चूर्णितंनेत्रयोर्न्यस्तंकरस्थंवाग्रहापहम्॥११॥समंत्रमानितासाहिवशंचकुरुतेनरम्॥
समस्तरोगशान्तिश्चईश्वरीमूलसेवनात्॥१२॥तदेवनस्येविन्यस्तंकाकिनेनविषापहम्॥ ७२

तदेवासनसंयुक्तोजङ्गमादिविषंहरेत्॥१४॥इतिशिवलिङ्गकल्पः॥अष्टविंशः॥२८॥
अथचाण्डालीकल्पः॥औसधीपरमश्रेष्ठागोपितव्याप्रयत्नतः॥अस्यप्रयोगात्कुरुतेदेवता
मपिवश्यताम्॥१॥सर्वौषधीचचाण्डालीवन्दितासुरमानवैः॥एकपत्रीद्विपत्रीचत्रिपत्रीश्च
तुपत्रिका॥२॥चाण्डालीद्विविधाप्रोक्तासर्वशत्रुवशंकरी॥मोहनीसोहनीचैवसर्वकामा
र्थसाधिनी॥३॥पुष्येशुक्लाष्टम्यांचतुर्दश्यांपंचम्यांवाशुचिर्भूत्वाअनुदितेभानौपुष्पाक्षत
तिलगंधोदकैःसंपूज्यखदिरकीलकेनखनित्वासंगृह्य॥ॐह्रींचण्डेहुंफट्स्वाहा॥इति
मंत्रेणमंत्रयित्वाप्रयोजयेत्॥एकपत्रीस्वाङ्गमलसंयुक्तापुरुषंवशमानयति॥द्विपत्रीपश्च

मलकृष्णाधत्तूरपंचाङ्गसंयुतास्त्रियंवशमानयति॥त्रिपत्रीस्त्रीक्षीरमरीचसंयुक्तापशुं
वशमानयति॥चतुष्पत्रीदुष्टगजंवशमानयति॥समूलपत्ररसेनसह्यस्मैदीयतेसवश्यो
भवति॥ ॐ चाण्डालीमहाचक्रपराक्रमेस्वाहा॥ एतन्मन्त्रेंनाभिमात्रजलेस्थित्वा१०८जपे
त्सिद्धिः॥ इतिचाण्डालीकल्पएकोनत्रिंशः॥२९॥ ॥अथलक्ष्मणाकल्पः॥लक्ष्मणा
लताकन्दविशेषः॥तत्पर्यायः॥पुत्रकन्दा·पुत्रदा·नागिनी·नागाह्वा·नागपत्री·नालिनीम
ञ्जिका·अस्त्रविन्दुच्छदा·प्रच्छदा·अस्यागुणाः॥मधुरत्वं·शीतत्वं·वन्ध्यत्वनाशित्वं·रसा
यनकरत्वं·बल्यत्वं·त्रिदोषशमनत्वंच॥पुत्रकाकाररक्ताल्पविन्दुभिर्लाञ्छितासदालक्ष्म

णापुत्रजननीवत्सगंधाकृतिर्भवेत॥ १॥ कृष्णपक्षे चतुर्दश्यां गुरुपुष्येतुलक्ष्मणाम्॥ इदंमं
त्रंसमुच्चार्यसोपचारंसमुद्धरेत॥ २॥ ॐ सर्वार्थसाधिनीलक्ष्मणायैस्वाहा॥ रोचनालक्ष्मणा
मूलंचंदनंकुंकुमंसमम्॥ ३॥ मुखलेपात्क्रितत्सर्वंविशेषंनरमोहनम्॥ ४॥ ॐ वशिनमोनमः॥
तन्मूलमेवस्वर्णाख्यधत्तूरद्रवभावितम्॥ तद्धूमधूपितंदेहंदृष्ट्वासद्योविमुह्यति॥ ५॥ तन्मू
लंरक्तचन्दनसंयुक्तंयस्मैदीयतेसवश्यः॥ ॐ नमोमहेश्वरायसर्वजनवशंकुरुस्वाहा॥
तन्मूलंसौवीरांजनसमंकृत्वांजनाद्यंयंपश्यतिसवश्यः॥ ॐ जयविजयायस्वाहा॥ तन्मूलं
रक्तचन्दनेनसहधूपयेत्सर्वजनप्रियोभवति॥ ॐ नमोमहेश्वरायस्वाहा॥ तन्मूलंशिरसिबध्वा

चौरव्याघ्रादिभयंनभवति॥तन्मूलंहस्तेवध्वासंग्रामेपराजितोभवति॥ॐह्रींहरायस्वाहा॥त
न्मूलमात्मनासमालक्ष्यसर्वजनप्रियोभवति॥ॐवश्यंमेस्वाहा॥तन्मूलंमनःसिलोदकेन
संघृस्यतिलकंकृत्वाराजकुलेव्रजेत्राजानोवश्याभवन्ति॥तिलयुक्ततन्मूलंक्षीरेणपाना
त्सर्वरोगनाशः॥लक्ष्मणामूलकुष्टंचनागकेशरसंयुतम्॥यस्मैकस्मैप्रदातव्यंसवश्योभवति
क्षणात्॥५॥लक्ष्मणामूलतगरंजलेनसहघर्षयेत्॥ललाटेतिलकंकृत्वासर्वेषांचप्रि
योभवेत्॥६॥लक्ष्मणामूलसंयुक्तंऋतुस्नातापिवेद्यदि॥कामिनीकदलीकन्दवंध्यापिल
भतेसुतं॥७॥इतिलक्ष्मणाकल्पःत्रिंशः॥३०॥ ॥अथअपराजिताकल्पः॥अपराजि

तापुष्पलताविशेषः॥ शुक्लनीलभेदेन द्विविधा॥ तत्पर्यायः॥ आस्फोटा· गिरिकर्णी· वि
ष्णुकान्ता· गवाक्षी· अश्वखुरी· श्वेता· श्वेतभण्डा· गवादनी· कटभी· दधिपुष्पिका· गर्दभि·
सितपुष्पी· भद्रा· सुपुत्री· विषहन्त्री· अस्यागुणाः॥ हिमत्वं तिक्तत्वं· पित्तोपद्रवविषदो
षनाशित्वं च· चक्षुर्हितत्वं· त्रिदोषसमताकारित्वं शोथकासनाशित्वं· कण्ठहितकारि
त्वं· रसनियामकत्वं· वश्यकर्मणि प्रशस्तत्वं च·॥ औषधी कथिता पूर्वं ब्रह्मणा तु महात्मना॥
धनदा धर्मदा पुण्या सावित्री ब्रह्मनिर्मिता॥ १॥ जया च विजया चैव सुभगा दैत्यमोहिनी॥
अपराजिता च लोकेस्मिं विख्याता गिरिकर्णिका॥ २॥ पुष्पेसमुद्भूता यत्नाद्धि जयान्तु शुभाव

हा ॥ दक्षेन पुंसो वश्यार्थं स्त्रिय श्च वाम पाणिना ॥ ३ ॥ सुसंकीर्णे शुचौ देशे तस्या मूलं निधाप
येत ॥ चन्द्र सूर्योपरागे पि मूल मुन्मूलये द्बुधः ॥ ४ ॥ पुष्य काले तु पुष्पाणि बीजान्यादाय यत्न
तः ॥ कृष्णाष्टम्यां चतुर्दश्यां महादेवस्य सन्निधौ ॥ ५ ॥ शुक्ल वासा शुचिर्भूत्वा काषाय परिधा
रितः ॥ ततश्च वटिकां कृत्वा छाया शुष्क न्तु कारयेत ॥ ६ ॥ ललाटे तिलकं कृत्वा यं यं पश्य
ति चक्षुषा ॥ दृष्टमात्रेण तस्याशु प्रजा भवति दासवत ॥ ७ ॥ नरनारी सहस्राणि दृष्ट्वा तिल
कमद्भुतं ॥ दासभावे च गच्छति यावज्जीवं न संशयः ॥ ८ ॥ मनो हरंति देवानां दृष्टमात्रेण मान
रः ॥ किं पुनर्मानुषाणां च क्षुद्राणां पापकर्मिणां ॥ ९ ॥ सकृद् दृष्ट्वा तु पुरुषा आज्ञां कुर्वन्ति दा

सवत ॥ संग्रामे शत्रुसंघाते काण्डवारणमुत्तमम् ॥ १० ॥ मोहयेत्परसैन्यानि मुखसंस्थाम
हौषधी ॥ सर्वदुष्टभयंनास्तिजलेगच्छे स्थले सुख ॥ ११ ॥ प्रयोगे च महागुह्यं स्त्रीणां सौभा
ग्यवर्द्धनम् ॥ अंगस्योद्वर्त्तनं कृत्वाईप्सितानवगूहयेत् ॥ १२ ॥ कथितं निश्चितं सर्वदुर्भगानां
शुभावहं ॥ महादेवस्यवश्यार्थे अंगलेपकृतोमया ॥ १३ ॥ तदाप्रभृति रुद्रेण नान्यास्त्रीमन
साधृता ॥ एका स्त्री भुवि विख्याता शिवदेहार्द्धवासिनी ॥ १४ ॥ अतःपरो नयोगोस्ति योगीना
मुत्तमोत्तमः ॥ सप्ताभिमंत्रिता चैव सादेवि सर्वसिद्धिदा ॥ १५ ॥ ॐ अमृते अमृतप्रभे सर्वसिद्धेश्व
री असितप्रभे स्वाहा ॥ अपराजिता शिफां दद्यान्नीलोत्पलसमन्विताम् ॥ सताम्बूलां नरोय

स्मैसवश्यो भवति क्षणात्॥ १६॥ श्वेतापराजितामूलं पिष्टं रोचनयान्वितम्॥ यं पश्येत्तिलके
नैव वशीकुर्यान्नृपालये॥ १७॥ श्वेतापराजितामूलं चन्द्रग्रहणमुद्धृतम्॥ प्रभूनां भोजने
देयं चण्डमंत्रावशंकरम्॥ १८॥ विघट यतिगण्ड मालागृहीतपुष्पे करोवद्धम्॥ पीतं वा घृते
न्मिश्रं सितपर्वत कर्णिकामूलं॥ १९॥ श्वेतापराजितामूलं पेषयेद्रोचनेन तु॥ शतेनामंत्रि
तं कृत्वा तिलकं कारयेद्बुधः॥ २०॥ वशयेन्नात्र सन्देह सत्यं सत्यं महेश्वरी॥ चन्द्रसूर्यौ यदि
वृथा तदा निष्फलभाग्भवेत्॥ २१॥ श्वेतापराजितामूलं चन्द्रयस्ते समुद्धृतं॥ अञ्जिताक्षो नर
स्तेन वशीकुर्याज्जगत्त्रयम्॥ २२॥ श्वेतापराजितामूलं ग्राह्यं चन्द्रग्रहे सती॥ वलाक्षोदेणसं

पुंकाशुरिकामूर्द्ध्नि धारयेत ॥२३॥ अदृश्योजायते मर्त्यः सत्यं सत्यं न संशयः ॥ श्वेतापराजिता मूलं
हस्तस्थं धारयेद्गजम् ॥२४॥ श्वेतापराजितापत्रं जयापत्रं द्वयोरसम् ॥ नश्यं कृत्वा पलायन्ते
डाकिनी दानवादयः ॥ २५॥ श्वेतापराजिता मूलं पीत्वा दुग्धेन मानवः ॥ स्थावरं च विषं हन्ति
उदरस्थं न संशयः ॥२६॥ श्वेतापराजिता मूलं देवदालीय मूलकम् ॥ वारिणा पेशितं नश्यं
कालदष्टोपि जीवती ॥२७॥ श्वेतापराजिता मूलं घृतेन त्वग्गतं विषम् ॥ पयसा रक्तगं हन्ति मां
सगं कुष्ट चूर्णतः ॥२८॥ अस्थिगं रजनी युक्तं मेदोगं लाङ्गली युतम् ॥ मज्जागं पिप्पली यु
क्तं चाण्डाली मूल संयुताः ॥ २९॥ शुक्रगं हन्ति लोहित्यं तस्माद्देयाऽपराजिता ॥ गिरिकर्णी

यमूलं वाप्रत्येकं विषजिद्भवेत॥२०॥ कृष्णापराजिता मूलं पुष्येनोद्धृत्य चूर्णयेत्॥ गो
घृतेन समालोड्य कज्जलं पातयेद्बुधः॥२१॥ तेनैवाञ्जितमात्रेण वशीकुर्याज्जगत्त्र
यम्॥ कृष्णापराजिता मूलं ताम्बूलेन समायुतम्॥२२॥ अवश्यायै स्त्रियै दद्याद्वश्या
भवति तत्क्षणात्॥ ॐ ह्रीं स्वाहेति मंत्रेणाभिमन्त्र्य प्रदापयेत्॥२३॥ कृष्णापराजिता
मूलं ग्राह्यं खदिरकीलकैः॥ कृष्णासूत्रै कटिं बध्वा उर्ध्वलिङ्गं करोति च॥२४॥ कृष्णा
पराजिता मूलं वस्तक्षीरेण संपिवेत॥ ऋतुस्नाता त्रिधायातु वन्ध्या गर्भधरा भवेत॥२५॥
विष्णुकान्ता समूलन्तु पिष्ट्वा दुग्धैस्तु माहिषैः॥ महिषीनवनीतेन ऋतुकाले तु भक्षयेत्॥

॥३६॥ गर्भं सा लभते नारी काकवंध्या सुनिश्चितम्॥ विष्णुक्रान्ताभवं मूलं हस्तस्थं चौरभी
तिनुत्॥ ३७॥ आदौ वङ्गं तु संशोध्य मूषिकायां विनिःक्षिपेत्॥ श्वेतापराजितां चैव योनिवल्ल्य
भिध्यां शिवे॥ ३८॥ तद्रसं तत्र निःक्षिप्य धमेद्यत्नेन शैलजे॥ तद्वङ्गं जायते शुद्धं रजतं कुंद
सन्निभम्॥ ३९॥ तद्रसे पारदं घर्म तन्मूषायां निवेश्य च॥ उपरि मृत्तिकां दत्वा आतपे शो
षयेच्च तम्॥ ४०॥ उपलेन च मृद्वग्निं दद्याच्छुद्धेन चेतसा॥ पारदो भश्मतामेति नात्र कार्या वि
चारणा॥ ४१॥ इति अपराजिताकल्प एकत्रिंशत्तितमः॥ ३१॥ ॥अथ वटपत्रीकल्पः॥
लता हरितवर्णाभा अतिसूक्ष्मा पयोन्विता॥ वटपत्रसमं पत्रं पुष्पं स्याद्रक्तसन्निभम्॥ १॥

वटपत्रीतुकथितामोहिन्येरावतीबुधैः॥वटपत्रीकयायोष्णा॥योनिमूत्रगदापहा॥२॥तस्याल
ङ्घनमात्रेणदिङ्मोहोथप्रजायते॥रोदने चमहामूर्च्छाशङ्कैरेयदिदीयते॥३॥सिद्धसावरसार
त्तुसमाकृष्यप्रयत्नतः॥कथ्यतेचमहायोगः सद्यः प्रत्ययकारकः॥४॥ हूं मोहे नं भेदचिण्डकुण्ड
रमोहेमोहनीयेस्वाहा॥अनेनामंत्रितंकृत्वासप्तवारंविचक्षणः॥ददातियुगसंयोगंवटपत्रकसं
युतम्॥५॥मोहितोनीयतेयत्रतत्रगच्छतिनान्यथा॥विक्रेतुंचमतिंदद्यात्क्रोधितोपिनकुप्य
ति॥६॥स्वशिरश्छेदनमपिनैवजानातिविह्वल॥येयधूरितमोयोगः सर्वशीमतनिर्गतः॥७॥गोपि
तोमूलदेवेनतंत्रेवैकुहकार्णवे॥योगवल्ल्यांसारवल्ल्यांकलावल्ल्यांविशेषतः॥८॥भद्रेचतुर्गते

चैवगोपितो हरमेखले॥ स्वयं नागार्जुनेनैव विशेषेण तु गोपितः॥ ९॥ योगस्योत्कृष्टतां दृष्ट्वा उ
त्सुकेन मयाधुना॥ नराणां च हितार्थाय स्पष्टमेतदुदाहृतम्॥ १०॥ योगस्यास्य प्रभावेन मूलदे
वेन धीमता॥ मुग्धस्य हर्षपालस्य स्वीकृता राजसम्पदः॥ ११॥ वटपत्रीपरिज्ञानं मया च प्रकटी
कृतम्॥ गोपनीयं प्रयत्नेन यदिच्छेच्चीरजीविनम्॥ १२॥ इति वटपत्रीकल्पः द्वात्रिंशः॥ ३२॥ ॥
अथ ब्रह्मदण्डीकल्पः॥ ब्रह्मदण्डी लता ख्याता सक्षीरा कन्दवत्यपि॥ ईषदुत्तिष्ठते भूमौ यष्टि
वच्च व्यवस्थिता॥ १॥ तत्पत्रं कण्टकाकीर्णं स्सवन्ध्यकरी भवेत्॥ त्रिलोहवेष्टितं मूलं वक्रस्थं गृ
हयेन्नरस्॥ २॥ कण्टपत्रा ब्रह्मदण्डी अधोपुष्पीति संज्ञिता॥ तस्या भेदद्वयं प्रोक्तं कृष्णा श्वेता

च वर्णतः॥ ३॥ श्वेता प्रोक्तातु वश्यार्थे कृष्णा उच्चाटनेतथा॥ आश्विने कार्तिके मासि गृहीतव्यास्तु
धीमताः॥ ४॥ शुक्लपक्षेतु वश्यार्थे कृष्णा उच्चाटने तथा॥ ब्रह्मदण्ड्यास्तु मूलानि महालिङ्गान्वितानि
च॥ ५॥ संग्रहपुष्यनक्षत्रे हात्मरक्तेन भावितम्॥ खाने पाने प्रदातव्यं स्त्रीणां हृदयद्रावकम्॥ ६॥
ब्रह्मदण्डी स्चिताभस्म पादपांशुस्तथैव च॥ आह्शीर्षं तथा केशमथ क्षीरेण पेषयेत्॥ ७॥ द्वारे वि
निःक्षिपेद्यस्य दूरदेशं स गच्छति॥ बृहती च भगन्धा च ब्रह्मदण्डी तथैव च॥ ८॥ नवनीतेन लिप्तं
च लिंगमध्य प्रमाणकम्॥ एतेन वृद्धिमायान्ति स्त्रीणां चैव पयोधरा॥ ९॥ कृष्णासूत्रेण सा वद्धा त
तीयज्वरनाशिनी॥ ब्रह्मदण्डी चिताभस्म काकरक्तेन भावितं॥ १०॥ शत्रोः शिरसि दातव्यं मु च्चा

टनकरंपरम्॥ब्रह्मदण्डीसमूलंचनिर्गुण्डीससमाभावितम्॥५१॥नश्यंयस्यचदीयेतपिशा
चभूतराक्षसाः॥डाकिन्योनाशमायान्तिरुद्रस्यवचनंयथा॥५२॥इतिब्रह्मदण्डीकल्पस्त्र
यस्त्रिंशः॥३३॥ ॥अथअंकोलकल्पः॥अङ्कोल्लोवृक्षविशेषः॥तत्पर्यायः॥अङ्कोठ·
निकोचक·वोध·नेदिष्ठ·दीर्घकीलकः·रामठ·कोठरं·रुठी·मुडपत्र·गुप्तस्नेह·पीतसार·म
दन·गूडवल्लीका·पीत·ताम्रफला·गुणाढ्यक·कोलक·गन्धपुष्प·रेचन·विशानतैलगुप्त·
अस्यागुणाः कटुत्वं·स्निग्धत्व·विषलूतादिदोषनाशित्वंच·कफवायुहारित्वं·सूतशुद्धिका
रित्वं·रेचकत्वंच·तत्फलगुणाः शीतलत्वं·स्वादुत्वं·श्लेष्मनाशित्वंच·गुरुत्वं·वलकारित्वं

धातुपोषकत्वं·विरेचकत्वं·वातपित्तदाहक्षयकुष्ठरक्तनाशित्वंच॥अङ्कोलकल्पंवक्ष्या
मिनानाश्चर्यकरंपरम्॥सितासितहरिद्राक्तैकङ्कोलन्तुचतुर्विधैः॥१॥गुरुवासरयुक्तेचहस्तर्क्षे
सुविधानतः॥अङ्कोलमूलमानीयपुरुहूतदिगाश्रितम्॥२॥कर्पूरमधुनाऽञ्जनेत्रयोरञ्ज
येद्यदि॥दिनावसानेतनुतेनष्टद्रव्यावलोकनम्॥३॥एकविंशद्दिनंतस्यबीजंक्षौद्रसमन्वित
म्॥भजन्तंमानवंदष्ट्वासद्यःसर्पोमृतिंव्रजेत्॥४॥तद्बीजचूर्णंमधुनायक्षचन्द्रदिनान्तरे॥यः
कोपिसेवतेमर्त्योजरायुक्तोयुवाभवेत्॥५॥श्वेताङ्कोलजटानीरैःसूतोमर्द्योदिनत्रयम्॥पुटित
श्चान्धमूषायांसूतोभस्मत्वमाप्नुयात्॥६॥प्रत्यहंरतिकापंचभक्षयेन्मधुशर्पिषा॥कोवातस्यगुणं

वक्तुंभुविशक्नोतिमानवः॥७॥कृष्णाङ्कोलोत्थबीजानांचूर्णेचूर्णेनमर्दितम्॥स्नुक्पयोचोन्मकस्य
चभाजनान्तेप्रलेपयेत्॥८॥तदधोभाजनंचान्याग्निःक्षिपेत्भानुसन्निधौ॥तेननिस्तारितंतैल
मादायाम्बुजतन्तुभिः॥९॥कृत्वावर्त्तीसुतैलेनदीपेनोद्धृत्यकज्जलम्॥तत्कज्जलाञ्जनेनेहा
दृश्योजायतेनरः॥१०॥अरुणाङ्कोलबीजस्यतैलंपूर्ववदाहृतम्॥तेनलिप्तानिताम्रस्यपत्राणि
पुटपाकतः॥११॥जायतेकाञ्चनंदिव्यंजाम्बूनदसमप्रभम्॥अंकुलीतैलसंशिक्तावचासप्त
दिनावधिः॥१२॥त्रिलोहवेष्टितासातुगुटिकाकारयेत्शुभा॥अदृश्यकारिणीख्यातामुखस्था
नात्रसंशयः॥१३॥तत्तैलेसर्षपाश्वेतास्त्रिलोहपरिवेष्टिता॥गुटिकामुखमध्यस्थाअदृश्य

कारिणीस्मृता ॥ १४ ॥ अश्वत्थालांकुलीतैलेलेपयेत्श्वेतसर्षपम् ॥ तल्लिप्तहस्तपादैस्तुयोजना
नांशतंव्रजेत् ॥ १५ ॥ अंकोलतैलसंयुक्तंश्वेतसर्षपलेपितम् ॥ पादुकामूलचर्मोक्षंसमारुह्य
शतंव्रजेत् ॥ १६ ॥ अङ्कोलस्यचमूलानितिलतैलेनपाचितं ॥ पादंसजानुपर्यन्तंनरःक्षिप्त्वाऽध्व
गोभवेत् ॥ १७ ॥ प्रतीच्यांदिग्गतंमूलंप्रातर्धान्यंसमाहरेत् ॥ तत्पिष्टाङ्कोलतैलेनपादलेपाच्छ
तंव्रजेत् ॥ १८ ॥ विमर्द्यपारदंतेनमूषायामधरोत्तरम् ॥ पुटीकृतंभवेत्तेनबध्यतेचरसंक्षणात् ॥ १९ ॥
इतिअङ्कोलकल्पश्चतुस्त्रिंशः ॥ ३४ ॥ ॥ अथकटुरोहिणीकल्पः ॥ कटुरोहिणीवृक्षविशेषः ॥
कटुकाजननीतिक्तारोहिणीतिक्तरोहिणी ॥ चक्राङ्गीमत्स्यपित्ताचयकुल्यासकुल्लादनी ॥ १ ॥

९

मादिनी शतपर्वा च द्विजाङ्गी मलमोचिनी ॥ अशोकरोहिणी कृष्णा कृष्णभेदी महौषधी ॥ २ ॥
कट्वङ्ग्जनी काण्डरुहा कटुस्यकटुरोहिणी ॥ केदारकटुकारिष्टा आमघ्नी चकटम्बरा ॥ ३ ॥ कटु
द्रुवाह्यशोका च नाम्ना ख्याता महौषधी ॥ अतिकटुर्तिक्तशीता कटुका रुचिकारिणी ॥ ४ ॥ पित्त
रक्तदाहहरा वक्लासनाशिनी तथा ॥ अरुचिज्वरहा चैव श्वासरोगनिवारिणी ॥ ५ ॥ पुष्यार्के रोहि चैव
णी चूर्णं वारिणा सह सेवितम् ॥ ज्वरं हन्ति मुदुर्वारं दाहेन भ्रमकारणम् ॥ ६ ॥ पाठां समन्वितं वक्त्रो
सम्यक्प्रपाचिता ॥ अष्टावशेषिता क्वाथिता रात्रौ सर्वज्वरापहम् ॥ ७ ॥ प्रभातकाले संपीता विरेचनं
करी स्मृता ॥ पिष्ट्वाश्वत्थत्वचा काष्ठे लेपाद्दाहज्वरं जयेत् ॥ ८ ॥ तन्मूलमम्बुना पीतं सर्वज्वरहरं

नृणाम् ॥ तच्चूर्णं सूर्यदुग्धेन भावितं सेवितं यदि ॥ ९ ॥ ताम्बूल सेवितं दैका मात्रा चैकवटीकृता ॥ द्वि

तीयकज्वरं हन्ति चतुर्थिकमथापि वा ॥ १० ॥ कान्जिकेन समायुक्ता समस्तविषनाशिनी ॥

वटक्षीरेण तन्मूलं कण्ठस्थज्वरनाशकृत् ॥ ११ ॥ शिवावीजटाकेदू मूलं सं वेष्यतन्तुना ॥ सागरे

णजलेवध्वा सर्वरोगनिवारिणी ॥ १२ ॥ इतिकटुरोहिणीकल्पः पञ्चत्रिंशः ॥ ३५ ॥ ॥

अथ निर्गुण्डीकल्पः ॥ निर्गुण्डीवृक्षविशेषः ॥ नीलपुष्पापर्यायः सिन्दुकः सिन्दुवार इन्द्रा

णिकः सिन्धुक गोलोमि कामनाशिनी सेफालिका मलिका रजनीहासा निशिपुष्पि

का श्वेतपुष्पाया श्वेतसुरसा भूतवेशी शुक्लाङ्गी शीतमञ्जरी विजया वातारि भूतकेशी ८२

अस्यागुणाः कटुतिक्तोष्णरूक्षत्वं वातकफाङ्गसन्धिवातगुदवातादिदोषनाशित्वं च ॥
देव्युवाच ॥ श्रुतं भवत्प्रसादेन यथाकाल्स्य बन्धनम् ॥ मंत्रसारसमुद्धृतामिदानीमोषधीं
पदः ॥ १ ॥ येन सिद्ध्यन्ति देहानि सर्वकामप्रदानि च ॥ जरारोगहरं कल्पं तद्वद त्रिपुरान्तकः
॥ २ ॥ पूर्वं च यत्त्वया प्रोक्तं प्रत्यक्षं कथयस्व मे ॥ सन्त्यो ऋष्यान्यनेकानि मनुष्याणां हिताय
च ॥ ३ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि दिव्यं महौषधं तव ॥ धनधान्यकरी विद्या आयुरा
रोग्यवर्द्धिनी ॥ ४ ॥ शान्तिपुष्टिकरी नित्यं साक्षाद्देविस्वरूपिणी ॥ निर्गुण्डीति समाख्याता स
र्वलोकेषु विश्रुताः ॥ ५ ॥ तस्याहं संप्रवक्ष्यामि प्रयोगं शृणु सुन्दरी ॥ निर्गुण्डीमूलमुद्धृत्य सुन

क्षत्रे शुभे दिने ॥ ६ ॥ अष्टादशपलं चूर्णं पलद्वादशसर्पिषा ॥ मधुनुषोडशं चैव मिश्रिकृत्य वि
धनतः ॥ ७ ॥ एतानि स्निग्धके भाण्डे मासमेकन्तु सर्वदा ॥ स्थापयेद्धान्यराशौ च मासादूर्ध्वं
समुद्धरेत् ॥ ८ ॥ नमस्कृत्य गुरुं देवं पूजयेद्वृषकेतनम् ॥ ब्राह्मणांश्च कुमारींश्च भोजयेत्प्र
यतो नरः ॥ ९ ॥ तासामादेशमादाय शुचिर्भूत्वा शुभे दिने ॥ बिडालपदमात्रन्तु भक्षयेच्च वि
धानतः ॥ १० ॥ अहन्यहनि भोक्तव्यं मासमेकं निरन्तरम् ॥ ततो मासव्यतिक्रान्ते इदं भव
ति लक्षणम् ॥ ११ ॥ भीमसेनसमो वीरो ऽमरत्वं लभते नरः ॥ भवति ह्यक्षयं रेतः स्त्रीशतं का
मितं क्षमः ॥ १२ ॥ आहारं मैथुनं निद्रां सेवेच्च याचकमोत्यसौ ॥ विकाशात्मनसः सम्यक्त्व ८३

द्वैपेत्रोरयेत्पुनः॥१३॥निर्गुण्डीमूल चूर्णंवागोमूत्रेणतुयः पिवेत्॥दशरात्रप्रयोगेणकु
ष्टानष्टादशानपि॥१४॥नाशयेच्चसद्यादेविवायुर्मेद्धमिवाम्बरे॥निर्गुण्याश्चततश्चू
र्णीअजामूत्रेणयः पिवेत्॥१५॥नराः केशास्तथादन्तासप्ताहेनपतन्तिवै॥द्विसप्ताहेन
देवेशिजायतेचपुनर्नवा॥१६॥त्रिसप्ताहप्रयोगेणदृदंभवतिलक्षणम्॥नाग्निनादह्यते
शोथजलेनमृयेततथा॥१७॥तस्यमूत्रेणलोहंच काञ्चनंनात्रसंशयः॥चतुसप्ताहयोगेन
त्यक्त्वाभूमिंनभंव्रजेत्॥१८॥निर्गुण्डीमूलमादायतक्रेणैवतुयः पिवेत्॥वलीपलितदोष
श्चसर्वव्याधिस्तथैवच॥१९॥षण्मासस्यप्रयोगेणनाशयेदविचारतः॥गृध्रोलूकसमोदृष्टि

रन्धकारेपिपश्यति॥२०॥ दूरदर्शीभवेच्चैव स्वर्णरेताभविष्यति॥कामदेवसमोभूत्वाविचरेद्ववनीत
लम्॥२१॥निर्गुण्डीफलमादाय तिलतैलेनयःपिवेत्॥ज्वरंचास्थिगतंहन्ति।शिरोरोगोनजायते॥२२
निर्गुण्डीमूलमादायघृतेनसह भक्ष्ययेत्॥ गुह्यपीडाकरोरोगाभवन्तिनकदाचनः॥२३॥हृष्टपु
ष्टोभवेत्तत्रवलवीर्यसमन्वितः॥एकमासप्रयोगेणइदंभवतिनिश्चितम्॥२४॥निर्गुण्डीमूल
मादायशिशिरेणसमंपिवेत्॥सप्तरात्रप्रयोगेणवलवीर्यंचवर्धते॥२५॥चतुसप्तप्रयोगेणसिद्धि
राकाशगामिनी॥यत्रेच्छातत्रगच्छन्तिनात्रकार्याविचारणा॥२६॥निर्गुण्डीमूलमादायअस
नेनसमंपिवेत॥प्लीहंगुल्मंतथाजीर्णंमासेनैकेननाशयेत्॥२७॥मधुसर्पिःसमायुक्तंश्वासका ८४

स

संनिवारयेत्॥ गुल्मशूलोदरश्चैव ग्रहणीं नाशयेद्ध्रुवम्॥ २८॥ मासद्वयप्रयोगेण सर्वरोगं प्रण

श्यति॥ चतुर्मासप्रयोगेण दिव्यदेहो भवेन्नरः॥ २९॥ निर्गुण्डीमूलमादाय स्वदेहे धारयेद्बुधः॥ धारये

त्सर्वभूतानि ग्रहाणां नागांश्च सर्वतः॥ ३०॥ ग्रहपीडास्तथा सर्पा डाकिनीमातरस्तथा॥ गुह्यकाश्च पिशा

चाश्च वेतालाश्चैव राक्षसाः॥ ३१॥ बालपीडाकराश्चान्ये मातृकापूजनादयः॥ धूपयित्वा प्रणश्यन्ति

सिंहं दृष्ट्वा मृगा यथा॥ ३२॥ प्रणवं च तथा माया माया कूर्चं फडर्यकम्॥ वह्निजायान्तमंत्रेण शतं जप्त्वो

पधोपरि॥ ३३॥ जप्त्वा स्मृत्वा भक्षयेद्यः कल्पोक्तफलभाग्भवेत्॥ ॐ ह्रीं ह्रीं हूँ फट् स्वाहा॥ अष्टोत्त

रशतं भुक्ष्य अष्टोत्तरशतं जपेत्॥ षष्टिका भोजनं कुर्यात्क्षीरेण सह सर्वदा॥ क्षाराम्ललवणस्नेह

वातातपविवर्जयेत॥३५॥कुर्यान्नरः शुद्धचित्तो यावद्दोषविसेवनम्॥ विधिनैवोद्धरेद्देवीं निर्गुण्डीं
सर्वकामदम्॥ ३६॥निर्गुण्ड्यांच समारूह्य अयुतं प्रजपेन्नरः॥ विद्याप्राप्तिर्भवेत्सत्यं नान्यथा श
ङ्करोदितम्॥३७॥ॐ सरस्वत्यै नमः॥ग्राहयेत्पुष्यभे प्रातर्निर्गुण्डीमूलजां त्वचं॥शुष्कं कृत्वा विचू
र्ण्याथ कर्षं कर्षं पिबेत्सदा॥३८॥अजामूत्रानुपानेन षण्मासाद्भ्रमते भवेत॥ वर्षमात्रप्रयोगे
ण शिवतुल्यो भवेन्नरः॥३९॥निर्गुण्डीमूलमादाय छायाशुष्कं विचूर्णितम्॥ सप्ताहं गोजले
नाक्तं हन्ति सर्वं त्वगामयान्॥४०॥हस्तार्के सिन्दुवारस्य मूलं चोत्तरगं हरेत॥स्पर्शेन वन्धविच्छे
दं कुरुत्ते शीघ्रमद्भुतम्॥४१॥निर्गुण्डीकां च सिद्धार्थान् गृहद्वारे ऽथवा पणे॥वद्धेपुष्यार्कसंयोगे

जायतेक्रयविक्रयः॥४२॥ इतितेकथितंदेविनिर्गुण्डीकल्पकंपरम्॥ नाभक्तायप्रदातव्यंशिव
निन्दापरायच॥४३॥ इतिनिर्गुण्डीकल्पष्टाविंशः॥२८॥ अथकाकजङ्घाकल्पः॥ काकज
ङ्घाक्षुपविशेषः॥ काकजङ्घाध्वाङ्क्षजङ्घाकाकाह्वावायसीचसा॥ पारावतपदीदासीनन्दिकान्
तासुलोमशा॥१॥ काकजङ्घातुतिक्तोष्णाकृमिव्रणकफापहा॥ बाधीर्यजीर्णनाशाचविषमज्व
रहानृणाम्॥२॥ हिमाकषायासंप्रोक्ताकफपित्तविनाशिनी॥ रक्तकुष्ठहराकण्डुविषहाछर्दि
नाशिनी॥३॥ औषधीपरमश्रेष्ठावन्दनीयासुरैरपि॥ काकजङ्घेतिविख्याताग्रामेसर्वत्रतिष्ठति॥४॥
अश्लेषानक्षत्रेसुदिनेभानोखदिरकीलकेनगृहीतव्यातदासिद्धिर्भवति॥ रविवारेयथाष्टमीसप्त

मीवानत्तिथौशुचिर्भूत्वास्वरक्तपंचमलेनसहयस्मैदीयतेसावश्या॥ॐनमोभगवतित्रिपुरेत्तिह्रीँ२
अमोअमुकींवशमानयस्वाहा॥गोरोचनेनसहतिलकंकृत्वासर्वजनप्रियोभवति।तन्मूलंशि
रसिवध्वासर्वोपद्रवंनाशयति॥तन्मूलंहेम्नावेष्टितंकृत्वादेहधारणात्सर्वप्रहारंनाशयति।तद्र
सेनतन्मूलंपेसयित्वाब्राह्मणेदातव्यंव्रणरोगोनश्यति॥गोमूत्रेणसहपेषयित्वामुखेधारणात्
मुखरोगंनाशयति॥काकजंघाभृङ्गराजाऽमलकंसंगृहीत्वातिलतैलेनपाचयेत्तत्तैलाभ्यं
ङ्गनातखअनत्वंनाशयति॥घृतेनसहपीत्वापित्तोदररोगोनश्यति॥शीतोदकेनमधुनासहपीत्वा
छर्दिरोगंनाशयति॥क्षीरेणपीत्वारुधिरश्रावंनाशयति॥तन्मूलंकुसेनसहपीत्वाउदरशूलंनाश

८६

यति॥तन्मूलं कटुतैलेनसहपीत्वावातरोगंनाशयति॥श्वेतगोक्षीरेणसहपीत्वावन्ध्यागर्भवती
भवति॥तन्मूलंभल्लातकेनसहपीत्वावातरोगंनाशयति॥तन्मूलंदुग्धेनसहपानात्क्षोधरोगं
नाशयति॥केतकीरसेनसहभक्षणाच्छिरोरोगंनाशयति॥मधुनासहभक्षणेनउष्णात्वरोगंना
शयति॥जलेनभक्षणाज्ज्वालांगर्दभरोगंउदरकृमींश्चनाशयति॥तन्मूलक्काथभक्षणाद्दी
र्घस्तम्भोभवति॥तन्मूलंकर्णेधारणान्नेत्ररोगंनाशयति॥गोमूत्रेणपानादुदरक्रिमिंनाशय
ति॥तन्मूलेदुग्धंपेषयित्वाशिरोलेपाद्द्रुशनाशयति॥तन्मूलामलकभृङ्गराजरसंपाचयित्वा
शिरःस्नानाच्छिरःकृमिंपलितंवाधीयश्चनाशयति॥तन्मूलंतण्डुलोदकेनपानाद्व्रणनाशः

गुडेन भक्षणान्मूत्रकृच्छ्रनाशः॥ मेषमांसक्काथेन भक्षणात्क्षयरोगनाशः॥ गोदुग्धेन सह गण्डू
षणान्मुखरोगनाशः॥ तन्मूलं दध्नासह भक्षणात्पामानाशः॥ मधुनासह भक्षणाद्दीर्घपत
नत्वनाशः॥ महिषनवनीतेन तन्मूललेपाल्लिंगे मूत्रालप्रमाणः॥ तन्मूललेपाच्छस्त्रक्षते
षु रुधिरश्रावनाशः॥ तन्मूलचूर्णभक्षणात्प्रदरनाशः॥ तल्लेपात्श्वेतकुष्टनाशः॥ तच्चूर्ण
सेवनेन शूलमुदरकृमींश्च नाशयति कण्डूर्तिं रक्तपित्तं च शमयति विषं नाशयति॥ गृहीत्वा पु
ष्यनक्षत्रे काकजङ्घाजटा यथा॥ सर्वाङ्गं लेपनाच्चुद्धस्तम्भ दिव्यो नरो भवेत्॥५॥ मूलन्तु काकज
ङ्घाया धारणाच्च शिरोपरि॥ मंत्रेणैवा निशं तेषां भवेन्निद्रावलीयसी॥६॥ शुद्धे शुद्धे योगिनी महाने

द्रे स्वाहा ॥ महानिंद्रायणीं देवीं मंत्रेणानेन पूजयेत् ॥ तेनैव गृहमध्ये च मंत्रं शतत्रयं जपेत् ॥ ७ ॥ महा
निन्द्रायनी स्मृत्वा महानिन्द्रान्विता जनाः ॥ भवन्ति नात्र सन्देहो सत्यं सत्यं वरानने ॥ ८ ॥ कृष्णोत्प
लं मधुकरस्य च पक्षयुग्मं मूलं तथा तगरजं शिखिकाकजङ्घा ॥ यस्याः शिरोगतमिदं विहितं हि चूर्ण
दासी भवेत् झटिति सा तरुणी न चित्रम् ॥ ९ ॥ काकजङ्घा सिता ग्राह्या गृध्रस्य च वसा तथा ॥ अश्वगन्
धा समायुक्ता मर्दिता क्षीरेण पेषयेत् ॥ १० ॥ अनेन लिप्तपादस्तु योजनानां शतं व्रजेत् ॥ ॐ नमो भग
वते रुद्राय भूतप्रेत नाशनाय शङ्ख चक्र गदा धराय हन हन महते चन्द्रपूताय हुं फट् स्वाहा ॥ ११ ॥ का
कजङ्घा वचा कुष्ठं बिल्वपत्रं च कुंकुमम् ॥ स्वरक्तसंयुतं भाले तिलकं लोकवश्यकम् ॥ १२ ॥ काक

जङ्घा वचाकुष्ठं शुक्रशोणितसंयुतम्॥ दत्ते सा भोजने बाला श्मशाने रोदने सदा॥१३॥काकज
ङ्घा शिग्रुमूले मुखेन विधृते शिव॥ चर्वित्वा दन्तकीटानां विनाशो हि भवेद्ध्रुरा॥१४॥काकज
ङ्घास्नुहि नीलीकषायो मधुयोजितः॥ दन्ताक्रान्तान्दन्तजांश्च कृमिन्नाशयते हरः॥१५॥का
कजङ्घोद्वर्त्तनं नु अङ्गरागकरं भवेत्॥ मूलं नु काकजङ्घाया दुग्धपीतं नु शोषनुत्॥१६॥अ
र्जुनस्य च पत्राणि जम्बुपत्रयुतानि च॥ मल्लोघ्राणि च तल्ले पोदेह दुर्गन्धतां हरेत्॥१७॥मूलन्नु
काकजङ्घाया त्रिरात्रेणैव शोषितं॥ पाकपूतीवेदनाश्च हन्ति वै रोगिणो व्रणे॥१८॥काकजङ्घा।
वला श्यामा भृङ्गराजाऽपमार्गका॥ एकैकं पुष्पयोगेन वध्वा चातुर्थिकं हरेत्॥१९॥काकज

ङ्गासमूलाग्रं पुष्ये सम्यग्समाहरेत्॥ सितास्त्र पुंखामूलेन सघृतं तद्रसं रजः॥ २०॥ अयमा
ससेवितं कर्षं सर्वशस्त्रनिवारणम्॥ यावद्विण्मूत्रसंसक्तमस्तावद्धायामसेववा॥ २१॥ क्षी
रे पीतेन्वतच्चूर्णं वलिसंप्रकरोतिहि॥ मण्डलं सेवयेद्यस्तु वृद्धोपिनरू णायते॥ २२॥ तच्चूर्ण
मी श्वरीमूलं गोधूमघृतसेवितम्॥ शरीरं वज्रकल्पं च कुरुते रवितेजवत्॥ २३॥ सुश्वेतका
कजङ्घायामूलं श्वेताङ्गकेशरम्॥ मधुनानाभिलेपेन नरो वीर्यं न मुञ्चति॥ २४॥ योषिद्वा
मभुजे चैव पुरुषो दक्षिणे भुजे॥ वध्नीयाद्गुटिकायस्तु तत्क्षणाद्द्वकाम्यदम्॥ २५॥ पुष्या
र्के च समुद्धृत्य वस्त्रैः शिरसि संस्थितम्॥ काकजङ्घाभवं मूलं सर्वशस्त्रनिवारकम्॥ २६॥

गोरोचनं वंशलोचनमत्स्यपित्तकुंकुमस्त्रीपुष्पश्रीखंडरक्तचंदनकाकजंघामूलानि सम
भागानि कूपतडागनदीतोयेन कुमारिकाहस्तेन पेषयित्वा गुटिकां कृत्वा छायायां संशोष्य
तिलकं कृत्वा यां यां पश्यति सा वश्या भवति सत्यं ॥२७॥ क्षीरक्षीप्रारसं गृह्य काकजंघारसं
तथा ॥ सूतकं मर्दयेत्तेन दिनमेकं शुभे दिने ॥२८॥ तत्क्षणाज्जायते भस्म यथा वह्निरिवेन्ध
ने ॥ भस्मना तेन सूतस्य सर्वलोहादिकं तथा ॥२९॥ पुटत्रयेण देवेशि तत्सर्वं काञ्चनं भवे
त् ॥ काकजंघारसं गृह्य तारमध्ये विनिःक्षिपेत् ॥३०॥ तारं तु स्वर्णतां याति जाम्बूनदसमप्र
भम् ॥ काकजंघारसं गृह्य वङ्गमध्ये विनिःक्षिपेत् ॥३१॥ तद्वङ्गं रौप्यतां याति नात्र कार्या वि

चारणा॥ इत्येतत्कथितं देवि काकजङ्घाविधानकम्॥३१॥ इति काकजङ्घाकल्पः सप्तत्रिंशतितमः॥३७॥ ॥अथ क्षीराक्षिप्राकल्पः॥ क्षीराक्षिप्रा महाभागा मरुदेशे प्रजायते॥ यमुनायास्तटे चैव जायते सुरसुन्दरी॥१॥ अङ्गुलीमानमात्रं तु कोलं तस्याः प्रजायते॥ वर्षायां शुष्कतां याति हेमन्ते च प्ररोहति॥२॥ क्षिप्रं वर्द्धयते सा तु गवां चैव सुभक्षणा॥ भग्ना च स्रवते क्षीरं पुष्पं चित्रकसन्निभम्॥३॥ वीजपूरदलाकारा लता सा तु पयस्विनी॥ गजदन्ताकृतिः कन्दः फलं पीतं भवेदपि॥४॥ रसं वन्धयते क्षिप्रं वोद्धव्या सा महौषधी॥ विद्याधरः सहस्रेण सिद्धानां च वर्षेतेन च॥५॥ औषधीरक्षते दिव्या गुह्यकैः समहात्मभिः॥ तपोयुक्तः सु

शान्तात्माशुद्धचित्तोजितेन्द्रियः॥ ६॥ कृतरक्षः शुचिर्भूत्वामंत्रेणानेनसुव्रतः॥ ॐ नमः कन्दा
यविपरीतभक्षाय अमृतंकुरुस्वाहा॥ उत्पाटयेदनेनैवततः कर्मसमाचरेत्॥ ७॥ एतद्भक्षण
मात्रेणखेचरोजायतेनरः॥ अनेनैवतुमंत्रेणभक्षणादिकमाचरेत॥ ८॥ अन्यथानैवसिद्धि
स्तुजायतेप्राणवल्लभे॥ तस्याःकर्मप्रवक्ष्यामिदिव्यंमानुषसौख्यकम्॥ ९॥ रसंतस्यास्तुसंग
ह्यनिक्षिप्यसुसमाहितः॥ तद्रसंचघृतक्षौद्रंसमभागंचमेलयेत्॥ १०॥ पिबेतकृष्णपाञ्चैवदे
वतुल्योऽमरोभवेत॥ दिव्यरूपोमहातेजाविद्याधरपतिर्भवेत्॥ ११॥ आगत्यसर्वभूतानिसेव
न्तेतंदिनेदिने॥ कामदेवसमोभूत्वाविचरेदवनीतले॥ १२॥ विद्याधरसहस्रेणसिद्धानान्तुश

९०

तेन च ॥ तिष्ठते सततं तत्र पश्यमानं दिने दिने ॥१३॥ ईश्वरेणानुभूतेन रूपेण प्रतिमो भवेत् ॥
तावत्सतिष्ठते चैव यावच्चन्द्रार्कतारकाः ॥१४॥ समग्रं क्षीररक्षिप्राय्याग्राह्यं चैवाक्षतं ध्रु
वम् ॥ ततः प्रयोगं कुर्वीत ततः सिद्धिर्भविष्यति ॥१५॥ क्षीररक्षिपारसंगृह्य काकजङ्घारस
स्तथा ॥ सूतकं मर्दयेत्तेन दिनमेकं शुभे दिने ॥१६॥ तत्क्षणाज्जायते भस्म यथा वह्निरिवे
न्धने ॥ पुटत्रयेण ताम्रं च कांचनं भवति ध्रुवम् ॥१७॥ इति क्षीररक्षिप्राकल्प अष्टत्रिंशतमः ॥
३८॥ ॥ अथ एरण्डकल्पः ॥ एरण्डवृक्षविशेषः ॥ तत्पर्यायः व्याघ्रपुच्छ· गन्धर्वहस्त
क· उरुवुक· चित्रक· चंचु· पक्षाङ्गुल· मण्ड· वर्द्धमान· वृक· अमण्ड· कान्त· तरुण· शुक्ल·

वातारि· दीर्घपत्रक· तत्तैलगुणाः मधुरत्वं· गुरुत्वं· अतिश्लेष्मवर्धनत्वं· वातरक्तगुल्महृद्रो
गजीर्णज्वरनाशित्वं॥ कृमिदोषंसकलाङ्ग मूलकुष्ठिनाशित्वं॥ स्वादुत्वं· रसायनोत्तमत्वं·
पित्तप्रकोपनत्वं· अतिदीपनत्वं· आमवातनाशित्वं· भेदकत्वंच· श्वेतैरण्डगुणाः कटुतिक्तो
ष्णत्त्व· कफार्त्तिज्वरवायुकाशनाशित्वं· रसायनत्वंच· शूलगुणाः शूलवायुकफनाशित्वं·
शुक्रकारित्वंच· पुनरन्यत्प्रवक्ष्यामितच्छृणुष्वविशेषतः॥ एरण्डकल्पकंदेविनराणांचशुभंकरं॥
१॥ चतुर्विधंचतज्ज्ञेयंरक्तपित्तादिभेदतः॥ तत्तैलंसूर्यवारेच ग्राह्यंयत्नेनमानरः॥ थारक्तैरण्डक
तैलेनशुद्धसूतकगन्धकौ॥ मेलयित्वापचेत्तैलं लोहमात्रेविशेषतः॥ ३॥ यामसमात्रंपचेद्धीमान्

तैलं गुञ्जानिभं भवेत्॥ तत्तारनागताम्रेषु सहस्रांशेन वेधयेत्॥४॥ तैलं तन्मधुनायुक्तं गंधकेन स
मन्वितं॥ भुवि मासं विनिःक्षिप्य ततो कृत्वा विधानतः॥५॥ शुद्धकोष्ठे वसे वेत गुरुवन्दनपूर्वकम्
॥ क्षीराहारं प्रकुर्वीत सत्यवाग्विजितेन्द्रियः॥६॥ प्रातर्निष्कं चतुष्कं तु लिहेद्बदहनप्रभम्॥ अरुणादि
त्यसंकाशो भवेन्मासप्रयोगतः॥७॥ मासद्वयप्रयोगेण सहस्रायुर्भवेन्नरः॥ मासत्रयप्रयोगेण जीवेदा
चन्द्रतारकम्॥८॥ मासषट्कप्रयोगेण ब्रह्मायुर्भवति ध्रुवम्॥ संवत्सरप्रयोगेण विष्णुतुल्यो न संशयः॥
९॥ द्वादशाब्दप्रयोगेण जीवन्मुक्तो भवेन्नरः॥ इत्येतत्कथितं देवि रक्तैरण्डककल्पकम्॥१०॥ कृष्णै
रण्डकतैलं च कृष्णगोक्षीरसंयुतम्॥ शुद्धकोष्ठे पिबेत्सद्यः सुरैरपि न दृश्यते॥११॥ कृष्णगोक्षीरसं

युक्तं मधुना च समन्वितम् ॥ अंजनात्सप्तपातालं पश्येन्नध्यान्नभास्करम् ॥१२॥ तत्तैलपिष्टमानस्तु
बद्धो भवति पारदः ॥ मृते वङ्गे सहस्रांशे वेधभागमुदाहृतम् ॥१३॥ तद्वङ्गं वेधमायाति यावदाचन्द्रतारकं
॥ तद्वङ्ग धारणादेव खेचरः स तु जायते ॥१४॥ अवध्यो देवदैत्यानां विष्णुलोके चरत्यसौ ॥ सर्वज्ञान
मिदं प्रोक्तं सिद्धियोगं मनीषिभिः ॥१५॥ श्वेतैरण्डस्य मूलं तु गृहीत्वा पुष्यभास्करे ॥ पूर्ववत्तैलमाहृत्य
प्रयोगं तु समाचरेत् ॥१६ ॥ तत्तैलं तु समाघृष्टं कर्पूरेण समन्वितं ॥ त[illegible]ं अंजयेन्नेत्रयुगलं सप्तपा
तालदर्शनम् ॥१७॥ सिद्धांजनमिदं सिद्धं सिद्धैर्विनिर्मितं ॥ तन्मूलं मार्गपाषाणशुद्धसूतसम
न्वितं ॥१८॥ कुरु चन्दनसंपिष्टं गन्धकाम्रूपागते धमेत् ॥ शाल्मलीखदिराङ्गारैर्बद्धो भवति ॥ भ

पात्॥१९॥तद्वङ्गस्य द्रुतो क्षिप्रं सहस्रांशेन वेधकम्॥ श्वेतगोक्षीरसंयुक्तं तन्मूलं निष्कमात्रकम्॥
२०॥लिहेद्गोक्षीरसंयुक्तं क्षीरांशी विजितेन्द्रियः॥ मासमेकप्रयोगेण खेचरत्वं लभेन्नरः॥२१॥मास
द्वयप्रयोगेण चन्द्रवन्निर्मलो भवेत्॥ मासत्रयप्रयोगेण खेचरत्वं लभेन्नरः॥२२॥मासषट्कप्रयोगेण
पातालं पश्यति ध्रुवम्॥सम्वत्सरप्रयोगेण जीवेद्ब्रह्मदिनं नरः॥२३॥पीतैरण्डस्य मूलन्तु ग्राहयेत्पुष्यभा
स्करे॥छायाशुष्कन्तु तत्कृत्वा नवनीतेन पेषयेत्॥२४॥त्रिकटु त्रिफलायुक्तं सिताज्यमधुसंयुतं॥
स्निग्धभाण्डे विनिक्षिप्य भूतले चतनः क्षिपेत्॥२५॥मासादुद्धृत्य नित्यं लिहेन्निष्कन्तु यत्नतः॥एक
मासप्रयोगेण वली पलितवर्जितः॥२६॥मासषट्कप्रयोगेण जीवेदाचन्द्रतारकम्॥सम्वत्सरप्रयोगेण

देवतासहमोदते॥२७॥अष्टोत्तरशतंकाष्ठमेरण्डंचतुरङ्गुलम्॥लवणंकटुतैलञ्चत्रिभि
रेकत्रमेलयेत्॥२८॥अष्टोत्तरशतंहुत्वायन्त्राःसर्ववशाभवेत्॥सुतस्थैरण्डमूलंवाछाया
शुष्कंविषापहम्॥२९॥विस्फोटकेचलूतायामेरण्डतैलमर्दनात्॥सर्वंप्रशममायातिलूता
विस्फोटकादयः॥३०॥एरण्डतैलंसकुनस्यतैलंतथाश्रीविल्वरसंगृहीत्वा॥समर्दयेद्दुग्धगृह
स्तकेनतदास्तनंस्यात्पतितंनचैव॥३१॥मातुलुङ्गस्यबीजानिमूलमेरण्डकस्यच॥घृतेनसह
संयोज्यपाययेत्पुत्रकाङ्क्षिणीम्॥३२॥एरण्डमूलंकटुकिंपेषयित्वासुचिक्कणम्॥तद्विलेपनमात्रे
णशिरोऽर्त्तिर्नश्यतिक्षणात्॥३३॥एरण्डमूलकंपत्रंभृङ्गराजरसंतथा॥काञ्जिकेनसहसंपिष्टंलेपो

निचर्निकापरः॥ ३४॥ इतिएरण्डकल्पएकोनचत्वारिंशत्तमः॥ ३८॥ ॥अथतृणज्योतिक
ल्पः॥ ॥रात्रौप्रज्वलितेनित्यंतृणेनसदृशंभवेत्॥तस्यमूलंसमादायक्षीरमध्येक्षिपेन्नरः॥ १॥
तत्क्षणाज्जायतेरक्तंतत्क्षीरंयःपिबेन्नरः॥सप्तरात्रप्रयोगेणवलीपलितवर्जितः॥ २॥क्षीरेणनित्य
माहरेत्लवणाम्लादिवर्जयेत्॥द्विरष्टवर्षाकारश्चजीवेद्वर्षसहस्रकम्॥ ३॥तस्यमूलंतुसंगृह्य
तत्समंरसगंधकम्॥मातुलुङ्गरसेनैवएकीकृत्वाचमर्दयेत्॥ ४॥लेपयेच्चतुल्यपत्राणित्रिपुटा
द्भस्मशोभनम्॥भैरवस्यानुग्रहेणभवतिनात्रसंशयः॥ ५॥तन्मूलचूर्णसंयुक्तेरसराजेमहेश्वरी॥
मातुलुङ्गरसैर्घृष्टेमभ्रकंचरतिक्षणात्॥ ६॥माहिषीनवनीतेनतस्यामूलन्तुपेषयेत्॥कपिल

ज्यप्रदीपं तु न्नकल्पे च कारयेत ॥ ७ ॥ शिवालये शुचिर्भूत्वा ग्राहयेत् कज्जलं बुधः ॥
कृष्णाष्टम्यां चतुर्दश्यां पूजां कृत्वा विधानतः ॥ ८ ॥ तेनैवाञ्जितमात्रेण अदृश्यो जायते
तेनरः ॥ तस्यामूलं तु संग्राह्य सूक्ष्मचूर्णानि कारयेत ॥ ९ ॥ अलक्तकं समादाय मिश्री
कृत्वा विधानतः ॥ कपिलाघृतसंयुक्तं कज्जलं पातयेद्बुधः ॥ १० ॥ तेनाञ्जनान्नेत्रयु
गे ह्यदृश्यो जायते नरः ॥ इति तेकथितं देवि तृणज्योत्याश्चकल्पकम् ॥ ११ ॥ इतितृण
ज्योतिकल्पश्चत्वारिंशत्तमः ॥ ४० ॥ अथ योगरीकल्पः ॥ ॥ सिद्धस्वर्णस्यक
ल्पन्तु कथ्यते शृणु सांप्रतम् ॥ सिद्धस्वर्णः कल्पतरुर्योगरीनाम्नके श्वरः ॥ १ ॥ धातुभे

दीपंचमस्तु पर्यायाःपंचकीर्तिताः॥ कर्णाटेचोगरीख्यातासिद्धस्वर्णस्तुचोत्तरे॥२॥
पूर्वस्यांतालकेप्रोक्तो धातुभेदीच पश्चिमे॥ स्वर्णेतुकल्पवृक्षस्तु पंचनामसमन्वितः॥
३॥ मध्यस्तुस्वर्णविमलातस्तुरित्यविधीयते॥ शर्कराकन्दवत्पत्रंपुष्पंकार्पासस
न्निभम्॥४॥ लम्बायमानंतत्तुख्यंफलंचालोकिकंमतम्॥ शाखांसंछेदयेद्वि
प्रेन्द्र पुनः शाखांप्ररोपयेत्॥५॥ पुनर्वृक्षोभवेत्पुत्रतद्योगंशृणुयत्नतः॥ तस्यपत्र
रसेनैव पारदोमृतिमेष्यति॥ हरितालादयःसर्वेमृतिमेष्यन्तिसर्वथा॥७॥ तत्फल
न्तु समादायगृह्णीयात्तद्रसंनरः॥ तद्रसेखल्लनंकार्यंपारदस्यत्रियामकम्॥८॥ तंपा

रदंमूषिकायांदत्वाग्निंदापयेत्सुतः॥मूषिकाग्निप्रदानेनपारदोमृत्युमाप्नुयात्॥९॥तस्य
संभक्षणात्पुत्रकामरूपीभवेद्ध्रुवं॥पुनर्दन्ताभविष्यन्तिकृष्णकेशीभवेत्सुतः॥१०॥धातु
मात्रेपारदंतंलक्षवेधीभवेद्ध्रुवं॥तस्यपत्ररसेनैवतालंयामाष्टकंखल्लेत्॥११॥तस्यैवमूषि
कांकृत्वातत्तालंमृत्पुटंदेत्॥पुटंभजाक्षकंदत्वाततःसिद्धोभवेद्ध्रुवम्॥१२॥तस्यप्रभक्ष
णात्पुत्रकृष्णाएवनसंशयः॥धातुमात्रेतुतंदत्वालक्षवेधीभवेद्ध्रुवम्॥१३॥तत्फलस्यर
संगृह्यताम्रद्रावेविनिःक्षिपेत्॥तत्ताम्रंजायतेशुद्धंस्वर्णजाम्बूनदःप्रभम्॥१४॥तत्फल
स्यरसंगृह्यवङ्गभागेविनिःक्षिपेत्॥तत्तारंजायतेशुद्धंकुंदपुष्पसमप्रभम्॥१५॥एवंन

धातुमात्रेणतत्फलस्यरसंयुतः ॥ तत्क्षणादेवमायातिद्रुवंस्वर्णत्वमाप्नुयात् ॥ १६ ॥ रौप्यं
रौप्यत्वमायातिशतवेधी भवेत्सुतः ॥ इतितेकथितंशम योगशिकल्पमुत्तमम् ॥ ७ ॥ ॥
इतियोगशीकल्पएकचत्वारिंशत्तमः ॥ ४१ ॥ ॥ अथदग्धरुहाकल्पः ॥ दग्धरुहावृ
क्षविशेषः ॥ तत्पर्यायः ॥ दग्धरुहा· दग्धिका· दग्धा· स्थलेरुहा· रोमशा· कर्कशदला· भस्म
रोहा· सुदग्धिका· ॥ अस्यागुणाः ॥ कटुत्वं· कषायत्वं· उष्णत्वं· कफवातनाशित्वं· पित्तप्रको
पनत्वं· जठरानलदीपनत्वंच ॥ अथदग्धरुहाकल्पंशृणुयत्नेनसांप्रतम् ॥ तत्काष्ठंतुसमा
दायह्यग्निमध्येविनिःक्षिपेत् ॥ १ ॥ सचाङ्गारोभवेत्पुत्रतदङ्गारंतुवापयेत् ॥ अंगारेवृक्षतां

यातितद्रूक्षंसंग्रहेत्सुतः॥ २॥ ततपंचाङ्ग रसंगृह्य तालके पारदेथवा॥ एकविंशत्पुटंद
द्यात्ततोमृत्युर्नसंशयः॥ ३॥ तद्वयंतुसमायें धातु पात्रेविनिःक्षिपेत॥ तत्क्षणान्मृतिमा
याति धातवसुरपूजितः॥ ४॥ तत्काष्ठं मूषिकांकृत्वातत्र ताम्रंविनिःक्षिपेत॥ तत्क्षणान्मृ
तिमायाति॥ तदग्नौ तदाद द्यात्स्वर्णतांयातिनिःश्चितम्॥ ५॥ अङ्गारचूर्णवङ्गेतु शतांशेनप्र
भेदकृत॥ ततपंचाङ्ग रसेपुत्र धातुमात्रे विनिःक्षिपेत॥ ६॥ तीक्ष्णं च रौप्यतां याति स्वर्णं
स्वर्णत्वमाप्नुयात॥ शुद्ध सूतं समादायतन्मूषायांविनिःक्षिपेत॥ ७॥ तत्काष्ठेनाग्निप्र
ज्वाल्यतत्रैवेतद्रसंक्षिपेत॥ तत्काष्ठेनसमालोड्यपारदोमृतिमेष्यति॥ ८॥ रतिकान्वाष्ट ९६

मांशेनपारदंभक्षयेच्चतम्॥ वृद्धोपितरुणोभूत्वारमेतकामिनीशतम्॥ ९॥ स्तंभीस्तंमोहिनी

कामीक्षुधासागरएवच॥ तंपारदंचाष्टलोहंसहस्रांशेनवेधयेत्॥ १०॥ तस्याकन्दरसंदिव्यं

कृष्णानीरसमन्वितम्॥ ताम्बूलेनसमायुक्तं कृत्वाखादयेद्बुधः॥ ११॥ सर्वेषामेवलोहा

नांरसानांवह्निमध्यतः॥ सहस्रवेधपित्वातुकांचनंकुरुतेक्षणम्॥ १२॥ तथैवम्रियन्तेकान्तं

हेमाभ्रसंयुतेनच॥ इतिसञ्जीवनः प्रोक्तः किमन्यच्छ्रोतुमिच्छसि॥ १३॥ इतिदग्धरुहाक

ल्पः द्विचत्वारिंशत्तमः॥ ४२॥ ॥अथश्वेतवृहतीकल्पः॥ वृहती॰ क्षुद्रवान्ती॰ कि॰

तत्पर्यायः महती॰ क्रान्ता॰ वार्ताकी॰ सिंहिका॰ कूली॰ राष्ट्रिका॰ स्थूलकण्टा॰ भण्टाकी॰

महोटिका· बृहत्पत्री· कण्टकालु· कृपटालु· कण्टफला· डोरडा· वनवृन्ताकि· क्षिंहि· प्र
सहा· रक्तपाकी· लताबृहतीका॥ अस्या गुणाः कटुत्वं· तिक्तत्वं· उष्णत्वं· वातज्वरारोचक
कासश्वासहृद्रोगनाशित्वंच॥ श्री श्वेतबृहतीकल्पं शृणु यत्नेन सांप्रतम्॥ पुष्पं सर्वं श्वेतरूपं
संभवेद्धि भृगूद्वहः॥१॥ त्रिवीरैस्तु समाख्याता संग्रहेत्पुष्यभास्करे॥ सपुष्पोऽप्यजं कृत्वा तद्रसे
रविभावयेत्॥२॥ शतवारंतु संभाव्य पारदं तत्र निःक्षिपेत्॥ ततोपरि दत्त्वा तत्र तत्पश्चाङ्ग भृगूत्त
मः॥३॥ अधोपरिक्रमेणैव ततोऽग्निं दापयेल्लघुम्॥ पारदो मृतिं याति नात्र कार्या विचारणा॥
४॥ पारदं भक्षयेद्यस्तु तन्मूत्रं धातुवेधकृत्॥ तस्य भक्षणमात्रेण सर्वभक्षी भवेद्ध्रुवम्॥५॥ अंतरो

प्यपाचेनिः क्षिप्य रौप्यतां याति निश्चितम् ॥ इति ते कथितं [illegible]वृहतीकल्पकं परम् ॥ ६ ॥ इति
श्वेतवृहतीकल्पस्त्रिचत्वारिंशत्तमः ॥ ४३ ॥ ॥ अथ कण्टकशिरीषकल्पः ॥ शिरीषक
ल्पं वक्ष्यामि कण्टकादिप्रपूर्वकम् ॥ ताम्रद्रावे तत्प्रसूनं निःक्षिपेद्यत्नतः सुतः ॥ १ ॥ तच्चैव रौप्य
तां याति स्वर्णाकर्षेण योगतः ॥ तस्य काष्ठं समाघ्राय सर्पदष्टो द्विजोत्तमः ॥ २ ॥ छूरकेन तु सं
न्तु निष्काष्यतु प्रयत्नतः ॥ तच्चन्दनं तत्र दद्यान्निर्विषं जायते क्षणात् ॥ ३ ॥ विषमात्रे प्रद
तव्यस्तत्पयोगो द्विजोत्तमः ॥ सर्वं निर्विषतां याति वृक्षेशस्य प्रसादतः ॥ ४ ॥ रौप्यद्रावे पुष्पं
मत्त पश्चात् रसं क्षिपेत् ॥ तत्क्षणात्स्वर्णतां याति नात्र कार्या विचारणा ॥ ५ ॥ इति कण्टक

शिरीषकल्पश्चतुश्चत्वारिंशत्तमः ॥ ४४ ॥ ॥ अथ वल्लीत्रिवीराकल्पः ॥ वल्लीत्रिवी
राकल्पं तु शृणु यत्नेन सांप्रतम् ॥ वल्लीत्रिराचमादाय वज्रद्रावे विनिःक्षिपेत् ॥ १ ॥ तद्द्रं
रेण्य(ता)याति नात्र कार्या विचारणा ॥ तद्रसं तु समादाय पारदं संखलेत्सुतः ॥ २ ॥ एकविंशति
वारं तु स्वर्णेश ध्यानपूर्वकम् ॥ स एव संपुटं कृत्वा त्रिधा मृद्रापयेत्ततः ॥ ३ ॥ तत्र दद्यात्गजपुटं पा
रदो मृतिमेति वै ॥ स पारदो धातुमात्रे विंशद्वेदी भवेद्ध्रुवम् ॥ ४ ॥ नागं संसोध्य यत्नेन विंशद्दा
रं खल्लेत्सुतः ॥ तस्य द्रावं ततः कृत्वा तेन धाम्ये सततः ॥ ५ ॥ न श्यामा प्रोष्यतां याति नात्र का
र्या विचारणा ॥ ६ ॥ इति ते कथितं वत्स त्रिवीराकल्प उत्तमः ॥ ६ ॥ इति त्रिवीराकल्पः चतुःपञ्चाश ९८

न्नमः॥४५॥ ॥अथनकछिक्किणीकाकल्पः॥ नकछिक्किणिकाकल्पं शृणुरामविभा
नतः॥यस्यादर्शनमात्रेण ब्रह्माण्डस्फोटनंभवेत्॥१॥छिक्काप्रवाहोविप्रेन्द्रदर्शनाज्जाय
तेध्रुवम्॥रूपंगृञ्जनवज्ज्ञेयंफलंगुञ्जसपुष्पकम्॥२॥अस्यविज्ञानमात्रेणपारदादि
प्रसिद्ध्यति॥नकछिक्किणीकांगृह्यतद्रसंवज्रभाण्डगे॥३॥निःक्षिपेद्यत्नतोदेवितद्रसःद्रव
रूपकम्॥तद्रौप्यंभवतिशाश्वन्नात्रकार्याविचारणा॥४॥नकछिक्किणीकांगृह्यरसंनि
क्षाशयेत्ततः॥शुद्धपारदमानीयतद्रसेनखल्वेत्पुनः॥५॥त्रिंशद्दिनंखल्वेद्यत्नात्ततोग्निं
दापयेत्ततः॥पारदोमृतिमायातिनात्रकार्याविचारणा॥६॥तंपारदंरतिकार्धंभक्षये

त्सर्वरोगहृत् ॥ स्त्रीशतं रमते सद्यो महाधुत्सागरो भवेत् ॥ ७ ॥ तं पारदं समानीय धातुमात्रे
विनिःक्षिपेत् ॥ वेधो भवति विप्रेन्द्र नात्र कार्या विचारणा ॥ ८ ॥ हरितालं स्वजातिं समानीय
प्रयत्नतः ॥ तद्रसेन खल्वे यत्नादेकविंशतिवासरः ॥ ९ ॥ हरितालो मृतिर्भीतिपारदादधि
कोमतः ॥ हरितालं समानीय धातुमात्रे विनिःक्षिपेत् ॥ १० ॥ धातुर्वेधो भवेत्सद्यो नात्र कार्या
विचारणा ॥ हरितालं स्वजातिं पलवितयमात्रकम् ॥ ११ ॥ तद्रसेन खल्वे यत्नाद्देवप्रहर
संख्यया ॥ काचकूप्यां ततः क्षिप्य मृत्पुटं त्रितयं ददेत् ॥ १२ ॥ स्वप्नवातं ततः संदद्यादथवा
केवलां चवा ॥ शुष्कं कृत्वा विनिःक्षिप्य मुखे केशांमुसंददेत् ॥ १३ ॥ अंधःकूपिं ततः स्था ९९

प्य शर्करापात्रकं तथः॥ पातालयंत्रं कृत्वा तु यदमेकं समाहरेत्॥१३॥ घटव ध्रौम्स्थ
यित्वा कूपिं चाधोमुखीं क्षिपेत्॥ परस्परमधोहृपां चूर्णनि स्तात्र संदेत्॥१४॥ नागशे
रकमानीयत द्रावं कारयेत्तत॥ तन्नदद्यात्तु तैलं रौप्यतां यातिनिश्चितम्॥१६॥ इतिनव
छिक्किणीकाकल्पः षट्चत्वारिंशत्तमः॥४६॥ अथ लोहद्रावकल्पः॥ ॥अथ
ते संप्रवक्ष्यामि लोहद्रावस्य कल्पकम्॥ लोहसूचीं समादाय लोहद्रावे विनिः
क्षिपेत्॥१॥ तत्क्षणाद्द्रावमायाति सा सूची नात्र संशयः॥ वज्रमूषां ततः कृत्वा
शुद्धसूतं विनिः क्षिपेत्॥२॥ लोहसूचीद्रावरसं तत्र यत्नेन संक्षिपेत्॥ तत्राग्निदाप

ये घत्नात्पुनस्तस्य रसं क्षिपेत ॥ ३ ॥ स सूतो मृत्युमायाति नात्र कार्या विचारणा ॥ अष्टधा
तु युतं सूतं दत्वा कांचनतां व्रजेत ॥ ४ ॥ तं सूतं भक्षयेद्धीमान् स गच्छेदमरत्वताम् ॥ तस्य मूत्रपु
रीषेण शुल्वं भवति कांचनम् ॥ ५ ॥ इति लोहद्रावकल्पः सप्तचत्वारिंशत्तमः ॥ ४७ ॥ ॥
अथ ताम्रद्रवकल्पः ॥ ताम्रद्रावप्रयोगं वै शृणु यत्नेन सांप्रतम् ॥ ताम्रद्रावे तथा सूचीं गं
धिभेदे विनिःक्षिपेत ॥ १ ॥ सूचीद्रवो यामम् मात्राद्भवत्येव न संशयः ॥ तद्रसं तु समादा
य शुद्धताम्रेषु निःक्षिपेत ॥ २ ॥ तत्ताम्रं स्वर्णतां याति भैरवस्य प्रसादतः ॥ सहस्रं तोलकं ता
म्रे तोलमात्रं रसं क्षिपेत ॥ ३ ॥ शुद्धं सहस्रं भवेत्तत्तु स्वर्णं जाम्बूनदं भवेत ॥ सूतस्य रवलं

कृत्वा वारं वारं रसं क्षिपेत् ॥ ४ ॥ पुनर्वै खल्लनं कृत्वा सप्तवारांस्तु संखल्लेत ॥ अथ वै लोह
नलिकां यंत्रं संकारयेत्सुतः ॥ ५ ॥ तद्यंत्रे तु रसं दद्याच्छतवारं निरंतरम् ॥ रक्तदुग्धाव
त्रभानो रसं तत्र त्रिवारकम् ॥ ६ ॥ मुद्रां लोहेन दत्वा तु संयत्नेन दापयेत् ॥ सप्तवारांस्तु सं
भाव्य वह्निं दद्याद्द्विजोत्तमः ॥ ७ ॥ पारदं तत्र संस्थाप्य नलिकानां च विंशतिः ॥ लम्बायमा
नं तद्यंत्रं द्वाविंशदंगुलात्मकम् ॥ ८ ॥ मुखे मुद्रां विधायाथ वज्रदोग्धीति नामकम् ॥ त्रिधा
रा वज्रभावोस्तु दुग्धमानीय यत्नतः ॥ ९ ॥ तद्यंत्रे क्षेपयेत्सुत्र वारविंशतिकं सति ॥ अथ चूलीं
तत्र कृत्वा यंत्रं तत्र निधापयेत ॥ १० ॥ कीलकेबंधनं कृत्वा तत्राग्निं दापयेन्सतः ॥ एकैकाङ्गा

एकैदग्धाद्वाविंशतिकंसुतः ॥११॥ ततोऽङ्गारद्वयंदद्यात्त्रिपंचसप्तनन्दकान् ॥ एवंषड्माष
पर्यंतंतत्राग्निंदापयेत्सुतः ॥१२॥ अंगुलीद्वितयेविप्रकन्दलिकाप्रकीर्तिताः ॥ मुद्रासमीप
मायातिपारदोहिद्विजोत्तमः ॥१३॥ शब्दंकरोतिविप्रेन्द्रकल्लाह्यानन्तुतत्रवै ॥ ततोग्निंदा
पयेद्यत्नादहोरात्रंनिरन्तरम् ॥१४॥ एकैकानुकल्लाविप्रस्यधोयास्यतिनिश्चितम् ॥ कलां
पंचदशांतंहिभक्षणार्थंप्रकल्पयेत् ॥१५॥ तदुत्तरंद्विजश्रेष्ठधातुवेधकरोभवेत् ॥ कला
षोडशपर्यन्तंपारदःपरिकीर्तितः ॥१६॥ ततःसप्तदशीविप्रकल्लाजागर्तिकेवला ॥ रक्तसि
धारवज्रसारसंयन्त्रोपरिक्षिपेत् ॥१७॥ तत्संतंतामृतांयातिपुनरग्निंप्रदापयेत् ॥ दिनपंचदशं

दद्यात्तन्तुमात्रेग्निकर्मच ॥१८॥ यदासुवर्णसंदृस्यात्तदानिष्कास्यतांसुतः ॥ अणिमाद्यष्ट
कंतस्यहस्तेसंभवतिध्रुवम् ॥ १९॥ ताम्रेलोहादिकेश्चोवैतद्यंत्रस्पर्शनंचरेत् ॥ सर्वंसुवर्णमाया
तिनात्रकार्याविचारणा ॥ २०॥ प्रकारादौतुपदूर्णंमणिकायांतुसंस्पृशेत् ॥ तद्वर्णरत्नंतद्भूया
न्नात्रकार्याविचारणा ॥ २१॥ पारदंतुसमानीयतद्यन्त्रेणखल्लेयदि ॥ तत्क्षणान्मृतिमायातिना
त्रकार्याविचारणा ॥२२॥ तंमृतंपारदंगृह्यपारदेस्तुविनिःक्षिपेत् ॥ गुटिकाजायतेशुद्धासुरवाष्ट
कसमन्विता ॥२३॥ तस्यसंधारणात्पुत्रयदिच्छतितदाप्नुयात् ॥ इत्येषःपारदःप्रोक्तःसिद्धरू
पप्रियंवदः ॥२४॥ फल्गुनानामपिपंचानांसमुद्धृत्यप्रकीर्तितः ॥ सूतस्यखल्लनंकृत्वावारंवारं

रसं क्षिपेत्॥ २५॥ पुनर्वै खल्लनं कृत्वा सप्तवारं तु तं खलेत्॥ एवं संखलितः सूतो मूषिकायां विनिः

क्षिपेत्॥ २६॥ लाजावै जायते सूतो गुणराजो भवेत्सुतः॥ तस्य संभक्षणादेव कृष्णाकेशा भवंति

हि॥ २७॥ पुनर्दन्ता भविष्यन्ति सदा षोडशवार्षिकः॥ इति लिकथितं वत्स ताम्रद्रावस्य कल्प

कम्॥ २८॥ इति ताम्रद्रावकल्प अष्टचत्वारिंशत्तमः॥ ४८॥ ॥अथ शंखद्रावकल्पः॥ ॥

शंखद्रावस्य कल्पो हि शृणुस्व पदतो मम॥ शंखद्रावे शंखस्य चीचतुर्थी अंशेन संद्रवेत्॥ १॥

शंखद्रावरसं विप्र धातुमात्रे विनिःक्षिपेत्॥ ततः सर्वं शोष्यतां यांति स्वर्णाकर्षेण योगतः॥ २॥ गुञ्जा

मात्रं तोलके नु तद्द्रवे तु कुन्दपुष्पवत्॥ मुद्रमतां तं द्रसं च खल्वित्वा सप्तवारकम्॥ ३॥ ततः सू

येपुटं विप्र प्रदद्यात्स प्रवारकम् ॥ ताम्रभाग्निपुटं दद्याल्लो जावज्जायते सुरम् ॥ ४ ॥ समुद्र पारदो
दैवसर्वरोगान्निहन्ति च ॥ तण्डारपारदस्य ताम्बूले भक्षणं चरेत् ॥ ५ ॥ तस्यैवदिवसेनैव रोगहानि
प्रजायते ॥ कामरूपो भवेत्सोऽपि नात्र कार्या विचारणा ॥ ६ ॥ फलसाहस्रके पुत्र पल मात्ररसं क्षिपे
त् ॥ ताम्रं संजायते शुद्धं कुन्दपुष्पसमप्रभम् ॥ ७ ॥ इति शंखद्रावकल्प एकोनपंचाशत्तमः ॥
४९ ॥ ॥ अथ दन्ताम्लकल्पः ॥ दन्ताम्लस्य च विप्रेन्द्र कथ्यते कल्पमुत्तमम् ॥ दन्ताम्ला
धो यदा गच्छेद् दन्ताम्ला संभवन्ति हि ॥ १ ॥ पारदं शोधयित्वाथ खल्ले चैव विनिःक्षिपेत् ॥ त
त्र द्रावरसं दत्वा पुटं पूर्वं द्विजोत्तमः ॥ २ ॥ वारंवारं खल्लेत्तुत्र दिनानामेकविंशतिः ॥ एवं

कृतेपारदस्तुमृतिमेतिनसंशयः॥३॥ पारदंधातुमात्रेतुनिःक्षिपेद्यादिसत्तमः॥ धातुमात्र
स्यवेधस्यान्नात्रकार्याविचारणा॥४॥ पात्रेतुशर्करायाश्चतत्रपारदतोलकम्॥ चतुर्वल्लंसो
मल्लंचतत्रमायांविनिःक्षिपेत्॥५॥ वल्लद्वयंतत्रदत्वाफलंतत्रदेदेत्सुतः॥ फलन्तुत्रितयं
दत्वाह्यथवातन्दुसंदेदेत्॥६॥ तत्रसूर्यपुटंदत्वात्रिदिनंद्विजसत्तम॥ फलंसारन्तुनिष्का
स्यतद्रसेनागतोलकम्॥७॥ अग्नौदीप्तंततःकृत्वातद्रसैःशीतलंचरेत्॥ पुनर्नागंलोहद्
व्योंकेशीतस्यतुकारयेत्॥८॥ पारदंतत्रसंदद्यादेकीभावंततश्चरेत्॥ तच्चैकेजायमानेतु
उत्तार्यस्थापयेत्ततः॥९॥ कल्कःक्षिप्तिरूपस्यनात्रकार्याविचारणा॥ ताम्रद्रावंविधा

याथतत्रवल्लङ्कम्॥१०॥दह्याघतेनावि प्रेन्द्र सुवर्णं भवति ध्रुवम्॥ दन्ताम्लारसमानीय
धातुमात्रे विनिःक्षिपेत्॥११॥ तत्क्रमाद्रूयमायाति नात्र कार्या विचारणा॥ हरितालं समा
नीय सुवर्णपत्र नामकम्॥१२॥ प्रत्यहं संवत्सरं तु त्रिदिनं सप्तकमेव च॥ पुटपूर्णं प्रदद्यात्तु ततो हि
मृतिमेति वै॥१३॥ तं तालं भक्षयेत्पुत्र वली पलितनाशकम्॥ यस्य संभक्षणात्पुत्र कामरू
पी नरो भवेत्॥१४॥ कुडवं भक्षयेदन्नं कामी भोगी नरो भवेत्॥ फल्लानामपि पंचानां हरिताले
त्वयं क्रिया॥१५॥ इति दन्ताम्लकल्पः पंचाशत्तमः॥५०॥ ॥अथ दन्तद्रावकल्पः॥ अथ
तेसं प्रवक्ष्यामि दन्तद्रावस्य कल्पकम्॥ दन्तद्रावस्य योगेन कं दन्तद्रावो भविष्यति॥१॥ एवं

परिक्षांकृत्वादौप्रयोगंश्चततश्चरेत्॥दन्ताद्रावंसमानीयवङ्गमध्येविनिःक्षिपेत्॥२॥वङ्गंतुरौ
प्यतांयान्तिनात्रकार्याविचारणा॥रौप्येतुरौप्यतांस्वर्णे--स्वर्णत्वमाप्नुयात्॥३॥दन्तद्रावर
संगृह्यपारदंसंस्वल्लेत्सुतः॥त्रिदिनात्मृतिमायातिनात्रकार्याविचारणा॥४॥तस्यसंभक्षणात्पुत्र
सहस्त्रकुडवंचरेत्॥इतितेकथितंविप्रदन्तद्रावस्यकल्पकं॥५॥इतिदन्तद्रावकल्पएकपंचा
शत्तमः॥५१॥ ॥अथकामधेनुकल्पः॥कामधेनुप्रवक्ष्यामिफलंपंचकयोगके॥शुद्ध
तालंसमानीयतारपत्रंसमाचरेत्॥१॥तत्रतालंविलिंप्याथतस्याग्निंदापयेत्सुतः॥सूचीद्रा
वफलानान्तुपुटानिपत्रकेदरेत्॥२॥दशतोलकपानन्तुतारपत्रंसमाचरेत्॥तत्रपंचाशती

विप्रफल्गानांरसकर्मणि ॥ ३ ॥ एतत्संख्यातनिं विप्रतत्माग्रेदापयेत्सुतः ॥ ततःसिद्धाकामधेनुर्धा
तुमात्रप्रवेधिका ॥ ४ ॥ तोलपंचकमात्रन्तु धातुपात्रेवि निक्षिपेत ॥ ततोग्निंदापयेत्पुत्र धात
मात्रंप्रसिद्ध्यति ॥ ५ ॥ इतिकामधेनुकल्पः ॥ छ ॥ पंचाशत्तमः ॥ ५१ ॥ ॥ अथत्रिधारावज्र
वल्लीकल्पः ॥ त्रिधारावज्रवल्लीतुप्रवक्ष्यामिशृणुप्रिये ॥ यस्यविज्ञानमात्रेणरसायनप
तिर्भवेत् ॥ १ ॥ त्रिधारावज्रवल्लीन्तुसमानीयप्रयत्नतः ॥ मृन्मूषान्तुपुराकृत्वाशुद्धसूतंवि
निःक्षिपेत ॥ २ ॥ वज्रवल्लीरसंतत्रक्षिपेद्यत्नेनसत्तमः ॥ पुनःपुनस्तत्रदद्याद्वज्रवल्लीभवंरस
म् ॥ ३ ॥ पारदःपंचतोयानिलाजावज्जायतेस्फुटम् ॥ तंपारदंसमानीयरत्तिकार्धंप्रभक्षयेत

॥ ४॥ प्रस्थार्धेभक्षयेदन्नंसिद्धयोगीनरोभवेत्॥ केशास्तस्यभवेत्कृष्णाः पुनर्दन्ताभवन्तिहि
॥५॥ स्वर्णवद्देहकान्तिंस्यात्त्रिकालज्ञोभवेत्सुतः॥ सर्वंसंशोधयत्येवतन्मूत्रंस्वर्णकृत्भवेत्॥
६॥ सहस्रतोलताम्रस्यरत्तिमात्रंप्रदापयेत्॥ तत्सर्वंस्वर्णतांयान्तिसर्ववेधीभवेत्सुतः॥७॥
त्रिधारावज्रकल्यानुरसकंटंकमाहरेत्॥ स्वर्णटंकंततोगृह्यत्रिदिनंमर्दयेच्चतम्॥८॥ दिनै
कंशोषयेद्देवछायायांतद्रसंसुतम्॥ तद्रसंमूषिकायान्तुदत्वाग्निंदापयेत्सुतः॥९॥ सर्व
ज्ञोभवेद्द्विप्रनात्रकार्याविचक्षणा॥ गुंजामात्रंरौप्यमध्येशतवेधीभवेत्सुतः॥१०॥ शतवे
धीकलेज्ञेयंरसायनगुणेषिणाम्॥ इतितेकथितंविप्रवज्रवल्ल्याश्चकल्पकम्॥११॥ १०५

इति त्रिधारा वज्रवल्लीकल्पः द्विपंचाशत्तमः ॥ ५२॥ ॥अपरः त्रिधारावज्रवल्लीकल्पः
रत्नत्रिधारावज्रस्य कल्पन्ते कथ्यते शृणु तद्रसं तु समादाय पारदं निःक्षिपेत्सुतः ॥ १॥
एवं स्निग्धयंत्रस्ते रसं दत्वा रक्तले हठम् ॥ भूमिकायां ततोग्निं च दापयेद्यत्नतस्सुतः ॥ २॥ पार
दो मृतिमायाति नाम्ना चिंतामणिर्मतः ॥ रत्तिकाषोडशा भस्म तास्मूले भक्षयेत्सुत ॥ ३
स्त्रीसहस्रं तु संगच्छेत्साक्षात्कामो भवेत्सुतः ॥ इच्छासंख्याप्राशयेद्धि धातुर्देहप्रभेद
कृत ॥ ४ ॥ तं पारदं समानीय धातु लक्षणलोलके ॥ लक्षवेधी भवेद्धि प्रनात्र कार्या वि
चारणा ॥ ५॥ पारदं तु समानीय रक्तायाः स्तु रसं क्षिपेत ॥ पारदं संस्वलेत्सुत्र सत्तु कर्दमव

द्रुवेत॥ ६॥ तस्यपात्रंतुसंकार्यंछायायांशोषयेत्ततः॥ तत्पात्रेतुपुनर्दुग्धंदद्यात्प्रस्थमात्रकम्
॥ ७॥ जारणीयंद्विजश्रेष्ठनतस्मिन्तद्रसंक्षिपेत्॥ ततःसिद्धोभवेद्विप्रकामधेनुःसुसिद्धिदा॥ ८॥ धातु
मात्रंक्षिपेद्विप्रततश्चूर्णंभवेद्ध्रुवम्॥ तत्रदुग्धंप्रदत्वातुतद्दुग्धंचपिबेद्ध्रुवम्॥ ९॥ तत्क्षीणास्तम्भनं
भूयाद्दिनषोडशकंसुतः॥ तद्रसंतुतदाजिघ्रेतदेवमोक्षणंभवेत्॥ १०॥ अष्टधातुभवंपात्रमष्ट
कंधारयेत्सुतः॥ रौप्यमारभ्यलोहानांत्रिंशतादुत्तरंसुतः॥ ११॥ रसस्यतुपुटंदद्यात्कलासंख्यो
त्तरोत्तरम्॥ गणनाक्रममार्गेणउत्तरोत्तरकंभवेत्॥ १२॥ उपधातुषुविप्रेन्द्रसर्वत्रषोडशाधिकम्॥
प्रक्षिपेद्रसंतुमात्रंतुसर्वेषांचैवधक्कृद्भवेत्॥ १३॥ संप्रोक्तानुमयाविप्रकलासंख्याधेनवः॥ यस्य

विज्ञानमात्रेणत्रैलोक्यविजयीभवेत ॥ १४ ॥ हंसांतकं स्नुहिक्षीरं कुनटीगंधकाभ्रकम् ॥ इदं वै
वलोहानि सहस्रांशेन वेधयेत ॥ १५ ॥ स्नुहिक्षीरं समाद्धाय त्रिशाचूर्णेन वेष्टयेत ॥ पुष्टिकर्मक
रणाच्चैव नागं विद्धानि तत्क्षणात ॥ १६ ॥ नवाद्यायन कुनादि कालिकाजापि नेवेदत ॥ इति
रक्तं वज्रवल्लीकल्पकं व्याहृतं मुनः ॥ १७ ॥ इति सर्वसिद्धि धारा वज्र कल्प त्रिपंचाशत्तमः ॥ ५३
॥ अथ त्रिधाराव्रजभानुकल्पः ॥ त्रिधारावज्रभानोस्तु कल्पं संकथ्यते शृणु ॥ नाति
कायन दातव्यं एतत्कल्पकमुत्तमम् ॥ १ ॥ पारदं तु समानीय संशोध्यं च प्रयत्नतः ॥ खलेच
संखलेतु च संख्यात्रिशतकं हि ठमः ॥ २ ॥ ततोग्निं दापयेत्तु च शुद्धावस्य प्रयोगतः ॥ पारदो

मृतिमायाति वारंवाराग्नियोगतः॥ ३॥ तं पारदं भक्षयेद्धि वलीपलितनाशकं॥ तारमानीय
विप्रर्षे शुद्धं द्वादशतोलकम्॥ ४॥ एतानि तत्र संदद्यात् संख्या पंचशती सुतः॥ दुग्धं दत्वाग्नियो
गश्च कुर्याद्घृतेन संयुतः॥ ५॥ एवं पंचशतं संख्या पुटानि तत्र संददेत्॥ वज्रवल्लीपुटं तत्र कल्प
संख्यं च संददेत्॥ ६॥ पुटत्रयं रुदन्त्यास्तु त्रिवीरायाः पुटं ददेत्॥ रक्तदुग्धपुटं पंच दद्याद्घृते
न धीमता॥ ७॥ हारिद्रवत्सना भस्मपुटमेकं ततो ददेत्॥ आरण्यस्वरणपुटं ततो दद्यात्प्रयत्न
तः॥ ८॥ एवं कृते भवेत्सिद्धान वरत्नसमप्रभाः॥ कामधेनुं समानीय पारदं तत्र संददेत्॥ ९॥
मृद्वग्निं दापयेत्तत्र मृतिर्भवति निःसंशयः॥ तं पारदं भक्षयेद्धि कलाषोडशवान्भवेत्॥ १०॥ हरि

तालं समानीय वङ्ग दाडी तिनाम कष्ट॥ पात्रमध्ये विनिक्षिप्यतत्र अग्निं दापयेत्सुतः॥ ५२॥
यामाग्नियोगाद्धि प्रेन्द्र हरितालो मृतिर्भवेत॥ तत्तालं भक्षयेद्विप्र शतमूर्यसमप्रभा॥ ५३॥ दू
क्ता भक्षीत थाकामी भवेद्विप्र न संशयः॥ धातुपानं उभौ क्षेत्रौ धातुवेदकौ स्मृतौ॥ ५४॥ इति
त्रिधातावज्र भस्म कल्पः चतुः पंचाशत्तमः॥ ५४॥ ॥ अथ रक्तस्त्रिधातावज्र भस्म कल्पः॥
श्रीरक्तवज्रभानोस्तु कल्पं ते व्याहराम्यहं मा रक्तकुग्धस्य कल्पं हि त्रिसुलोके सुदुर्लभम्॥
१॥ त्रिधाराकुधमानीय शुद्धसूते विनिःक्षिपेत॥ संपूर्णं नु पुटं दत्वा खल्वे घृष्टेन मोद्विज॥ २॥
एवं विंशद्दिनं पूर्णं संपूर्णे न खल्वे सुतः॥ ततो मूसागतं कृत्वा तत्राङ्गारस्य वह्निना॥ ३॥ प्रदहे

ध्मातोविप्रपारदोमृतिमेतिवै॥ देहवेधीधातुवेधीनूभयंजायतेसुतः॥४॥ वलीपलितनाशनः
सकलदुःखविध्वंसनो भवेद्विमलरूपवान्सकलकामिनीभोगभावकः॥ महेश्वरसमो भवेत्
सकलकल्मषध्वंसनो द्विजेन्द्रकिमुवर्ण्यते॥ सकलकार्यदः कीर्तितः॥५॥ तं पारदं धातुमात्रे
रौप्येतु रौप्यतां भवेत्॥ तं पारदं धातुमात्रे स्वर्णेतु स्वर्णतां व्रजेत्॥६॥ हरितालं समानीय वङ्गदा
ह्वीति संज्ञितम्॥ कृत्वा कज्जलवद्विप्र खल्लेने निःक्षिपेच्चलम्॥७॥ तत्र दुग्धं पूर्णपुटं दद्याद्य
त्नेन सत्तमः॥ एवं विंशाह्निं विप्र पुटं देयं प्रयत्नतः॥८॥ इत्तानि सर्वसंज्ञानि ततोग्निपुटमार
भेत्॥ काम्भोजदेशसंभूतं लोहपात्रं समाहरेत्॥९॥ तस्यात्र मध्ये संस्थाप्य तालं तत्र विनिः

क्षिपेत्॥ तेनाग्नियोगतो विप्र हरितालो मृतिर्भवेत्॥ १०॥ स्वर्णाकर्षेण देवस्य ध्यानं कुर्यात्
पुनः पुनः॥ यामपात्रेन तत्रैवाङ्कुरं दर्शयेत्येन न संशयः॥ ११॥ तं तालं पक्षयेद्धोहि तन्मूत्रं धातु
वेधकृत्॥ पारदं तु समानीय मासमात्रं खल्वे तु पुनः॥ १२॥ स पारदः कर्दमस्यात् ततो लं तु समाच
रेत्॥ तत्र दद्यात् पुनर्दुग्धं वारं वारं पुनः पुनः॥ १३॥ एवं सप्ततिवारं तु दुग्धं दद्याद् द्विजोत्तमः॥ त
तो गुटिका भवेत् तु तत्र तस्येन क्रियां शृणु॥ १४॥ प्रत्यहं तु पुनर्दुग्धं एवं षोडशवासरम्॥ गुटिकां षोड
शकं भूया तं प्राप्ते षोडशेऽहनि॥ १५॥ गुटिका मेकं प्रत्यहं तु भवत्येव न संशयः॥ चतुर्मुखा भवे
द्बाला किशोरा तदनन्तरं॥ १६॥ गुटिका षोडश प्रोक्ता विप्र तद्रूपी परिकीर्तिताः॥ वृद्धस्त्वं ना

स्ति विप्रेन्द्र फलमेतस्य संशृणु ॥ १७ ॥ मुखधार्यो यदा विप्र तदा तु खेचरो भवेत् ॥ स्तंभनादौ
मुखे धार्यो त्रैलोक्यस्तंभनं भवेत् ॥ १८ ॥ कण्ठस्थः सर्वदेवानां सिद्धिं संहरते ध्रुवम् ॥ तस्याः
संधारणादेव त्रैलोक्यविजयी भवेत् ॥ १९ ॥ अथाष्टधातुसंभूतं पात्राणा मष्टकं चरेत् ॥ शत
वारं तत्र दुग्धं स्वर्णरौप्यस्य योगतः ॥ २० ॥ पात्रं कुर्यात्त्रयं तैलं तत्र दद्यात्तु द्वंशतम् ॥ तथोप
धातुसंभूतपात्राणा मष्टकं चरेत् ॥ २१ ॥ अष्टधातुषु विप्रेंद्र वेदसंख्यं तु रौप्यकम् ॥ वेदसंख्यं
भवेत्स्वर्णं तथोपधातुषु स्मृतम् ॥ २२ ॥ रौप्यमेकं तथा स्वर्णं योगजं पात्रमाचरेत् ॥ गणनाक्र
ममार्गेण चाचरेन्नरतः सुतः ॥ २३ ॥ हीनोपधातौ विप्रेन्द्र धातुमात्रे विलेपनम् ॥ पूर्णोपधा

तोः संयोगः कर्त्तव्यो हितमिच्छता ॥२४॥ देवीलोहमकस्याथ पुटं पंचकं कंदेत ॥ पात्रमा
त्रे प्रयत्नेन पुनर्दद्याद्द्विजोत्तमः ॥२५॥ एकैकयोगो द्विर्वापि त्रिश्चतुर्वाथ पंच च ॥ ऋतुसप्त
वसुर्वापि योगस्तु प्रकीर्त्तितः ॥२६॥ पात्रं तु योगजं कृत्वा पात्रपात्रश्च वा पुनः ॥ रुद्रनयास्तु
पुटं पंचत्रिधारामात्रसंयुतः ॥२७॥ काकजंघापुटं पंचपीतनाभस्य वैन वा ॥ एवं भवंति सिद्धाः
श्रीमहाकामधेनवः ॥२८॥ धातुमात्रं तत्र दद्यात् क्षणमात्रे प्रवेधकृत् ॥ धातुवेधे जायमाने
पारदो मूर्च्छितमेति वै ॥२९॥ तं पारदं भक्षयेद्यः स सिद्धो नात्र संशयः ॥ इति संक्षेपतः प्रोक्तं
वज्रधातोश्च कल्पकम् ॥३०॥ इति रसकल्पे त्रिधाराकज्ञमानुकल्पः पंचपंचाशत्तमः ॥५५॥

अथएकवीराकल्पः॥ अथैकवीराकल्पं हि शृणु रामरहस्यकम्॥ तस्य कल्पं प्रवक्ष्यामि
येन सिद्धं जगत्त्रयम्॥१॥ करवीरसमाकारो पत्रैश्चैव तु तादृशः॥ अन्तस्तिक्ता महावीरा पीर
णामेकदुर्मता॥२॥ ह्रस्वपत्रा द्विजश्रेष्ठ फलपुष्पविवर्जिता॥ एकवीरव्रतं प्राप्ता लेकवीरे
तिविश्रुता॥३॥ रसायने विप्रेन्द्र विज्ञा वल्पपरीभिदा॥ सिद्धेश्वरस्य नेत्रोत्था पुष्कं तु समा
श्रिता॥४॥ नातिस्थूला नातिकृशा निर्विषिकरणे मता॥ अजयपालस्य युद्धे तु यवने
न प्रबोधिता॥५॥ तस्याः पत्रेण विप्रेन्द्र धातुमात्रं प्रविद्ध्यति॥ तस्याः मूलरसेनैव पारदो मृतिमे
तिवै॥६॥ तत्कालं तु मणिकाभिश्च विषं स्थावरजङ्गमम्॥ नश्येन दूरतां याति चमत्कारक ११०

रीपरा॥७॥ तस्या पत्रं समादाय सिद्धेश्वध्यानपूर्वकम्॥ सिद्धेश्वरो विघ्नकर्त्तो तत्रवै
भवति ध्रुवम्॥८॥ आदौ सिद्धेश्वरं कृत्य प्रयोगं च ततश्चरेत्॥ ताम्बूलमध्ये तत्पत्र
भक्षयेद्दक्षपूगतः॥९॥ मृण्मूलं समादाय ताम्रं तत्र विनिःक्षिपेत्॥ ततस्तं रवादिरा
ङ्गरे रक्तं पंचाथ निःक्षिपेत्॥१०॥ ताम्बूलस्य रसं तत्र पुनर्द्वारा विनिःक्षिपेत्॥ कनकं
जायते दिव्यं शुद्धजाम्बूनदप्रभम्॥११॥ सहस्रवेधी विप्रर्षे स्मूलद्वारा प्रजायते॥ इति
प्रोक्तं मया पूर्वं सिद्धडामरतंत्रके॥ तच्चानकथितं पुनस्तवस्नेहेन सर्वथा॥१२॥ इति
रक्तवीराकल्पः षट्पंचाशत्तमः॥५६॥ ॥अथ स्वर्णफालिनीकल्पः॥ देवि

त्वोहं सकलं त्वन्तु शृणु वत्स गुणोत्तरम्॥ सिद्धौषधीति विख्याता श्रीस्वर्णफलिनी स्मृता॥
१॥ श्रीपुरन्दरतो यत्र स्वर्णग्रामो विराजते॥ सोवर्ण्णदेवि तत्रैव दक्षिणां माश समाश्रिता॥ २॥ तत्रैव
सुसभा देवि त्रिषु लोकेषु विश्रुता॥ तत्र श्रीस्वर्णफलिनी महादिव्यौषधीवरा॥ ३॥ खर्ज्जुरव
त्तु पर्णानि फलं खर्ज्जूरवद्भवेत्॥ दुःस्पर्शा सा च विज्ञेया महामद्रवा मता॥ ४॥ सदा फलति
विप्रर्षे चतुर्वर्ण विधा मता॥ तन्मूलन्तु समादाय प्रदद्यात्पारदे सुतः॥ ५॥ ते पारदं मूषिकायां
तत्राग्निं दापयेत्सुतः॥ सकलङ्को भवेद्विप्र शतांशाद्रोप्यवेधकृत्॥ ६॥ सुवर्णं भवति क्षिप्रं नात्र
कार्या विचारणा॥ तत्पर्णचूर्णं विप्रर्षे वङ्गमध्ये विनिक्षिपेत्॥ ७॥ शतांशं विध्यति क्षिप्रं तारम १११

वत्तिनिक्षिप्तम् ॥ तस्याः पर्णरसं विप्र गंधकं भावयेद्दृढम् ॥ ८ ॥ एकविंशतिवेलां तु सम्यक् तं भा
वयेन्नरः ॥ कलङ्को भवति क्षिप्रमष्टधातुप्रवेधकृत् ॥ ९ ॥ इति स्वर्णफलिनीफल्पः सप्तपंचा
शत्तमः ॥ ५७ ॥ ॥ अथ हारिद्रवत्सनाभकल्पः ॥ हारिद्रवत्सनाभस्य कल्पं शृणु द्विजोत्त
मः ॥ सिन्दुवारसदृक्पत्रो वत्सनाभाकृतिस्तथा ॥ १ ॥ यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥
हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः ॥ २ ॥ हारिद्रवत्सनाभं तु समानीय प्रयत्नतः ॥ ताम्रम
ध्ये ददेच्चूर्णं तत्ताम्रं स्वर्णतामियात् ॥ ३ ॥ हारिद्रवत्सनाभस्य पत्रचूर्णं तु कारयेत् ॥ वङ्गमध्ये
प्रदद्यात्तु तद्वङ्गं रौप्यतामियात् ॥ ४ ॥ हारिद्रवत्सनाभस्य संपूर्णस्य रसं चरेत् ॥ पारदं तु समानी

यद्दत्तु खल्लने खलेत ॥५॥ एकविंशदिनं कृत्वा वद्धो भवति पारदः ॥ तस्य संधारणा छिप्रं खेच
रो भुवि जायते ॥६॥ तच्चूर्णं तु विधायाथ पुनस्तत्र रसं ददेत ॥ पुनः पुनः खलेत्तं तु ततोग्निं दाप
येत्सुतः ॥७॥ पारदो मृतिमायाति नात्र कार्या विचारणा ॥ तस्य संभक्षणात्पुत्रकामी भोगी नरो भवे
त ॥८॥ हरितालं समानीय तद्रसं तालके ददेत ॥ शरावसंपुटे कृत्वा ततोग्निं दापयेत्सुतः ॥९॥ स्वाङ्ग
शीतं समुद्धृत्य पुनर्दद्याद्रसं सुतः ॥ एवं हि शतवारं हि पुटं देयं पुनः पुनः ॥१०॥ हरितालो मृतिं याति
महाकल्पद्रुमः स्मृतः ॥ यस्य संभक्षणाद्ग्राम सर्वभक्षी नरो भवेत ॥११॥ अपक्वान्नस्य चाभ्यासा
त्वग्नि साम्यति नान्यथा ॥ सहस्रकामिनी भोगी भवत्येव न संशयः ॥१२॥ धातुमात्रे तालराजं

रत्तिकाईं प्रदापयेत्॥ वेधप्रकुरुतेतात्क्षो नात्रकार्याविचारणा॥ १३॥ इति हरिद्रवत्सना
भकल्पः अस्टपंचाशत्तमः॥ ५८॥ ॥अथकरवीर कल्पः॥ रक्तकरवीर लोहितव
र्णकरवीर पुष्पवृक्षः॥ तत्पर्याय· रक्तप्रसव· गणेशकुसुम· चण्डिकुसुमः भूतद्रावी· हरिप्रि
य·॥अस्यगुणाः कटुत्वं· तिक्तत्वं· विशोधनत्वं· त्वग्दोषव्रणकण्डूनिकुष्टंविषहरत्वंच॥
आरक्तकरवीरस्य कल्पंशृणुद्विजोत्तमः॥ आरक्तकरवीरन्तुरक्तकेशरसंयुतम्॥१॥ का
नीनकेतिविख्यातं त्रिषुलोकेषुविश्रुतम्॥ एकद्विमुनिपुष्पन्तुसंगृह्ययत्नतःसुतः॥२॥
ताम्रंसंशोधनंकृत्वा तारंवाथमतान्तरम्॥ ताम्रंरौप्यंभवेद्विप्र तारस्वर्णत्वमेवहि॥३॥

ततोरसस्तुभिः क्षेप्यो याममात्रं द्विजोत्तमः ॥ तत्तारं जायते शुद्धं महाजाम्बूनदप्रभम् ॥५॥
आरक्तकरवीरस्य पश्चाङ्गस्य रसं कुर्यात्संशोध्य पारदं शुद्धं खल्लने निःक्षिपेत्सुतः ॥ पातद्र
सं तत्र संदद्याद्वारंवारं पुनः खल्लेत ॥ ततोग्निं दापयेद्विप्र पारदो मृतिमेति वै ॥६॥ पारदं भक्ष
येद्विप्र वलीपलितवर्जितः ॥ कामदेवसमो रूपे भवेन्नास्त्यत्र संशयः ॥७॥ करवीरं
कृष्णवर्णं कृष्णाकेशर संयुतम् ॥ तमानीय प्रयत्नेन प्रयोगं तु समारभेत् ॥८॥ तत्पश्चा
ङ्गरसं विप्र पारदे निःक्षिपेद्यदि ॥ पारदो मृत्युतामेति मूषायां निःक्षिपेच्च तम् ॥९॥ अग्निंद
द्यात्प्रयत्नेन रसं दद्यात्पुनःपुनः ॥ स पारदो सिद्धरूपः सर्वभक्षी भवेत्सुतः ॥१०॥ अथवा

क्रौंचे धकरः शतवेधी भवेत्सुतः॥ शुद्धताम्रं समानीय कृष्णस्य चरसं ददेत्॥ ११॥ पुनः पु
नस्तत्र दद्याद्वज्रमूषागतं धमेत्॥ रसं दद्यात्पुनस्तत्र तत्क्षणात्स्वर्णतां व्रजेत्॥ १२॥ ताम्रंव
ङ्गं तथा नागं एकीकृत्य प्रयत्नतः॥ वज्रमूषागतं कृत्वा तत्र तस्य रसं ददेत्॥ १३॥ नक्रैप्यं
जायते शुद्धं कुन्दपुष्पसमप्रभम्॥ पारदं तु समानीय मुनिवासं तु संखलेत्॥ १४॥ तत्पा
रदः कर्दमस्यात्ततो हि गुटिकां चरेत्॥ जनमात्वौखधैव ज्ञा धातुवह्वातुमध्यमा॥ १५॥ अथ
मातेल्ठवं ज्ञास्यात्त्रिविधा गुटिका मता॥ औखधो त्या शुभ प्रोक्ता सर्वसिद्धिप्रदायिनी॥ १६॥ द्रु
तिकरवीरकल्पएकोनषष्ठितमः॥ ५९॥ ॥ अथ दिव्यरसकल्पः॥ अथातः संप्रवक्ष्या

मिकल्पं दिव्यरसस्य च॥ कामधेनुर्दिव्यरूपा रसायनकरा परा॥ १॥ तस्या संग्रहमात्रेण
रसायनकरो भवेत्॥ अथ द्वादशमाशेन्तु पात्रन्तु घृतपात्रवत्॥ २॥ रौप्यपात्रं पुरा कृत्वा
कुन्दपुष्पसमप्रभम्॥ दिव्यमूलफलानान्तु शतद्वादश संख्यया॥ ३॥ तत्पात्रेन्तु रसं द
त्वा तद्गोसंस्थापयेत्सुतः॥ रसे जीर्णे द्विजश्रेष्ठ पुनर्निम्बुरसं ददेत्॥ ४॥ श्रीसर्यशतनि
म्बूनां रसं तत्र ददेत्सुत॥ एवं सर्वरसे जीर्णे कामधेनुरसं ध्रुवम्॥ ५॥ कामधेनुर्भवेत्सिद्धा
सद्यः सिद्धिकरी परा॥ तत्पात्रं तु द्विजश्रेष्ठ तद्गोसंस्थापयेत्सुत॥ ६॥ तत्र तोलकमात्रन्तु
पारदं तु प्रदापयेत्॥ स पारदो भवेत्सिद्धः कुन्दपुष्पसमप्रभः॥ ७॥ स्थायीभूत द्विजश्रेष्ठ १९४

ततोप्यत्ववां व्रजेत ॥ इतितेकथितंतराम: कामधेनुसुसिद्धिदा ॥ ८ ॥ इतिदिव्यरस: कल्प
अष्टितम: ॥ ६० ॥ ॥ अथवनसूरणकल्प: ॥ वनसूरणकल्पंहि कथयतेशृणु
सांप्रतम् ॥ वनसूरणमानीयक्षुरिकांतत्रनिक्षिपेत ॥ १ ॥ क्षुरिकायदिवैरक्तातदातघो
गमारभेत ॥ अरुणोरक्तवज्ज्ञेय: सर्वसिद्धि:प्रदोमत ॥ २ ॥ तच्चूर्णेद्विजश्रेष्ठवङ्गंत
त्रविनि:क्षिपेत ॥ सरावसंपुटेदत्वातत्राग्निंदापयेत्सुत: ॥ ३ ॥ तद्वङ्गंजायतेशुद्धंकुन्दपु
ष्पसमप्रभम् ॥ पूर्ववत्सूरणंगृह्य ताम्रमानीयसुव्रत ॥ ४ ॥ ताम्रेहिङ्गुललेपन्तुदत्वा
पत्राणिसूरणे ॥ शरावसंपुटेदत्वातत्राग्निंदापयेत्सुत: ॥ ५ ॥ तत्ताम्रंजायतेशुद्धंकुन्द

पुष्पसमप्रभम्॥ तारवङ्गेतथानागंएकीकृत्वाप्रयत्नतः॥ ६॥ पात्रंकृत्वाद्विजश्रेष्ठतो
लद्वादशमात्रकम्॥ सूरणेतु[illegible]त्रदत्वाधपुटपाकंसमाचरेत॥ ७॥ एवंहिशतवारंतुपुटपा
कंसमाचरेत॥ ततःसूरणमानीयतद्रसेनपुटानिच॥ ८॥ शतंपुटानिदेयानित्रिधाराया
स्ततोदश॥ रुदन्त्यापंचवैदद्याद्दुग्धस्यवैनवा॥ ९॥ वज्रकल्पाह्वयंदद्याद्धरितालंप्र
लेपनम्॥ पुनर्दद्यात्सूरणेतुकामधेनुर्भवेद्ध्रुवम्॥ १०॥ हरितालंपारदंवाधातुमात्रेवनिःक्षि
पेत्॥ हरितालेमृतिर्भातिपारदोपितथैवच॥ ११॥ अस्यधातुप्रवेधःस्याद्देहभेदःप्रजायते॥
रत्तिकाषोडशांशेनपारदंतालकंचवा॥ १२॥ भक्षयेद्योहिविप्रेन्द्रसर्वषोडशवार्षिकः॥

कामदेवसमोरूपोस्त्रीशतंचाधिरोहति॥१२॥ इतिवनसूरणकल्पएकचत्वारिंशः॥४१॥
अथदुःस्पर्शाकल्पः॥ अथातसंप्रवक्ष्यामिदुःस्पर्शाकल्पमुत्तमम्॥ यस्यविज्ञानमात्रेण
पारदोसिध्यतिध्रुवम्॥ १॥ तस्यकल्पंशृणुत्वंहियदिसिद्धिंसमिच्छसि॥ यस्मैकस्मैनदातव्यं
नान्यथासिद्धिरेवच॥२॥दुःस्पर्शेतिसुविख्यातास्पर्शात्स्फोटकरीमता॥नस्पृशेज्जीव
मात्रोहितांदुःस्पर्शांद्विजोत्तमा॥३॥यदिस्पृशतिवैजीवतदास्फोटंसमादिशेत्॥अरण्येसा
चविप्रेसदाजागर्तिसिद्धिदा॥४॥हस्तेवस्त्रंतुवध्वावैशनिवारेनिमंत्रयेत्॥सूत्रंवध्वाप्रयत्ले
नततवर्णप्रभेदतः॥५॥रविवारेतुसंग्रह्यचतुर्भेदाद्विजोत्तम॥ श्वेतावाह्यथवारक्तानत्य

र्णानिसमाहरेत् ॥६॥ तत्पर्णानितुसंपेष्य मूषान्तेनसमारभेत् ॥ तत्पर्णरसमादाय पारदंसंस्व
लेत्सुतः ॥७॥ यावत्कर्दमतुल्यंस्यात्तावदेवंखलेत्सुतः ॥ तन्मूषायांततोदत्वा तत्रदद्याक्रमेसु
तः ॥८॥ वारंवारंरसोदद्यान्नदधोग्निंप्रदापयेत् ॥ पारदः कर्दमोभूयात्खेरव्ययोग्योभवेत्सुतः ॥
९॥ एवंतुपारदंदृष्ट्वाक्रियांत्वग्रतनींचरेत् ॥ त्रिधावज्रवल्ल्यातुरसंतत्रप्रदापयेत् ॥१०॥ वारंवा
रंरसोदद्यात्ततोग्निंदापयेत्सुतः ॥ यामत्रयेणविप्रेन्द्र पारदोमृतिमेतिवै ॥११॥ तंपारदंद्विजश्रेष्ठर
क्तिकाषोडशांशकम् ॥ भक्षयेद्यदिविप्रेन्द्र भवेत्षोडशवार्षिकः ॥१२॥ तंपारदंसमादायकेंद्रसंको
ष्ठिमिश्रंक्षिपेत् ॥ सर्ववेधीभवेद्विप्र नात्रकार्याविचारणा ॥१३॥ दुःस्पर्शंतुसमादायताड्रसंकारये

सुतः ॥ तत्पंचांकुरसंविश्रसंपुटं लोहजं सुतः ॥ १४ ॥ तत्संपुटे रसं दद्यादेकविंशतिवारकम् ॥ पारदं तु
समानीय पूर्ववत्कर्दमं चरेत् ॥ १५ ॥ तत्कर्दमं समादाय संपुटे स्थापयेत्सुत ॥ ततो मदनमुद्रां च तत्सु
विकारयेत्सुतः ॥ १६ ॥ ततोग्निं दापयेत्सुत दिनत्रयमतन्द्रितः ॥ पारदो मृतिमायाति नात्र कार्या विचार
णा ॥ १७ ॥ तत्पर्णस्य रसं गृह्य नलिकापंचके सुतः ॥ तत्क्रमेण पुटं दद्यादेकविंशतिवारकम् ॥ १८ ॥ पारदं
मंखल्ले सुत त्रिदिनं दृढमुष्टिना ॥ ततो हि नलिकायंत्रे पारदं स्थापयेत्सुतः ॥ १९ ॥ मुखं मदनमुद्रां हि
दद्याद्यत्नेन सत्तमः ॥ मुखचुल्हिं शुभां कृत्वा कीलके बन्धयेत्सुतम् ॥ २० ॥ चुल्ल्यामग्निं प्रदातव्यो याव
वह्निमृतिमेति वै ॥ षण्मासयोगाद्विप्रेन्द्र पारदो मृतिमेति वै ॥ २१ ॥ कलाषोडश वा न्यूत्वा धातुवे

धीभवेद्दृढम्॥ देहवेधीसहिभवेन्नात्रकार्याविचारणा॥२२॥ तंपारदंसमादायरौप्यस्वर्णाद्विधा
तुयः॥ दद्याद्यत्नेनविप्रर्षेस्वर्णेस्वर्णत्वतांव्रजेत्॥२३॥ रौप्यंतुरौप्यतांयातिकिंपुनर्वहुजल्प
नैः॥ तवाग्रेकथितंवत्सदुस्पर्शाकल्पमुत्तमम्॥२४॥ इतिदुःस्पर्शाकल्पद्विषष्ठितमः॥६२॥ ॥
अथसोमलताकल्पः॥ ब्रह्मादयोसृजन्पूर्वममृतंसोमसंज्ञितम्॥ जरामृत्युविनाशायविधा
नंतस्यवक्ष्यते॥१॥ एकएवखलुभगवान्सोमस्थाननामाकृतिवीर्यविशेषैश्चतुर्विंशति
धाभिद्यतेतद्यथा॥२॥ अंशुमान्मुञ्जवांश्चैवचन्द्रमारजतप्रभः॥ दूर्वासोमःकनीयांश्चश्वेता
क्षकनकप्रभा॥३॥ प्रतानवांस्तालवृन्ताकरवीरोंशवानपि॥ स्वयंप्रभोमहासोमायश्चापिगरु ११७

अह्रतः॥४॥गायत्र्यस्त्रैष्टुभः पाङ्क्तो जागतः सांकरस्तथा॥ अग्निष्टोमो रैवतश्च यथोक्त इति

संज्ञितः॥५॥गायत्र्या त्रिपदा युक्तो यश्चोडुपतिरुच्यते॥ एते सोमाः समाख्याता वेदोक्तैर्नाम

भिः शुभैः॥६॥ सर्वेषामेव सोमानां पत्राणि दशपंच च॥ तानि शुक्ले च कृष्णे च जायन्ते निपत

न्ति च॥७॥ एकैकं जायते पत्रं सोमस्याहरहस्तथा॥ शुक्लपौर्णमास्यां तु भवेत्पंचदशच्छ

दः॥८॥ शीर्यते पत्रमेकैकं दिवसे दिवसे पुनः॥ कृष्णपक्षक्षये चापि लता भवति केवला

॥९॥ अंशुमानाज्यगंधस्तु कन्दवान्रजतप्रभः॥ कदल्याकारकन्दस्तु मुञ्जवांल्लशु

नच्छदः॥१०॥ चन्द्रमाः कनकाभासो जले चरति सर्वदा॥ गरुडाहृतनामा च श्वेताक्षश्चा

पिपाण्डुरौ ॥११॥ सर्पनिर्मोकसदृशौ तौ वृक्षाग्रावलम्बिनौ ॥ तथान्यैर्मण्डलैश्चित्रैर्वि
चित्रा इव भान्ति ते ॥१२॥ सर्वे एव तु विज्ञेयाः सोमाः पंचदश च्छदाः ॥ क्षीरकन्दलता
वन्तः पत्रैर्नानाविधैः स्मृताः ॥ हिमवत्यर्बुदे सह्ये महेन्द्रे मलये तथा ॥ श्रीपर्वते देवगि
रौ गिरौ देवसहे तथा ॥१४॥ पारियात्रे च विन्ध्ये च देवसुन्दे ह्रदे तथा ॥ उत्तरेण वितस्ता
याः प्रवृद्धा ये महीधराः ॥१५॥ पंच तेषामधो मध्ये सिंधुनामा महानदः ॥ ह्रदवत्प्लवते तत
त्र चन्द्रमाः सोमसत्तमः ॥१६॥ तस्योद्देशेषु चाप्यस्ति मुञ्जवानंशुमानपि ॥ काश्मीरे क्षुद्र
सो दिव्या नाम्ना क्षुद्रकमानसम् ॥१७॥ गायत्र्यस्त्रैष्टुभः पांक्तो जागतः शांकरस्तथा ॥ अ ११८

त्रसन्त्यपरे चापि सोमाः सोमसमप्रभा ॥ १८ ॥ न तान्पश्यन्त्यधर्मिष्ठाः कृतघ्नाश्चापि
मानवाः ॥ भेषजद्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा ॥ १९ ॥ सर्वेषामेव चैतेषां एको विधि
रुपास्यते ॥ सर्वे तुल्यगुणाश्चैव विधानं तस्य वक्ष्यते ॥ २० ॥ अतोऽन्यतमं सोममुपयुयुक्षुः सर्वोप
करणपरिचारकोपेतः प्रशस्ते देशे त्रिवृतमागारं कारयित्वा हृतदोषः प्रतिसंसृष्टभक्तः प्रशस्ते
सुतिथिकरणमुहूर्तनक्षत्रेषु अंशुमन्तमादाय अध्वरकल्पेनाहृतमभिषुतमभिहुतं चा
न्तरागारे कृतमङ्गलः सोमकन्दं सुवर्णसूच्या विदार्य पयो गृहीत्वा सौवर्णे पात्रे अञ्जलि
मात्रं ततः सकृदेवोपयुञ्जीत नास्वादयंस्तत उपस्पृश्य शेषमप्सु सांयमनियमाभ्या

मात्मानंसंनियोज्यवाग्यतोऽभ्यन्तरतःसुहृद्भिरुपास्यमानोविहरेत॥२१॥रसायनंपीतवां
स्तुनिवाततन्मनाशुचि॥आसीततिष्ठेत्कामेच्च नकथ्वनसंविशेत॥२२॥सायंवाभुक्त्वास्तु
तशान्तिकुशसय्यायांकृष्णाजीनोत्तरायांसुहृद्भिरुपास्यमानःशयीततत्र्यितोवाशीतोद
कमात्रंपिबेत्ततःप्रातरुत्थायोपकृतशान्तिःकृतमङ्गलोगांस्पृष्ट्वातथैवासीत॥२३॥तस्यां
जीर्णसोमेछर्दिरुत्पद्यतेततःशोणितान्क्तंकृमिव्यामिश्रंछर्दितवतसायंशृतशीतंक्षीरंवितरे
त्ततःस्तृतीयेऽह्निकृमिव्यामिश्रमतिसार्यतेसनेनानिष्टप्रतिग्रहभुक्तप्रतिभिविशेषैर्मु
क्तःशुद्धतनुर्भवतिततःसायंस्नानस्यपूर्ववदेवक्षीरंवितरेत्क्षौमवस्त्रास्तृतायांसेय्यायां।

चैनं शाययेत्॥२४॥ ततश्चतुर्थेऽहनि तस्य श्वयथुरुत्पद्यते ततः सर्वाङ्गेभ्यः कृमयो निष्क्राम
न्ति तदहश्च शय्यायां पांशुभिरवकीर्यमाणः शयीत ततः सायं पूर्ववदेव क्षीरं वितरेत्॥ एवं पंच
मषष्ठयोर्दिवसयोर्वर्तेत केवलमुभयकालं कस्मै क्षीरं वितरेत् ततः सप्तमेऽहनि निर्मांसस्त्वगस्थि
भूतः केवलं सोमपरिग्रहादेवोच्छ्वसिति तदहश्च क्षीरेण सुखोष्णेन परिषिच्य तिलमधुकचन्द
नानुलिप्तदेहं पयः पाययेत्॥२५॥ ततोऽष्टमेऽहनि प्रातरेव क्षीरपरिषिक्तं चन्दनप्रदिग्धमात्रं
पयः पाययित्वा पांशुशय्यामपमृज्य क्षौमास्तृतायां शाययेत् ततो मांसमाप्यायते त्वक्चा
वदलति दन्तनखरोमाणि चास्य पतन्ति तस्य नवमदिवसात्प्रभृत्यणुतैलेनाङ्गाभ्यङ्गः सोमवल्क

कषायपरिषेकः॥ ततोदशमेहन्येतदेव वितरेत्ततोस्यत्वकस्थिरतामुपैति॥ एवमेकादशाद्वाद
शयोर्वर्त्तेत तत्रत्रयोदशात्प्रभृतिसोमकल्पकषाय्यपरिषेकः॥ एवमाषोडशाद्वर्त्तेत॥ २६॥ ततः सप्त
दशाद्वादशयोर्दिवसयोर्दशमा जायन्ते शिखरिणः स्निग्धवज्रवैडूर्यस्फटिकविकाशाः समाः स्थि
राः सहिष्णवः तदाप्रभृति चामवैः शालितण्डुलैः क्षीरयवागूमुपसेवेत यावत्पंचविंशतिरिति॥
२७॥ ततो सैदशाच्छाल्योदनमुद्गभयकाल्कंपथ्यस्यात ततोस्य नखा जायन्ते विद्रुमेंद्रगोपतरुणादित्य
प्रकाशाः स्थिराः स्निग्धा लक्षणसंपन्नाः केशाश्च जायन्ते त्वक् च नीलोत्पलातसीपुष्पवैडूर्यप्रका
शा दूर्द्धं च मासात्केशांवापयेत· वापयित्वा चो शीरचन्दनकृष्णातिलकल्कैः शिरः प्रदिह्यात्पय

सावात्स्नापयेत ॥२८॥ ततोस्यानंतरं सप्तरात्रात्केशा जायन्ते भ्रमराञ्जननिभाः कुञ्चिताः स्नि
ग्धास्ततस्त्रिरात्रात्प्रथमपरिसरान्निष्क्रम्य मुहूर्तं स्थित्वा पुनरेवान्तः प्रविशेत ॥ ततोस्य बलाते
लमभ्यङ्गार्थे ऽवचार्य यवपिष्टमुद्वर्तनार्थे सुवर्णोदकञ्च पयः परिषेकार्थे आमलकरसविमि
श्राश्चास्य यूषसूपविकल्पाः क्षीरमधुकसिद्धश्च कुष्ठातैलमवचारणार्थे एवं दशरात्रं ततोन्य
द्दशरात्रं द्वितीयपरिसरे वर्तेत ॥२९॥ ततस्तृतीयपरिसरे स्थिरीकुर्वन्नात्मानमन्यद्दशरात्रमासी
त किञ्चिदातपवनान्यासेवेत पुनश्चान्तः प्रविशेत ॥ न चात्मानमादर्शेऽम्बुवा निरीक्षेत रूपशालि
त्वात ॥ ततोन्यद्दशरात्रं क्रोधादिन्परिहरेदेवं सर्वेषामुपयोगः ॥३०॥ विशेषतस्तु वल्लीप्रता

नस्तु पादयत्सोमा भक्षयितव्याः॥ तेषांतु प्रमाणमर्द्धचतुर्थमुष्टयः॥ अंसवन्तं सौवर्णपा
त्रे ऽभिषुणुयात्॥ चन्द्रमसं राजते चोपयुज्याष्टगुणमैश्वर्यमवाप्येशानंदेवमनुप्रविश
तिशेषांस्तु ताम्रमये मृण्मये वा रोहितेचर्मणि वितले शूद्रवर्ज्यैस्त्रिभिर्वर्णै सोमाउपयोक्त
व्या ततश्चतुर्थमासे पौर्णमास्यां शुचौ देशे ब्राह्मणार्चनयित्वा कृतमङ्गलो निष्क्रम्य
यथोक्तं व्रजेदिति॥ ३१॥ ओषधीनां पतिं सोममुपयुज्य विचक्षण॥ दशवर्षसहस्त्रा
णि नवां धारयते तनुम्॥ ३२॥ नाग्निर्न तोयं न विषं न शस्त्रं नास्त्रमेव च॥ तस्यालमायुः
क्षपणे समर्थाश्च भवन्ति हि॥ ३३॥ भद्राणां षष्टिवर्षाणां प्रस्तुतानमनेकधा॥ कुञ्जरा ११९

णां सहस्रस्य वलं समधिगच्छति॥ २४॥ क्षीरोदं शंकसदनमुत्तरांश्च कुरूनपि॥ यत्रेच्छ
ति मगन्तुं वातरंहप्रतिहतागति॥ २५॥ कन्दर्प इव रूपेण कान्त्या चन्द्र इवाऽपरः॥ प्राह्ल
दयति भूतानां मनांसि समहाद्युतिः॥ २६॥ साङ्गोपाङ्गांश्च निखिलान्वेत्ता विन्दति
तत्वतः॥ चरत्यमोघसङ्कल्पो देववच्चाखिलं जगत्॥ २७॥ इति सोमलताकल्पस्त्रिष
ष्टितमः॥ ६३॥ ॥ अथ रुदन्तिकल्पः॥ अथातः संप्रवक्ष्यामि रुदन्तिकल्पमु
त्तमम्॥ यस्य विज्ञानमात्रेण त्रैलोक्ये विजयी भवेत्॥ १॥ चणपत्रोपमैः पत्रैर्युक्ता
म्भोविन्दुवर्षिणी॥ शिशिरे जलविन्दूनां स्रवन्ती च रुदन्तिका॥ २॥ सदा रुदति

सादिव्याविद्यमानेमयिप्रभौ॥ कगतासाऽ शुभारण्डासदाशोचकरीजरा॥ ३॥ चतु
र्विधाचसाज्ञेया श्वेतारक्तासितासिता॥ विधानेनयुताचैवसिद्धिंयच्छतिनान्यथा॥
४॥ रुदन्तीचस्रवन्तोयासंजीविन्यमृतस्रवा॥ चणपत्रीमहामांसीनाम्नाख्यातासु
धास्रवी॥ ५॥ कफश्वासापहामेहनाशिनीरक्तपित्तनुत्॥ तिक्तोष्णावाहृकृहृष्या
कषायाचरसायनी॥ ६॥ कृष्णपक्षेचतुर्दश्यामहारात्रौपितोनरः॥ ईश्वरंपूजयेद्देव
मीश्वराग्रेचसंजपेत्॥ ७॥ ॐनमोभगवतेत्वांसर्वविद्यानिवासिनम्॥ त्वत्प्रसादेनदेवे
शमूलंवदाम्यहम्स्वाहा॥ ८॥ जपेदशीतिसाहस्रंप्रयोगश्चततश्चरेत्॥ ततःसिद्धिर्भ १२२

वत्सेवचनान्यथाप्राणवल्लभे ॥ ९ ॥ तामोषधींसमासाद्यशुक्लपक्षेशुभेदिने ॥ छाया
शुष्कांश्वतांकृत्वाशुद्धचित्तोजितेन्द्रियः ॥ १० ॥ विरेकवमनंकृत्वाविडालपदमात्र
या ॥ भक्षयेयेमधुसर्पिभ्यांमासमेकंमहौषधीम् ॥ ११ ॥ जीर्णान्नेभोजनंकुर्याद्दुग्धभक्तेन
तोनिशम् ॥ दृढकायोऽतितेजस्वीसर्वरोगविवर्जितः ॥ १२ ॥ बृहस्पतिसमोवाग्मीकामदेव
समोनरः ॥ वलीपलितनिर्मुक्तः परमायुर्युतोभवेत् ॥ १३ ॥ ततंचांगंसमासाद्यशुक्लपक्षे
शुभेदिने ॥ सूक्ष्मचूर्णन्तुतांकृत्वास्थापयेत्कटुतुम्बके ॥ १४ ॥ कर्षमात्रप्रमाणेनपथ्यभो
जीपिबेन्नरः ॥ मधुसर्पिसमालोड्य कृष्णगोक्षीरभोजनम् ॥ १५ ॥ षड्मासस्यप्रयोगे

णवज्रकायोभवेन्नरः॥ वलीपलितनिर्मुक्तःसर्वरोगविवर्जितः॥१६॥ पंचाङ्गं भक्षयेद
स्यासर्वरोगेषुवानरः॥ विडालपदमात्रन्तुमधुसर्पिसमन्वितम्॥१७॥ जीवेपश्चशतंवर्षं
वलीपलितवर्जितः॥ पानेलेपेतथानश्येविषंहन्तिचभक्षयेत्॥१८॥ रुदन्तीमूलचूर्णन्तु
विडालपदमात्रकम्॥ क्षीरेणसहसंपीतंहन्तिसाम्वत्सरंविषम्॥१९॥ तद्रसेमृयनेसृतका
न्तोहेमाद्रिसन्निभः॥ शतवेधीभवेत्ताम्रेनात्रकार्याविचारणा॥२०॥ तद्रसंचैवगान्धारीरसे
नसहयोजितम्॥ शुल्वपत्रेषुसंलिप्यतीव्राग्नौधमयेन्नरः॥२१॥ सुवर्णंजायतेक्षिप्रंवर्षये
उग्रकंपरम्॥ स्वर्णाकर्षणदेवस्यभैरवस्यप्रसादतः॥२२॥ पारदंमाक्षिकंशैलंगन्धकेन १२३

प्रमर्दयेत॥ त्रिघस्रं मर्द्दये द्देवि रुदन्तीरससंयोगतः॥ २३॥ वङ्गं ताम्रं तारकं वा पुटेन कनकं
भवेत॥ रुदन्तीरसमादाय विधिना शुद्धचेतसा॥ २४॥ तद्रसैः संखल्ले सूतं सूतो मृत्युर्भ
विष्यति॥ पारदन्तु समानीय सम्यक्कोष्ठे ऽप्ययत्नतः॥ २५॥ पारदो मक्षिकाक्तपो हितस्त्वमा:
रणंमाचरेत॥ खल्ले संस्थापयेत्सूतं रुदन्त्या भावयेत्ततम्॥ २६॥ विंशत्युद्दानि देयानि सं
पूर्णानि द्विजोत्तम॥ एवं सप्तदिने देवि पारदं संखल्ले तु पुनः॥ २७॥ कांबोजदेशसंभूतं लोहमा
नीय यत्नतः॥ तत्पत्रं तु समाचर्य षड्विंशद्गुलं पुनः॥ २८॥ तत्पत्रन्तु समादाय त्रिविधा
भिर्विभावयेत॥ त्रिवीरायारसेनैव नववारं कुटं वयेत॥ २९॥ पुनर्नवारसेनैव पूर्ववद्भाव
विभा

ये द्रुधः॥ गिरिकर्णिरसेनैव नववारं पुटं ददेत्॥ ३०॥ वज्रभानुरसेनैव दद्यान्नवपुटानि
च॥ ब्रह्माण्डमोदनीगृह्यपूर्ववत्तेन भावयेत्॥ ३१॥ मुखमुद्रां समादाय रुदन्तीरसभावि
ताम्॥ शिवीरायारसेनैव पुनर्मुद्रां विधाय च॥ ३२॥ वज्रवल्लीरसेश्चैव पुनर्मुद्रणमाचरे
त्॥ तद्यन्त्रेतु रसं दद्यात् ततो हि पारदो ददेत्॥ ३३॥ ततो मुद्रां प्रकुर्वीत विधिपूर्वकमुत्तमाम्
॥ ततश्चुल्लीं भुवां कृत्वा तद्यन्त्रं निधापयेत्॥ ३४॥ कीलमेकं समारोप्य तत्र यत्नेन बन्ध
येत्॥ शुभे दिने सुनक्षत्रे स्वर्णेश ध्यानपूर्वकम्॥ ३५॥ ब्रह्मचर्यपरो भूत्वा मिताहारी जि
तेन्द्रियः॥ अग्नितत्र प्रदद्याद्वै एकैकाङ्गारयोगतः॥ ३६॥ अङ्गारेश्च पुनर्नष्टे पुनर्दद्या

द्वितीयकम्॥ एवं त्रिमासपर्यन्तमेक द्वित्रिचतुर्दर्दैत॥ ३७॥ चतुर्मासोत्तरं तत्तुवं शाङ्गा
रं प्रकल्पयेत॥ उपर्यायाति सूतो हि तत्र शब्दं करोति हि॥ ३८॥ एवमग्निं तत्र दद्यात्कला
वां सत्तु जायते॥ वर्षान्तरं कल्पात्वेका ह्यधो याति सुरेश्वरी॥ ३९॥ अग्निं दद्यात्प्रयत्नेन
नश्चाहोरात्रमेकं हि॥ एवं द्वित्रिचतुःपंचषट्सप्तवसुरेचका॥ ४०॥ दिग्रुद्रसूर्यकामाच्च
भूतपंचदशा द्विज॥ षोडशीतिततो देवि द्विवर्षाज्जायते कला॥ ४१॥ कलात्रयोदशा
नां हि भक्षणार्थं प्रकल्पयेत॥ तिथिसंख्यान्तरं देवि धातुवेधे प्रकल्पयेत॥ ४२॥ धातुवेध
प्रभेदैस्तु पारदः परिकीर्तितः॥ अत्रैव योगकर्तव्यस्तालजो वाथ वङ्गजा॥ ४३॥ नागजो

वाताभ्रजोवातरुद्धिषभयेपिच॥आरजोरोप्यजोवापित्तोहजोपिप्रकीर्त्तितः॥ ४४॥
गन्धजन्तुकनिस्सस्यात्तुद्रयोगन्तुपूर्ववत्॥ अभ्राग्निपूर्ववद्‌घाद्रक्षणार्थंततोभवेत् ॥
४५॥एतत्कल्लावान्कथितः पारदस्तु मयानव॥एतस्यभक्षणात्पुत्रवलीपलितनाशनः
४६॥नानारोगाग्निहरणः कामरूपप्रदायकः॥ एतस्यार्द्धदिनेनैवकलावान्तालकोभवेत्
४७॥येगुणाः पारदेः प्रोक्तास्तएवतालकेमता॥पारदःशिवइत्युक्तस्तालकोहरिरीश्वरः॥ ४८
इतिसंक्षेपतप्रोक्तंरहस्यातिरहस्यकम्॥यस्यविज्ञानमात्रेणकामरूपिनरोभवेत्॥ ४९॥
इतिरुदन्तीकल्पचतुःषष्टिमः॥ ६४॥ ॥अथवालियककल्पः॥ एरण्डसदृशेःप

त्रैः पल्लैश्चैवतुनादृशैः॥ तस्यप्रयोगंवक्ष्यामिसर्वसंशयनाशनम्॥१॥ तस्यपत्ररसं
गृह्यपारदाभ्रकमिश्रितम्॥ एकरात्रंमर्दयेच्चपिण्डीभवतितत्क्षणात्॥२॥ ध्मायमानेनतास्थेनवद्धोभवतिपारदः॥ तस्यकन्दंसमादायकृत्वाखण्डानिपाचयेत्॥
३॥ ग्रामैकंमहिषीक्षीरेभ्छायायांशोषयेत्ततः॥ कर्षैकंभक्षयेन्नित्यंक्षुत्पिपासाहरंभवेत्॥४॥ सिद्धयोगमिदंख्यातंपुरानागार्जुनोदितम्॥ ॐ नमोभगवतेअमृतार्णव
मध्यस्थसंस्थितायममशरीरेअमृतंकुरुकुरुस्वाहा॥ इतिवाल्लियकल्पः पञ्चषष्टितमः॥६५॥ ॥अथभूकदम्बकल्पः॥ भूकदंबेतिविख्याताफलेजीरकसन्निभैः॥

कुसुम्भसदृशैः पुष्पैश्चक्राकारैश्च संस्थितैः ॥ १ ॥ मूलैर्वह्निशिखाकारैः सूतकस्य नि
बन्धिनी ॥ मूकदम्बं त्रिधा प्रोक्तं शुक्लरक्तासितैक्रमात् ॥ २ ॥ पुष्ये भानौ सितेपक्षे समू
लं पल्लवान्वितम् ॥ गृहीत्वा शोषयित्वा तु छायायां शुष्कचूर्णितम् ॥ ३ ॥ सुदिने शुभन
क्षत्रे सर्पिषा सह भक्षयेत् ॥ जीर्णान्ते पथ्यभुञ्जीत क्षीरान्नं च जितेन्द्रियः ॥ ४ ॥ घृते
न मधुसंयुक्तं सर्वव्याधिविनाशनम् ॥ सर्पिषा तु प्रयोक्तव्या पलितं हन्ति वेगतः ॥ ५ ॥
वातं काञ्जिकसंयुक्तं युक्तं जलसमन्वितम् ॥ जलोदरे च तक्रेण दध्ना गुल्मे तु योजयेत् ॥
६ ॥ कुष्टमव्याज्यसंयुक्तं निःशेषरोगनाशनम् ॥ मूकदम्बस्य वृक्षस्य मन्त्रश्च शमु

नोदितः॥७॥ॐ अमृतोद्भवाय अमृतं मे कुरु ठः ठः॥ इतिभूकदम्बकल्पः षट्षष्ठित
मः॥६६॥ ॥अथोच्चटाकल्पः॥ रसायनं प्रवक्ष्यामि यत्सुरैरपि दुर्लभम्॥उच्च
टाख्यौषधी रम्या जायते पृथिवीतले॥१॥ एकनाला भवेत्सा तु वर्णेन कांक्षनीलिका॥
तस्याः पुष्पं भवेद्भूयं शुकतुण्डसमप्रभम्॥२॥ कन्दं कुंभप्रतीकाशं तस्या लक्षणमीदृ
शम्॥ वसन्ते श्रवते सा हि मधुरं च विचक्षणाः॥३॥ तस्योपरि समारुह्य अंतरीक्षे निरीक्ष
णात॥ देवासुराद्या दिद्दृश्यन्ते सिद्धदृष्ट्या तदीदृशम्॥४॥ तद्दृशं सर्वलोहानि सकुल्के
पे विरिच्यते॥ कांचनं कुरुते दिव्यं क्षिप्तं चैकत्र वह्निना॥५॥ मज्जयित्वाङ्गुलीं तत्र लि

हेदनुसकृत्समान्॥ विधानानिचसर्वाणियत्रकुत्रस्थितानिच॥ ६॥ पश्यत्तेनात्रसन्देह
औषध्यास्तुप्रभावतः॥ प्रद्युम्नसदृशोरूपेनागायुतपराक्रमः॥ ७॥ कान्त्या चन्द्रमसःप्रा
ज्ञोवेगेनपवनोपमः॥ मेधावीसर्वशास्त्रज्ञोवलीपलितवर्जितः॥ ८॥ मार्कण्डेयीरवदी
र्घायुःसत्यसौभाग्यवर्द्धनः॥ स्त्रीणांप्रियतमश्चैव कामदेवइवापरः॥ ९॥ अथवा पत्रपुष्पा
णिफलमूलयुतानिच॥ सूक्ष्मचूर्णप्रकुर्वीतप्रतिवारंचदापयेत्॥ १०॥ छेदेदाहेकसैवे
वहेमंभवतिशोभनम्॥ शुद्धपत्राणिलेपेनवेधयेन्नात्रसंशयः॥ ११॥ कांचनंजायतेदि
व्यंत्रिविधदोषैस्तुवर्जितम्॥ वेधयेत्सर्वलोहानिकांचनानिभवन्तिच॥ १२॥ रसतालकतु

त्थानि मर्दयेदुच्चयारसैः॥ आतपे मृपनेतन्नोरसो दिव्यो षधीवलात्॥१३॥ वेधयेत्सर्वलो
हानि लक्षांसेन वरानने॥ आवर्तितं भवेद्या पच्चा मूनरसमप्रभम्॥१४॥ अथवा ह्योष
धीस्थानं कथयामि समासतः॥ कुवेरनगरेरम्येतथाजालन्धरे गिरौ॥१५॥ हिमालयेच
श्रीशैलेतथाविंध्येमहानगे॥ उच्चटायारसे चैव कर्षमात्रप्रमाणतः॥१६॥ पिवेन्मधुघृते
र्युक्तं निद्राभवतितत्क्षणात्॥ स्वयं निर्गच्छतेसिद्धिः सूर्यतेजसमप्रभः॥१७॥ नाशयेच्चज
गत्सर्वं सपक्षोरगराक्षसान्॥ अमरानपिनिर्जित्य बलिनं कुलिशाधिपम्॥१८॥ जित्वावि
द्याधरान्सर्वान्बहुघोराक्षसादिकान्॥ स्वयमेव भवेदिन्द्रः कल्पस्यास्यप्रभावतः॥१९॥

इतिते कथितं देवि उच्चटायाश्च कल्पकम्॥ नदेयं दुष्टचित्ताय नास्तिकाय वरानने॥२०॥ ॐ
हुं हुं स्वाहा लक्षजपः॥ इति उच्चटाकल्पः समाप्तिमगमत्॥ ६७॥ ॥अथ शाकवृक्ष
कल्पः॥ करीरसदृशैः पत्रैर्गात्रैश्चैवमतुताहृशैः॥ एकमूलापयस्वी च रसतिक्ता उदीरिता॥
१॥ जायते त्वाङ्गले देशे अर्बुदेवापि शेषतः॥ विन्ध्याचले सैह्यपृष्ठे महाहेमलयेपि च॥२॥
शाकवृक्षश्च शाकाह्वः खरपत्रोऽर्जुनोपमः॥ अहिरुहः श्रेष्ठकाष्ठः स्थिरसारो गृहद्रुमः॥३॥
शाकवृक्षस्य निर्यासं पलमात्रं समानयेत्॥ पलेन शिग्रुबीजस्य रसेन परिमर्दयेत्॥ ४॥ पल
मात्रं तु शुल्वस्य सूक्ष्मपत्रं प्रदापयेत्॥ बहुशो लेपनं कृत्वा घर्मे दत्वा पुनः पुनः॥५॥ पश्चात्तं

धाम्यते पत्रं शुल्वं हेमाभिजायते ॥ शाकवृक्षस्य देवेशि निष्पिड्य रसमुत्तमम् ॥ ६ ॥ रक्त
चन्दन संयुक्तं सर्वलोहानि जारयेत ॥ मिलन्ति सर्वलोहानि द्रवन्ति सलिलं यथा ॥ ७ ॥
शाकवृक्षस्य निर्यासं पलनन परिगालयेत ॥ शिवमूलस्य चूर्णन्तु तद्रसेनतु मर्दयेत ॥ ८ ॥
प्रलिप्य शुल्व पत्राणि पुटं दत्वा विपाचयेत ॥ तत्तारं कांचनं दिव्यं भवेल्लक्षण संयुतम् ॥ ९ ॥
फलानि शाकवृक्षस्य परिपक्कानि संग्रहेत ॥ तद्रसेन रसं प्राज्ञः सप्तरात्रं विभावयेत ॥ १० ॥ त
द्रसेनतु संयुक्तां मेघ विष्ठाभिमिश्रितं तथा ॥ लेपयेत्तारपत्राणि ध्यानं भवति काञ्चनम् ॥ ११ ॥
इति शाकवृक्षकल्प अष्टषष्टितमः ॥ ६८ ॥ ॥ अथ क्षीरकन्दः ॥ वक्ष्ये शृणु क्षी

रकन्दं सर्वसिद्धिकरं तथा ॥ चतुर्वर्णमिदं तत्र रक्तगंधं प्रसूयते ॥१॥ पत्रैस्तु हि सम
स्निग्धा सप्तभिर्हेमसुप्रभैः ॥ भस्माचैव स्रवेत्क्षीरं रक्तवर्णं सुशोभनम् ॥२॥ मेघानां च
निनादेन जायते रूपशोभनम् ॥ वन्ध्वनं रसराजस्य सर्वसत्ववशंकरम् ॥३॥ तस्य क्षी
रन्तु संग्रस्य तारं निर्वापयेद्बुधः ॥ धमेद्दृढाग्निना चैव जायते हेमशोभनम् ॥४॥ इति श्री
रकन्दस्य कोनसप्ततितमः ॥ ६९ ॥ ॥ अथ तैलकन्दकल्पः ॥ ईश्वर उवाच ॥ शृ
णु राम प्रवक्ष्यामि रहस्याति रहस्यकम् ॥ स्वर्णतन्त्राभिदं तन्त्रं कल्परूपेण कथ्यते ॥
१॥ तत्राद्यं स्वर्णतन्त्रस्य कल्पं शृणु सुपुत्रकः ॥ तैलकन्दाभिदः कन्दः सिद्धकन्दः प्र

कीर्त्तितः॥२॥ कन्दः कमलकन्दोयः पत्राणि कन्दवच्छिशो तथैव च महत्स्ववर्तेतेऽत्र
वतिसर्वदा॥३॥ जलमध्ये सदा पुत्र स्थायिरूपेण तिष्ठति॥ विषकन्दे विख्यातविषा
स्तकविनाशनः॥४॥ तैलस्रावी महाकन्दः पूरितस्तैलवज्जलम्॥ दशहस्तमिते
देवदृश्यतेतत्र चिक्कणम्॥५॥ महाविषधरः पुत्रस्तदधो वसति ध्रुवम्॥ कन्दाधः कन्द
छायायां नान्यत्र गच्छति प्रिये॥६॥ तत्परीक्षां विधायादौ कन्दे सूचिं प्रवेशयेत्
सूची द्रावः क्षणात्तु अतात्कन्दं तु समाहरेत्॥७॥ तत्पर्यायः द्रवकन्दः तिलाङ्कित
दलः करवीर तिलचित्रपत्रकः अस्य गुणाः लोहद्राविलं· कटुत्वं· उष्णत्वं· वात

पस्मारविषशोफनाशित्वे· रसरक्तकारित्वं· देहसिद्धिकारित्वंच ॥ तत्कन्दंतु समादाय
सुशुद्धसूतं खल्वे त्रिधा ॥ मूषायां निःक्षिपेत्सुत तैलं तत्र निःक्षिपेत् ॥ ८ ॥ दीप्ताग्निंतु तद
ाम वंशाङ्गारेण दापयेत् ॥ तत्क्षणान्मृतिमायाति लक्षवेधी भवेत्सुत ॥ ९ ॥ ततः प्रभक्षये
द्रामक्षुन्निप्रहारको ध्रुवम् ॥ तालं शुद्धं समादाय तत्तैलेन खल्वेत्सुत ॥ १० ॥ सप्तधाप्रत्य
हं रामत्वेकविंशद्दिनं ध्रुवं ॥ हरितालो मृतिमैति निर्धूमो जायते ध्रुवम् ॥ ११ ॥ तत्तालंचा
ष्टधा तैलेतु दत्वा द्रावेकृते सति ॥ सर्ववेधी भवेद्देव शतवेधो भवेत्सुत ॥ १२ ॥ तत्तैलन्तु समा
दाय ताम्रद्रावे विनिःक्षिपेत् ॥ तत्क्षणात्ताम्रवेधस्यात् दिव्यं भवति कांचनम् ॥ १३ ॥ वङ्गे

कांश्ये यदा दद्यात् तदा रौप्यं भवेत्ततु ॥ ताम्रे लोहे तथा रीत्यां तारे खर्परसूतके ॥१४॥ त
त्क्षणाद्धेमतां याति दिव्यं भवति काञ्चनम् ॥ दरदस्थं पारदं तु समानीय विचक्षण ॥१५॥
छायायां खल्लनं कार्य मेकविंशद्दिनं सुत ॥ तत्र शंकुं निवेश्याथ तद्यन्त्रं तत्र वं धयेत् ॥१६॥
आदौ दीपाग्निमारभ्य हठाग्निं दापयेत्ततः ॥ पुरश्चर्यायुतो मंत्र स्वर्णाकर्षणयोगतः ॥१७॥ ब्र
ह्मचर्यपरो भूत्वा तत्राग्निं दापयेत्सुत ॥ अरण्याग्निं तु वेश्याग्निं रजादिं वाथ पुत्रकः ॥१८॥ मास
द्वये व्यतीते तु कज्जलमात्रं प्रजायते ॥ उड्डीय प्रथमं रामसुत्रायां गच्छति ध्रुवम् ॥१९॥ अधो
याति ततः सूतस्तत्र शब्दं करोति हि ॥ यत्र शब्दो भवेत्पुत्र कज्जल तत्र समादिशेत् ॥२०॥ क

त्वांतत्र दशांशस्तु भक्ष्यणार्थं प्रयोजयेत्॥ क्षुधाकरः कामकी सर्वथा भवति ध्रुवम्॥
२१॥ कलायोऽशयुक्तो हि शतवेधी प्रजायते॥ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतु
मिच्छसि॥२२॥ इति तैलकन्दकल्पः सप्ततितमः॥७०॥ ॥अथ कटुकुष्मा
ण्डकल्पः॥ कटुकुष्माण्डकल्पो हि कथ्यते शृणु सांप्रतम्॥ कटुकुष्माण्डमादा
य तद्रसं ग्राहयेत्सुधीः॥१॥ वङ्गं दद्यात्पदपुत तदा रौप्यं प्रजायते॥ ताम्रे लोहे तथा
रौप्यं तच्चूर्णं तद्रसं क्षिपेत्॥२॥ तत्क्षणात्स्वर्णमायाति स्वर्णं जाम्बूनदं भवेत्॥ तद्र
सं तारसंयुक्तं सप्तधातुप्रभेदकृत्॥३॥ इति कटुकुष्माण्डकल्पेकसप्ततितमः॥७१

अथऋद्धिवल्लीकल्पः॥ अथान्यत्संप्रवक्ष्यामि रामसर्वहिताय च॥ ऋद्धिबीजांकु
रं गृह्य ऋद्धिवल्ल्यभिलांसुतः॥ १॥ ताम्रं संसाध्य यत्नेन तत्ताम्रे श्रुरसं क्षिपेत्॥ त
त्ताम्रं स्वर्णतां याति गाङ्गेयं भवति ध्रुवम्॥ २॥ जलं वङ्गस्य कृत्वादौ तद्रसं तत्र निः
क्षिपेत्॥ तत्क्षणा दौप्यतां याति कुन्दपुष्पसमप्रभम्॥ ३॥ तद्रौप्यं तु समादाय तद्र
से न तु संखलेत॥ दिनैकं तु खलेत्पुत्र कलङ्को भवति ध्रुवम्॥ ४॥ तं कलङ्कं समादा
य रक्तिकार्द्धं द्विजोत्तमः॥ धातु मांसाविनिः क्षिप्य रश्मीविधी भवेत्सुतः॥ ५॥ इति ऋद्धि
वल्लीकल्पद्विसप्ततितमः॥ ७२॥ ॥ अथ कटुतुम्बिकल्पः॥ कटुतुम्बिलताविं

श्रेष्ठः॥ तत्पर्यायः॥ इक्ष्वाकुः कटुकालाबुः नृपात्मजा· कटुतिक्तीका· कटुफला
तुम्बिनी· कटुतुम्बी· बृहत्फला· राजपुत्री· तिक्तबीजा· तुम्बिका· अस्यागुणाः कटुत्वं
तिक्तत्वं· वान्तिकारित्वं· श्वासवातकासशोथव्रणशूलविषनाशित्वं· शोधनत्वं·
पाण्डुकफवायुकृमिनाशित्वंच॥ अथान्यत्संप्रवक्ष्यामि कटुतुम्ब्याभिदांसुतः॥
कटुतुम्बिवनेगत्वा मन्त्रप्रार्थनपूर्वकम्॥ १॥ बीजस्य रकटुर्देविद स्तुवदनं कटुः
ईदृशस्यच कल्पोहि कार्यो यत्नेन धीमता॥ २॥ सूचिकापिप्पलानांचव ह्वः कार
येत्सुत॥ कार्तिकेसमनुप्राप्ते फलेसूचींप्रवेशयेत॥ ३॥ युक्त्या प्रवेशनं कार्यं

वीजभेदोयथानच॥ चत्वारः पंचशः षष्ट सप्ताष्टोनवमेप्रिये॥ ४॥ आमाघस्यसमा
प्तांतेफलाविचावलोकयेत॥ वीजवेधेसमुत्पन्नेफलंनश्यतितद्ध्रुवम्॥ ५॥ त्रि
मासंतत्रशयनंकार्यंयत्नेनधीमता॥ यद्यत्फलंभवेन्नष्टंतत्तत्याज्यंततम्मुनः॥ ६॥
तद्रसेनयुताःसत्वःसिद्धएवभवंतिहि॥ मासोत्तरंतदारामतेयांनिष्कासनंचरेत॥
७॥ सत्विनामग्निसंयोगः कार्यश्चाम्नाययोगतः॥ वनोपलस्यलक्षारं कृत्वाचैवशराव
के॥ ८॥ तत्रसत्व्यानुनिःक्षिप्यास्वर्णंभवतिनिश्चितम्॥ शरावद्वयसंहत्य सत्त्वकार्यं
प्रयत्नतः॥ ९॥ कुक्कुटाख्यपुटेनैवभवेज्जाम्बूनदप्रभम्॥ वंशाङ्गारेणवादेयंवनोप

लप्रयोगतः॥१०॥अथवामूषिकांकृत्वा तत्रदेयानुसूचिका॥तत्रध्यानेमहेशस्य दिव्यंभ
वति कांचनम्॥११॥अङ्गारमध्येसूचीनां स्थापनंतु समाचरेत्॥ध्मातं भवति विप्रेन्द्र स्वर्णं
जाम्बूनदं भवेत्॥१२॥तस्य बीजानि संगृह्य सूक्ष्मचूर्णानि कारयेत्॥एकविंशतिवाराणि
भाव्यं धात्रीरसेन च॥१३॥पयसा सहितेनैव स्निग्धभेषजसंयुतम्॥बीजं यंत्रे विनिःक्षिप्य तैलं
संगृह्य पण्डितः॥१४॥रसं मूर्छाय संतेन चक्रमर्द्दनमाचरेत्॥गोपित्तं शिखिपित्तंच कांक्षि
कासीससंयुतम्॥१५॥तारतुल्यानि चैतानि सर्वेषां सूतकं समम्॥मेषशृंगे च दातव्यं मासमे
कं निरन्तरम्॥१६॥लोहदण्डेन संमिश्रं सर्वलोहानि वेधयेत्॥गंधकं लोहदण्डेन चैकविं

शतिभावितम्॥ ७७ ॥ पंचविंशदिनान्तेतु जायते कनकोत्तमम्॥ इति ते कथितं राम कटुतुं

ब्याश्च कल्पकम्॥ १८ ॥ इति कटुतुम्बि कल्पः त्रिसप्ततितमः॥ ७३॥ ॥ अथ श्वेत

गोक्षुरकल्पः॥ अथान्यत्तं प्रवक्ष्यामि श्वेत गोक्षुरकल्पकम्॥ येन विज्ञानमात्रेण रसायन

वरो भवेत्॥ १॥ वङ्गं संशोध्य यत्नेन तत्र गोक्षुरकं रसम्॥ निःक्षिप्य प्रधमेत्तत्र वङ्गं स्तारक

तां व्रजेत्॥ २॥ इति श्वेत गोक्षुरकल्पः चतुःसप्ततितमः॥ ७४॥ ॥ अथ काकारिकल्पः॥

काकारिकल्पं देवेश शृणु यत्नेन सांप्रतम्॥ काकारिका कतुण्डी च द्वौ वै पर्यायवाचकौ॥

१॥ पुष्पार्कितत्फलं गृह्य सुपक्वं सुमनोहरम्॥ तत्फलस्य रसेनैव पारदं सुदृढं खलेत्॥ २॥

दिनमात्रं खल्वे देववज्रो भवति पारदम्॥ एकविंशद्दिनं देवतद्रसेनतु मेलयेत्॥३॥ रससंमेल
नाद्देवमुष्टिर्मर्दितमुराग्ममता॥ तस्यासंधारणादेवखस्फूपसिद्धिर्भवेत्॥४॥ तत्पंचाङ्ग र
सेनैव पारदं सं खल्वेत्ततः॥ तं मूषिकायां संक्षिप्य तं रसं तत्र निःक्षिपेत्॥५॥ एवं प्रहरमात्रं तु रसं
दद्यात्पुनः पुनः॥ एवं क्रमेण मत्सुत्र पारदो मृतिमेष्यति॥६॥ तं पारदं तु मत्सुत्ररंजिकादशमांस
कम्॥ भक्षयेद्घृतस्ततः पुनश्चिरजीवि भवेत्स तत॥ प्रत्यसाहस्त्रसंभक्षी भवत्येव न संशयः॥८॥
हरितालेन द्रसंतु दत्वा खल्लनमाचरेत्॥ यामाष्टौ सं खल्वे चैव निर्धूमो भवति ध्रुवम्॥९॥ रक्ति
कार्द्धं भक्षयेत्तं गुणं पारदवद्र्वेन॥ सपारदस्तु कनके लक्षवेधी भवेत्स्मृतः॥१०॥ तथैवता १३४

लकः पुत्रधातवेधीप्रजायते ॥ तत्पन्नस्यरसंपुत्रवङ्गमध्येविनिःक्षिपेत् ॥ ११ ॥ तत्तारंजायते
शुद्धंकुन्दपुष्पसमप्रभम् ॥ तस्यपुष्परसःपुत्रधातुमात्रप्रभेदकृत ॥ १२ ॥ तत्फलस्यरसं
पुत्रताम्रद्रवेविनिःक्षिपेत ॥ सुवर्णंजायतेशुद्धंतप्तजाम्बूनदःप्रभम् ॥ १३ ॥ इतिकाकारी
कल्पःपंचसप्ततितमः ॥ ७५ ॥ अथनिशाचरकल्पः ॥ शृणुभैरवितत्त्वेनरहस्यंरसबन्धनम्
ब्रह्मविष्णुसुरेन्द्रैश्चनज्ञातंसुरवन्दिते ॥ १ ॥ गंगायमुनयोर्मध्येप्रयागोनामराक्षसः ॥
तस्यसंस्मरणाद्देविक्षणात्वंऊतस्तकः ॥ २ ॥ निशाचरस्यपत्राणिगृह्णीयात्साधकोत्त
मः ॥ निष्पिष्यचततोदेविरसोभवतिकोत्तमः ॥ ३ ॥ रसंसंमर्द्यतेनैवरसेनत्रीणिवात्रिकम् ॥

आरोधं वध्वये क्षिप्तं गगनं तत्र जारयेत् ॥ ४ ॥ तेन पत्ररसेनैव साधयेद्धूकं पुनः ॥ सप्त
धा भावयेत्तेन शृंखपणेन सहैकतः ॥ ५ ॥ यंत्रे विद्याधरे देवि गगनं तत्र जारयेत् ॥ मासमा
त्रेण देवेशि जीर्यते तु समं समम् ॥ ६ ॥ जीर्णे तु गगने देवि शतवेधी भवेद्रसः ॥ निशाचररसे
भांव्यं सप्तवारं तु तालकम् ॥ ७ ॥ तेनैव ध्मापयेद्दृढं नागं तारं तु वापयेत् ॥ तत्तारं जीर्य
ते सूतेन सूतं बन्दितं भवेत् ॥ ८ ॥ चतुःषष्टितमो भागो धुल्पवेधं तु दापयेत् ॥ तत्तारं जाय
ते पुंसां धर्मकामार्थमोक्षदम् ॥ ९ ॥ निशाचरस्य पुष्पाणि सूक्ष्मचूर्णानि कारयेत् ॥ पल
त्रिदशं चूर्णस्य रसे धात्र्यास्तु भावयेत् ॥ १० ॥ घृतेन मधुना लोड्य नवभाण्डे विनिःक्षि

पेत्॥ धान्यरा शौनि धातव्य त्रिसप्ताहं सुरेश्वरि॥ ११॥ तेन भक्षितमात्रेण वलीपलित
वर्जितः॥ स्थिरस्त्वर्ग्यो कारो सौ स्त्री शतं का मितुं क्षमः॥ १२॥ वल्कलं सूक्ष्म चूर्णं तु मधुना
सह संलिहेत्॥ अर्धमास प्रयोगेण पतय योगं भवेत्प्रिये॥ १३॥ तस्य मूत्र पुरीषेण शुल्वं
भवति कांचनम्॥ मास मात्र प्रयोगेण पन्नगः कांचनं भवेत्॥ १४॥ ग्राह्येत त्फल तैलन्
तु यंत्रे पाताल संज्ञके॥ तेन तैलेन देवेशि शिरः संकोचयेद्बुधः॥ १५॥ तत्क्षणाज्जा
यते देवि घोर वज्रो महारसः॥ कारकं कुण कंकार्य रस लिंगं वरानने॥ १६॥ संकोच्य
मारणं तेन कर्त्तव्यं परमद्भुतम्॥ इति ते कथितं देवि प्रीतयेत वसुन्दरी॥ १७॥ इतिति

१॥ज्वरकल्पः षट्सप्ततितमः॥७६॥ ॥अथकंकालखेचरीकल्पः॥पुनरन्यंप्रवक्ष्या
मिरसबन्धंसुदुर्लभम्॥कंकालखेचरीनाम्नाऔषधंपरमेश्वरी॥१॥तस्यतैलं
तुसंग्रह्य आद्यखेचरीसंयुतम्॥स्थापयेद्दिनमेकन्तुपात्रेभास्करनिर्मिते॥२॥द्विती
येवासरेप्राप्तेवज्रवल्लींतुपूरयेत्॥अनेनव्यापयेत्तन्तुसुतप्तंप्रज्वलप्रभम्॥३॥सबीजा
ह्योषधीग्राह्याकिंचिद्धुल्लयुतातथा॥मंत्रसिंहासनेनामतृतीयानामखेचरी॥४॥पाता
लयंत्रेततैलंगृहीत्वायांताम्रभाजने॥तस्यतैलस्यमध्येतुप्रक्षिपेत्खेचरीयुतम्॥५॥मेदि
नीयंत्रमध्येतुस्थापयेच्चवरानने॥पूर्वौषधीयुतंदेविगगनंभेदिनीजले॥६॥रसेमासंत

तोदस्वामर्द्दनाद्गालकं प्रिये ॥ समेतुगगने जीर्णे वद्धस्ति ष्ठतिपारदः ॥ ७ ॥ भस्त्राफुत्कार
युक्तेन ध्मायमानो न नश्यति ॥ काकविष्ठासमंकृत्वं समजीर्णस्य जायते ॥ ८ ॥ द्विगुणं गगने
जीर्णे अष्टत्वोहनिसंहरेत ॥ इतिते कथितं देवि कङ्कालखेचरीगुणम् ॥ ९ ॥ इतिकङ्काल
खेचरीकल्पः सप्तसप्ततितमः ॥ ७७ ॥ ॥ अथ त्रैलोक्यजननी कल्पः ॥ पुनरन्यं प्र
वक्ष्यामि रसवन्धं सुदुर्लभम् ॥ त्रैलोक्यजननी या सा औषधी सुरपूजिता ॥ १ ॥ तयासंप
र्कमात्रेण वद्धस्तिष्ठति पारदः ॥ सप्ताहं मर्द्दितस्यास्या महौषध्या रसैरसः ॥ ४ ॥ दशांशेनैव
वेधेन कुरुते दिव्यकाञ्चनम् ॥ आसप्ताहं तद्रसैश्च मर्द्दनाद्धरवर्णिनी ॥ ३ ॥ लक्षवेधी र

सः॥३॥दाद स्वल्पो हानि विन्दति॥ चतुर्थे नैव सप्ताहे कोटिवेधी भवेद्रसः॥ ४॥ स्वेदितोपि न वर्षेण
महाव ध्यारसेन च॥ ददाति खेचरीसिद्धिमणिमादिकगोचरात्॥ ५॥ कामयेत्कामिनीनां
तु सहस्रं दिवसान्तरे॥ नष्टच्छायो ह्यदृश्यश्च त्रैलोक्यं संभ्रवेदसौ॥ ६॥ महाव ध्यारसेनैव
मृतसंजीवनं भवेत्॥ मंत्रेण दापयेत्तस्य हस्तपादौ तु मर्दयेत्॥ ७॥ तस्य तु प्रविशेज्जीवो मृतस्या
पि वरानने॥ इति ते कथिता देवि त्रैलोक्यजननी परा॥ ८॥ इति त्रैलोक्यजननीकल्प अ
ष्टसप्ततितमः॥ ७८॥ ॥ अथ शौरिन्द्रीकल्पः॥ पुनरन्यं प्रवक्ष्यामि रसबन्धं सुरेश्वरि॥
शिवदेहात्समुत्पन्ना औषधी तु हरीन्द्री॥ १॥ जारयेदं धकं सा तु जारयेत्सापटालकम्॥

कांचनं जारयेत्सा तु रसेन्द्रं बन्धयेत्क्षणात् ॥ २॥ प्रवालं द्रावयेत्सा तु द्रावयेद्गगनं तथा ॥ व
ज्रं तु द्रावयेत्सा तु सर्वसत्वं च पातयेत् ॥ ३॥ जारयेत्सर्वलोहानि सत्वान्यपि च जारयेत् ॥ इ
रिन्दिरीरसेनैव मर्दितं तु रवन्दितो ॥ ४॥ धान्यराशौ निधातव्यं भूतिस्तिमितपारदः ॥ दिव्यौष
धारसेनैव रसेन्द्रः सुरवन्दिते ॥ ५॥ समे तु कनके जीर्णे दशकोटिं तु वेधयेत् ॥ पंचमे लक्षके
रिन्तु षष्ठे तु स्पर्शवेधकः ॥ ६॥ सप्तमे धूमवेधी स्यादष्टमे भावलोकतः ॥ नवमे सप्तवे
धी स्यात्तदूर्ध्वं च न विद्यते ॥ ७॥ भ्रमन्ति पशवो मूढाः कुलौषधिविवर्जिताः ॥ तस्मात्स
र्वप्रयत्नेन ज्ञातव्या तु कुलौषधी ॥ ८॥ इति इन्दिरीकल्पे कोनाशीतितमः ॥ ७९ ॥

अथस्थलपद्मिनीकल्पः॥ स्थलजापद्मिनीचान्या स्थलेतद्रूपधारिणी॥ पद्मि
नीसदृशापत्रैपुष्पैरपिचतादृशा॥१॥ भङ्गेचैवस्रवेत्क्षीरं रक्तवर्णंसुशोभनम्॥ पुष्प
माकीर्णकंतस्यासद्गुन्धा सर्वकर्मकृता॥२॥ आक्रम्य वामपादेनपश्येद्गगनमण्डल
म्॥ पश्येततारकायुक्तंग्रहनक्षत्रमण्डलम्॥३॥ लक्षयोजनतो देविसालेया स्थल
पद्मिनी॥ अथतस्याविधिंवक्ष्ये शृणुसर्वसुरेश्वरी॥४॥ तस्यापंचाङ्गमादाय हरगो
रिसमन्वितम्॥ मनःशिलातालयुतं माक्षीकेनसमन्वितम्॥५॥ मर्दयेत्सप्तरात्रन्तु
तेनशुल्वंचवेधयेत्॥ सहस्रांशेनदेवेशिसिद्धंभवतिकांचनम्॥६॥ तस्यापंचाङ्गमा १३८

दायपूर्वोक्त. विधिना प्रिये ॥ जारयेत्सूतराजं च मूकपुष्पागतं धमेत ॥ ७ ॥ मृयते मू
षिकामध्ये संकोचेन न संशयः ॥ तेनैव सर्वलोहानि सहस्रांशेन वेधयेत ॥ ८ ॥ इति
स्थलपद्मिनीकल्प अशीतितमः ॥ ८० ॥ ॥ अथ अम्लवेतसकल्पः ॥ अम्लवे
तसः स्वनामसिद्ध वृक्षविशेस ॥ अम्लो वेधरिसामृस्यादमृवेतस एव च ॥ वेतसाम्ल
मुसाक्षे शतवेधन्च वेधकः ॥ १ ॥ भीम अभेदनो भेदी राजाम्लश्चाम्लभेदनः ॥ अम्लाङ्कु
शो रक्तसार. फला श्चामूकनायकः ॥ २ ॥ सहस्रवेधी वीताम्लो गुल्मकेतुर्वराविधः ॥
शङ्खद्रावी मांसद्रावी लोहद्रावकरः स्मृतः ॥ ३ ॥ तद्गुणाः अत्यम्लकसायोष्णत्वं.

वातकफार्शः श्रमगुल्मनाशित्वं · अरुचिहारित्वं · छागमांसलोहसूचीद्रावका
त्वं · चणकाम्लवर्जुणकारित्वं · आनाहरोगनाशित्वं · गुरुत्वं · धारकत्वं च ॥ अम्लवेत
सकल्पश्च कथ्यते शृणु सांप्रतम् ॥ रसे रसायने चैव शोभनश्चाम्लवेतसः ॥ ४ ॥ क्रोध
जस्तु रसो दिव्यः स्वयं रस उदाहृतः ॥ विधानं लक्षणं तस्य शृणु वक्ष्यामि तत्त्वतः ॥ ५ ॥
क्रोधश्च दानवो नाम हिमवद्गिरिगह्वरे ॥ दक्षकुक्षौ कुमारेण घातितस्तु महाबलः ॥
६ ॥ शक्त्या हतस्य तस्यैव ललाटाद्रक्तबिन्दवः ॥ इतश्चेतश्च पतितास्ते यथाम्ला बीज
तां गताः ॥ ७ ॥ अम्लवेतसनामा च विटपस्तु समुत्थितः ॥ पत्रैः स्निग्धैर्वर्तैश्चैव श्लक्ष्णैरथ

श्वतीक्ष्णकैः॥ ८॥ छेदयित्वात्मदेहन्तु विध्यते चाम्लवेतसः॥ फलानितस्य हेमन्तेप्रवृ
त्तानि भवन्ति च॥ ९॥ करीरसंस्थाविज्ञेया पीलुकाकारसंस्थिताः॥ पीतास्तुमृदया
ज्ञेया अत्यम्लः स्वादतो भवेत्॥ १०॥ स्वयंगत्वा तमुद्देशम घोरास्त्रं समुच्चरेत्॥ लोहस्य
पिंकरे कृत्वा अस्त्रेणालभ्य संस्पृशेत्॥ ११॥ गृहीतो यादृस्त्वमंत्रेण क्षुण्णायेत्र गुल्मत
ले॥ जप्वाश्त्वं चोद्धृतं तत्र सम्यक्गृह्णाति तद्रसम्॥ १२॥ सरसो जायते पीतस्त्वम्लो
मधुरगंधकः॥ तस्य शेषाणि संक्षुद्य तोयेकृत्वा ध्यययथावतः॥ १३॥ रक्तपीतं भवेत्तैलं
तोयोपरि समुद्धरेत्॥ तेनैव न किंचित्संयुक्तः रसं तु स्वे विनिःक्षिपेत्॥ १४॥ स्निग्धे सिक्त

पकवस्त्रेणवेष्टयित्वाभ्रमंत्रितम्॥ लोहयष्टिंक्षिपेत्तत्र अंगुलीद्वयमात्रतः॥ १५॥
नयेद्देशान्तरंप्राज्ञो नित्यमद्द्वेणपूजयेत॥ कौश्चोनामरसोदिव्योजायतेह्यमरोपमः
१६॥ जराव्याधिविनिहन्तासौमृत्युदारिद्र्यनाशनः॥ अभयत्वात्स्वसंग्रासोलब्ध्वाबाथप
रिक्षयेत॥१७॥ रक्तःपीतःसुवर्णेनअल्पमूल्योजायतेरसः॥ निलिप्यकांश्यपात्रेतुतारल
ग्नतुहेमवत्॥१८॥ नयनाञ्जनेसुतीक्ष्णेननयनस्यजलापहः॥ विषूचिकाघजीर्णं
तुअन्तोज्वरसन्तथा॥१९॥ हरतितत्क्षणादेवप्राशितकिंचिमात्रतः॥ आमवातंतथा
शूलंशिरोर्तिहरतेक्षणात॥२०॥ वनितायोनिरन्ध्रेतुनिहितोद्रावकोभवेत॥ रक्तश्चेति १४०

हरेत्क्षिप्रं वातातीसारमेव च ॥ २१ ॥ भिरास्त्रावः स्तुतिं चैव वारयेत्तत्क्षणेन तु ॥ कर्णशूलं
च पूतित्वं मुखदोषं हरेत्क्षणात् ॥ २२ ॥ तीक्ष्णचूर्णं तु तेनैव उष्णातपनिधापितं ॥ द्रुव
ते नात्र संदेहः शङ्खशुक्तिमौक्तिकं तथा ॥ २३ ॥ धातवो गजदन्तानि स्नायुमांसं द्रवेत्क्ष
णात् ॥ एवं तु लक्षणं ज्ञात्वा ततः कर्म समाचरेत् ॥ २४ ॥ पीतं रक्तं सितं वाथ साकृवेत सं
युतम् ॥ अरण्योपले पुटे दग्धं चूर्णितं चूर्णतां व्रजेत् ॥ २५ ॥ मृयन्त्रे चन्द्रिकां हीनं तस्य
स्नेहेन संयुतं ॥ रवादिदाग्नौ गुरुध्मातं मशेषलेपवर्जितम् ॥ २६ ॥ जायते तत्र पयेन्मूषा पत्र
वैर्यथाक्रमात् ॥ तीक्ष्णाद्या आयसाः सर्वे द्रवन्ति नात्र संशयः ॥ २७ ॥ अमूर्वेद्यस्तैलेन सो घ

दत्वानुमर्दयेत ॥ सम्यग्द्रुतिः सबीजस्तु अप्रतीक्ष्णेन योजितः ॥ २८ ॥ सर्वजीवन्धमायातिता
राधिसं शतांशतः ॥ षिन्धनेकुरुते हेमचक्रादिन्दीवरं शशी ॥ २९ ॥ हेमताम्रागरं सोमं जाय
ते कनकं शुभम् ॥ द्विधा युक्तं सहस्रेण लक्षवेधी सपंचधा ॥ ३० ॥ अस्थाकोटिवेधी स्या
ज्ज्ञायते वा यतद्रसः ॥ उक्तवेधी सविज्ञेयो द्विधायुक्तस्य जायते ॥ ३१ ॥ स्नेहाम्लवेतसं दत्वा
स्वेदयेन्मर्दयेद्बुधः ॥ शोषान्ते द्रवते सर्वं मारयित्वा समं बुधः ॥ ३२ ॥ ततस्नेहाम्लुतैलेनतदा
मूषागतं रसमाप्य श्चात्तु सारणं कार्यं बीजभागाधिमश्यतः ॥ ३३ ॥ तद्बीजं सम भागेन तद्रसम
नुसारयेत ॥ मूषामध्यगतं ध्मातं द्रवे चैव द्रुतिं क्षिपेत ॥ ३४ ॥ तैलाम्लुवेन संयुक्तं वेधये

क्रमेतेक्षणात्॥ बीजहीनाभवेत्संख्यासर्ववेधे रसस्य तु॥ ३५॥ रसायनं रसं वादे त्वाघनि
घ्मावरक्तिका॥ सिद्धार्थकं तदर्द्धेन स्नेहेन सप्रयोजितम्॥ ३६॥ अग्निषोमीय बीजेन आत्मा
नु विष्णुवेगतः॥ समेन दिव्यदेहस्तु जरामृत्युविवर्जितः॥ ३७॥ खेचरत्वमवाप्नोति त्वणिमादि
गुणैर्युतः॥ स्पर्शवेधी यदा जातो गुटिकां धारयेन्मुखे॥ ३८॥ गुणोधिको भवेत्सिद्धो द्वितीय
इव शङ्करः॥ स्वतीक्ष्णानि च लोहानि क्रोधेन समयुना॥ ३९॥ पुटितानि तु लोहानि शो
ध्यन्मर्द्यायतीक्षणात्॥ तैलयोगेन शोध्यं तु जारयेद्व्यतेरसः॥ ४०॥ अथ चूलिकगंधस्तु
अम्लवेतससंयुतः॥ दत्वा आर्द्रं तु सरति दोलाके छपयोगतः॥ ४१॥ जारयेत्तु क्षणादेव क्रमा

द्वन्द्वमवाप्नुयात्॥ अम्लुवेतससंयोगाद्धमलो हानिपातितः॥ ४२॥ रसाभ्रो परसाभ्रैर्वमा
क्षीकविमलादयः॥ गन्धकाद्याश्चरेत्क्षिप्रं बध्यते रज्यते क्रमात्॥ ४३॥ द्रुतवन्धेयथासंख्या
गुणाधिकक्रमाद्भवेत्॥ बीजपादेन सूतस्य गंधकान्तो विनिःक्षिपेत्॥ ४४॥ गंधकं तत्र दातव्यं अ
म्लवेतसभावितः॥ पादेन चूलिकोपेतं तैलं दापयेत्ततः॥ ४५॥ अभावे ज्योतिस्तैलं तु त्रिस्नं स्वे
द्येद्बुधः॥ अभावात्किं चित्कं योज्यं तत्स्वेदं केवलामपि॥ ४६॥ कक्षोग्रोत्तुरयेत्स्वेदं सिपत्राणि
लेपयेत्॥ कच्छूकस्नेहदीपेत्तु त्रयोवारान्प्रतापयेत्॥ ४७॥ तं तल्लेपात्पुटत्रिणीतनुलेपनचाग्धये
त्॥ अलिपक्षनिभं तत्तु हेमाभ्रोन्मात्तकोत्तमम्॥ ४८॥ रसकामलमाक्षीकोदारदं तु पुटालये॥ १४२

शिलागैरिककासीससितपीतातुयाभवेत्॥४९॥हेमबीजेनहेमस्यात्सितबीजैःसितैसि
तम्॥आरविन्दन्तुभवतेतद्योगान्मात्रकोत्तरम्॥५०॥दानवेन्द्रकर्दमस्तुतैलहिंगंयथाभवेत्
अत्यम्लवेतसेयुक्तेमाक्षिकेस्तेहसंयुतम्॥५१॥बीजपोरेनसूतन्तुस्वेदयेद्दिवसत्रयम्॥लेप
येत्कुसिपत्राणितथादीपशिखेत्रिधा॥५२॥पुटत्रयंततोलेपंगुहायांधामयेत्ततः॥अलिपक्ष
निभंतत्तुहेमार्द्धन्मात्रकोत्तरम्॥५३॥अम्लवेतससंयुक्तंबलिर्रसदचूलिकम्॥आविकेते
